

संस्कृतम्


# आह्लादः

द्वादशी कक्षा











# भारताचे संविधान

## भाग ४ क

## नागरिकांची मूलभूत कर्तव्ये

**अनुच्छेद ५१ क**

**मूलभूत कर्तव्ये – प्रत्येक भारतीय नागरिकाचे हे कर्तव्य असेल की त्याने –**

(क) प्रत्येक नागरिकाने संविधानाचे पालन करावे. संविधानातील आदर्शांचा, राष्ट्रध्वज व राष्ट्रगीताचा आदर करावा.

(ख) स्वातंत्र्याच्या चळवळीला प्रेरणा देणाऱ्या आदर्शांचे पालन करावे.

(ग) देशाचे सार्वभौमत्व, एकता व अखंडत्व सुरक्षित ठेवण्यासाठी प्रयत्नशील असावे.

(घ) आपल्या देशाचे रक्षण करावे, देशाची सेवा करावी.

(ङ) सर्व प्रकारचे भेद विसरून एकोपा वाढवावा व बंधुत्वाची भावना जोपासावी. स्त्रियांच्या प्रतिष्ठेला कमीपणा आणतील अशा प्रथांचा त्याग करावा.

(च) आपल्या संमिश्र संस्कृतीच्या वारशाचे जतन करावे.

(छ) नैसर्गिक पर्यावरणाचे जतन करावे. सजीव प्राण्यांबद्दल दयाबुद्धी बाळगावी.

(ज) वैज्ञानिक दृष्टी, मानवतावाद आणि जिज्ञासूवृत्ती अंगी बाळगावी.

(झ) सार्वजनिक मालमत्तेचे जतन करावे. हिंसेचा त्याग करावा.

(ञ) देशाची उत्तरोत्तर प्रगती होण्यासाठी व्यक्तिगत व सामूहिक कार्यात उच्चत्वाची पातळी गाठण्याचा प्रयत्न करावा.

(ट) ६ ते १४ वयोगटातील आपल्या पाल्यांना पालकांनी शिक्षणाच्या संधी उपलब्ध करून द्याव्यात.

अभ्यास-२११६/(प्र.क्र.४३/१६) एसडी-४ दिनाङ्कः-२५.४.२०१६ इत्यमुं शासननिर्णयक्रमाङ्कम् अनुसृत्य स्थापितायाः समन्वयसमित्याः उपवेशने ३०.०१.२०२० दिने इदं पुस्तकम् २०२०-२१ इति शैक्षणिकवर्षतः अनुमानितम् ।

## द्वादशी कक्षा

# संस्कृतम्

# आह्लादः

**(मराठी, गुजराती, हिन्दी, इंग्रजी इत्यादीनां माध्यमानां कृते)**

**महाराष्ट्रराज्य-पाठ्यपुस्तक-निर्मितिः तथा अभ्यासक्रम-संशोधन-मण्डलम्, पुणे-४**

G5L8C9

'स्मार्टफोन' इति उपकरणेन 'दीक्षा ॲप' द्वारा पाठ्यपुस्तकस्य प्रथमपृष्ठे योजितेन Q. R. Code माध्यमेन (PDF) पाठ्यपुस्तकं द्रष्टुं शक्यते तथा पाठ्यपुस्तके योजितेन Q. R. Code साहाय्येन दृक्श्रव्य-अध्ययन-अध्यापनसाहित्यम् उपलभ्यते ।

**प्रथमावृत्तिः - २०२०**
**प्रथमं पुनर्मुद्रणम् - २०२१**
© महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलम्, पुणे - ४११ ००४.
अस्य पुस्तकस्य सर्वे अधिकाराः महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलस्य सन्ति। महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलस्य सञ्चालकस्य लिखित-अनुमतिं विना अस्य पुस्तकस्य कमपि भागम् उद्धृतं कर्तुं न शक्यते।

**संयोजनम् :**
**श्रीमती सविता अनिल वायळ**
विशेषाधिकारी, मराठी
पाठ्यपुस्तकमण्डलम्, पुणे.

**चित्रकार :**
फारुख नदाफ

**मुखपृष्ठम् :**
फारुख नदाफ

**अक्षरयोजनम् :**
भाषाविभागः
पाठ्यपुस्तकमण्डलम्, पुणे.

**निर्मिति :**
सच्चिदानन्द आफळे,
मुख्यनिर्मिति-अधिकारी
राजेन्द्र चिन्दरकर,
निर्मिति-अधिकारी
राजेंद्र पांडलोसकर
सहायक निर्मिति-अधिकारी

**कागदम् :**
70 GSM Creamwove

**मुद्रणादेश :**
N/PB/2021-22/0.07

**मुद्रक :**
M/s. Delight Printers, Pune

**संस्कृतभाषातज्ज्ञसमितिः**

पं. गुलाम दस्तगीर बिराजदार (अध्यक्षः)
डॉ. प्रज्ञा देशपाण्डे
श्रीमती तरङ्गिणी खोत
डॉ. प्रसाद भिडे
डॉ. मञ्जूषा गोखले
डॉ. शिवराम भट्ट
श्रीमती सविता अनिल वायळ (सदस्य-सचिव)

**संस्कृतभाषाभ्यासगणसदस्याः**

डॉ. ओङ्कार जोशी
श्रीमती मुग्धा रिसबुड
श्रीमती प्राची कुण्टे
श्री. मकरन्द दामले
डॉ. माधव केळकर
श्रीमती अदिती माधवन्
डॉ. अरुणा श्यामराज
डॉ. प्रसादशास्त्री कुलकर्णी
डॉ. अजय निलङ्गेकर
श्रीमती मैथिली पोतनीस
डॉ. लीना हुन्नरगीकर
श्रीमती श्वेता पवनीकर
श्रीमती धनश्री लेले
श्रीमती पल्लवी जोशी
श्रीमती ऋचा वैद्य
श्री. जगदीश इन्दलकर

**प्रकाशकः**
**विवेक उत्तम गोसावी**
**नियन्त्रकः**
पाठ्यपुस्तकनिर्मितिमण्डलम्,
प्रभादेवी, मुम्बई - २५.

**निमन्त्रितसदस्याः**

डॉ. ज्योत्स्ना खरे
श्री. सौरभ बोन्द्रे
श्री. राजेन्द्र दातार
श्री. कीर्तिञ्जय गोरे

# भारतस्य संविधानम्

## प्रस्तावना

वयं, भारतस्य जनाः, भारतं सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादिनं, सम्प्रदायनिरपेक्षं, लोकतन्त्रात्मकं गणराज्यं विधातुं, तस्य समस्तान् नागरिकांश्च

सामाजिकम्, आर्थिकं, राजनीतिकं च न्यायं,
विचारस्य, अभिव्यक्तेः, आस्थायाः, धर्मस्य,
उपासनायाश्च स्वतन्त्रतां,
प्रतिष्ठायाः, अवसरस्य च समतां प्रापयितुं;
तेषु सर्वेषु च
व्यक्तिगौरवस्य राष्ट्रस्य एकतायाः,
अखण्डतायाश्च सुनिश्चायिकां बन्धुतां
वर्धयितुं;

कृतदृढसङ्कल्पाः अस्याम् अस्मदीयायां संविधानसभायाम्

अद्य, ख्रिस्तीये १९४९ तमे वर्षे नवम्बरमासस्य २६-तमे दिने (२००६-तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ) एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्, आत्मार्पितं च कुर्महे ।

## राष्ट्रगीतम्

जनगणमन–अधिनायक जय हे
भारत–भाग्यविधाता ।
पंजाब, सिंधु, गुजरात, मराठा,
द्राविड, उत्कल, बंग,
विंध्य, हिमाचल, यमुना, गंगा,
उच्छल जलधितरंग,
तव शुभ नामे जागे, तव शुभ आशिस मागे,
गाहे तव जयगाथा,
जनगण मंगलदायक जय हे,
भारत–भाग्यविधाता ।
जय हे, जय हे, जय हे,
जय जय जय, जय हे ।।

## प्रतिज्ञा

भारतो मम देशोऽयं भारतीयाश्च बान्धवाः ।
परानुरक्तिरस्मिन् मे देशेऽस्ति मम सर्वदा ।।१।।

समृद्धा विविधाश्चास्य या देशस्य परम्पराः ।
सन्ति ताः प्रति मे नित्यमभिमानोन्नतं शिरः ।।२।।

प्रयतिष्ये सदा चाहमासादयितुमर्हताम् ।
येन तासां भविष्यामि श्रद्धायुक्तः पदानुगः ।।३।।

सम्मानयेयं पितरौ वयोज्येष्ठान् गुरूंस्तथा ।
सौजन्येनैव वर्तेय तथा सर्वैरहं सदा ।।४।।

स्वकीयेन हि देशेन स्वदेशीयैश्च बान्धवैः ।
एकान्तनिष्ठमाचारं प्रतिजाने हि सर्वथा ।।५।।

एतेषामेव कल्याणे समुत्कर्षे तथैव च ।
नूनं विनिहितं सर्वं सौख्यमात्यन्तिकं मम ।।६।।

# प्रस्तावना

आत्मीया: छात्रा:,

संस्कृतभाषाया: द्वादशकक्षाया: **'संस्कृत-आह्लाद:'** इत्येतद् नूतनं पाठ्यपुस्तकं युष्मभ्यम् उपाहर्तुम् आह्लादम् अनुभवाम: । अस्य पुस्तकस्य संस्कृतमाध्यमम् अस्मत्कृते पूर्वपरिचितम् एव । एकादशकक्षायां यत् संस्कृतभाषाकौशलम् अस्माभि: अधिगतं तस्य आधारेण द्वादशकक्षायां संस्कृताध्ययनं सुगमं भवेत् ।

एकादशकक्षायां भावमुद्रा: अधीता: । अधुना छात्रै: विधि-निषेधपरा: व्यावहारिकसूचना: अध्येतव्या: । तथैव पञ्चविषयान् अधिकृत्य व्यावहारिकशब्दस्तबका: अपि अध्येतव्या: । शब्दसङ्ग्रहसमृद्ध्या संस्कृतभाषा व्यवहारभाषा अपि अस्ति इति संस्कार: दृढ: भवेत् । एतस्य पुष्ट्यर्थम् अस्मिन् वर्षे अपि प्रतिदर्शं वृत्तपत्रम् अवलोकनार्थम् अत्र दीयते ।

भाषाशास्त्रम्, सुशासनम्, प्रसाधनानि इति युगानुकूला: विषया: पाठ्यक्रमे अन्तर्भूता: । संस्कृतच्छात्राणां कृते संस्कृताध्ययनस्य उपयोजनं कथं शक्यम् इति सूचितं साहित्यपरिचयान्तर्गत-भारतविद्यया । अत: भारतविद्यान्तर्गतविषया: मुखपृष्ठे पदं कृतवन्त: ।

'नाट्यकलश:' इति अस्य पाठ्यपुस्तकस्य प्रमुखम् आकर्षणम् । नाटकानि नाम संस्कृतभाषाया: वैभवम् । प्राचीनं तथा आधुनिकं नाट्यवाङ्मयम् अत्र आस्वादनीयम् । नाट्यकलशे पुत्रसङ्गम: इति मध्यवर्तिकल्पनाम् अनुसृत्य त्रय: नाट्यांशा: प्रस्तुता: । अत: मलपृष्ठे नटराजसहितं संस्कृतनाट्यप्रकारा: प्रदर्शिता: । व्याकरणे तद्धितान्ता: तथा कृदन्ता: एतयो: शब्दप्रकारयो: पुनरभ्यास: कारित: । प्रतिपाठं दत्तै: विस्तृतै: भाषाभ्यासै: अधीतस्य दृढीकरणं भवेत् । पाठ्यपुस्तके लक्षिता: उपक्रमा: ज्ञानवृद्धिकरा: । पाठ्यपुस्तकेन सहैव अस्माकम् अभ्यासमण्डलसदस्यै: अध्ययनार्थम् उपयुक्तं दृक्-श्रव्य-साहित्यं निर्मीयते । तच्च Q. R. Code माध्यमेन योज्यते । छात्रै: तस्य उपयोग: अवश्यं करणीय: ।

संस्कृतवाङ्मयस्य विशेषरूपा: नैके विषया: अस्मिन् पाठ्यपुस्तके स्पृष्टा: । संस्कृतभाषाया: द्वे रूपे अत्र चकास्त: नाम साहित्यभाषा ज्ञानभाषा च । अनेन पाठ्यपुस्तकेन सर्वे छात्रा: संस्कृतवाग्विशेषान् अवगच्छन्तु अभिजातसंस्कृतसाहित्यं च आस्वादयन्तु । येन तेषु संस्कृताध्ययनरुचि: वर्धेत इति आशास्महे ।

**(विवेक गोसावी)**
सञ्चालक:
महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मिति: तथा
अभ्यासक्रमसंशोधनमण्डलम्, पुणे.

पुणे
दिनाङ्क: - २१ फेब्रुवारी, २०२०
भारतीयसौरदिनाङ्क: - २ फाल्गुन, १९४१

# संस्कृतम् ।

## द्वादशकक्षा-छात्राणां संस्कृतभाषाविषये क्षमताविधानानि ।

| क्षेत्रम् | क्षमताविधानानि |
|---|---|
| **श्रवणम्** | • संस्कृतमाध्यमे निर्मितस्य अपठितस्य ध्वनिमुद्रणस्य श्रवणं, संस्कृतस्य वर्णोच्चारवैशिष्ट्यानां सम्यक् ग्रहणम् ।<br>• वर्गे संस्कृतभाषया प्रदत्तानां सूचनानां विनायासं ग्रहणम् ।<br>• अपूर्वश्रुतानां संस्कृतसूक्तीनां स्तोत्राणां च नियतं श्रवणं ग्रहणं च ।<br>• दृक्श्रव्य-संस्कृतवार्तापत्रस्य नित्यश्रवणं सम्यक् अवग्रहणं च । |
| **भाषणम्** | • वर्गे संस्कृतशिक्षकैः सह संस्कृतेन सरलं सम्भाषणं, नूतनशब्दानां प्रयोगः च ।<br>• संस्कृतकाव्यनाट्यादिषु सूक्तीनां नित्यसम्भाषणे उद्धरणम् ।<br>• संस्कृतभाषया नाटकादिषु संवादानाम् उद्धरणम् । |
| **पठनम्** | • संस्कृतपाठानां वर्णोच्चारणवैशिष्ट्यानि अनुसृत्य उच्चैः पठनम् ।<br>• संस्कृतकाव्यस्तोत्रादीनां नियतं पठनम् ।<br>• संस्कृतनाट्यांशानां साभिनयं वाचनम् ।<br>• आधुनिकसंस्कृतनाट्यांशानां वाचनम् ।<br>• मूलसंस्कृतग्रन्थेभ्यः पाठ्येतराणां पाठ्यांशानां पठनम् । |
| **लेखनम्** | • माध्यमभाषया संस्कृतपाठस्य विस्तृतं विवरणम् ।<br>• माध्यमभाषया संस्कृतनाट्यकथायाः रसग्रहणम् ।<br>• संवादलेखनं, प्रसङ्गवर्णनम् इत्यादिषु लेखनप्रकारेषु संस्कृतभाषया अभिव्यक्तिः ।<br>• संस्कृतभाषायाः अन्यभाषासु अनुवादस्य अधिकः अभ्यासः । |
| **अध्ययनम्** | • द्वैभाषिकशब्दकोषस्य तथा धातुकोषः, अमरकोषः इत्यादीनां विशेषसंस्कृतकोषाणाम् उपयोगः।<br>• अन्तरजाले उपलब्धानाम् अध्ययनसाधनां सातत्येन उपयोजनम् ।<br>• चलभाषे उपलब्धानां भाषाभ्यासस्य संसाधनानाम् उपयोजनम् । |
| **भाषाभ्यासः** | • 'सति सप्तमी' इति संस्कृतभाषायाः वाक्यरचनाविशेषस्य परिचयः अवगमनं च ।<br>• संस्कृतनाट्यवाङ्मयस्य कालानुक्रमेण परिचयः ।<br>• आधुनिकसंस्कृतनाट्यस्य परिचयः अभिजातनाट्यवाङ्मयं तथा आधुनिकसंस्कृतनाटकम् अनयोः भेदस्य अवगमनम् ।<br>• भारतविद्यायाः परिचयः । |

# अनुक्रमणिका


## प्रथममण्डलम्

✲ सुगमसंस्कृतम् ।

१. व्यावहारिक-सूचना: । १

२. व्यावहारिकशब्दस्तबक: । ३

## द्वितीयमण्डलम्

✲ पद्यम् ।

१. क्षणं मनोविनोदनम् । ५

२. उत्सवप्रिया देवभूमि: । १०

३. मोदं वितनोतु संवाद: । १८

४. भावेन भाव:, क्रियया क्रिया । २५

५. हनुमत्-प्लुति: । ३१

## तृतीयमण्डलम्

✲ गद्यम् ।

१. भाषासंवाद: । ३९

२. प्राचीनकाले प्रसाधनम् । ४६

३. प्रजापालनार्थं राजकर्तव्यानि । ५४

## चतुर्थमण्डलम्

✲ साहित्यपरिचय: ।

- भारतविद्या । ६०
- नाट्यविशेष: । ६१

## पञ्चममण्डलम्

✲ नाट्यकलश: ।

१. भीमघटोत्कचयो: ।

२. दुष्यन्तसर्वदमनयो: ।

३. रामस्य कुशलवयो: च ।

} पुत्रसङ्गम: ६८-८७

४. भगवदज्जुकीयम्-प्रहसनम् । ८८

५. लोकरञ्जकं लोकनाट्यम् । ९४

## षष्ठमण्डलम्

✲ लेखनकौशलम् ।

१. चित्रपटवर्णनम् । १०१

२. वृत्तान्तलेखनम् । १०५

## सप्तममण्डलम्

✲ परिशिष्टम् ।

- नाम । ११०
- समास: । ११२
- कृदन्ता: । ११५
- तद्धितान्ता: । ११६
- अमरकोष: । ११७
- सूचनानुसारं परिवर्तनम् । ११८

# प्रार्थना ।



ॐ भद्रं कर्णेभि: शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा: ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायु: ।।
ॐ शान्ति: शान्ति: शान्ति: ।।

ॐ भूर्भुव: स्व: तत्सवितुर्वरेण्यं
भर्गो देवस्य धीमहि ।
धियो यो न: प्रचोदयात् ।।



ॐ विश्वानि देव सवितर्दुरितानि परासुव ।
यद् भद्रं तन्न आ सुव ।।



ॐ असतो मा सद् गमय
तमसो मा ज्योतिर्गमय ।
मृत्योर्माऽमृतं गमय ।।
ॐ शान्ति: शान्ति: शान्ति: ।।

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा: मा गृध: कस्यस्विद्धनम् ।।

# १. व्यावहारिक-सूचनाः ।


पाठशाला अग्रे ।


गतिरोधकः अग्रे ।


एकदिशया गन्तव्यम् ।


प्रवेशः निषिद्धः ।


सङ्कुचितमार्गः अग्रे ।


दक्षिणवलन-निषेधः ।


दक्षिणवलनम् अग्रे ।


विरमत ।


तीव्रः अवरोहः ।


तीव्रः आरोहः ।


पादचारि-पारगमनम् ।


चक्रासन्दमार्गः ।


निवर्तननिषेधः ।


अवधानं दत्त ।


यानस्थापननिषेधः ।



ऊर्जां संरक्षत ।



पादरक्षे निष्कासयत ।



खाद्यपेय-निषेधः ।



चलभाष-निषेधः ।



धूम्रपान-निषेधः ।



ध्वनिक्षेपक-निषेधः ।



निष्ठीवन-निषेधः ।



अवकरम् अवकरपात्रे क्षिपत ।



आवल्यां तिष्ठत ।



सङ्कटम्/अत्याहितम् ।



स्पर्शः निषिद्धः ।



नुदत ।



आकर्षत ।



आपत्कालीनमार्गः ।



जलं संरक्षत ।

# २. व्यावहारिकशब्दस्तबकः ।

## प्रथमः स्तबकः – वाद्यम् ।

किङ्किणी (Small-bells)
वीणा (Lute)
शततन्त्री (Santoor)
वेणुः (Flute)
संवादिनी (Harmonium)
तूर्यम् (Trumpet, तुतारी)
तालः (Cymbal, टाळ)
पणवः (Small drum)
ढक्का (Double drum)
भेरी (Kettle drum)

## द्वितीयः स्तबकः – नाट्यम् ।

संहिता (Script)
उत्कर्षबिन्दुः (Climax)
नृत्यनाट्यम् (Ballet)
गीतिनाट्यम् (Opera)
रङ्गसूचना (Stage-directions)
कथावस्तु (Plot)
मञ्चसज्जा (Stage-design)
रङ्गशाला (Theatre)
सूत्रधारः (Stage-director)
नेपथ्यगृहम् (Greenroom)

## तृतीयः स्तबकः – क्रीडा ।

चतुरङ्गः (Chess)
मोक्षपटः (Snake and Ladder)
कन्दुकक्रीडा (Playing with ball)
मल्लक्रीडा (Wrestling)
यूपक्रीडा (मल्लखांब)
अक्षक्रीडा (Games with dice)
अश्वारोहणम् (Horse-riding)
लक्ष्यवेधनम् (Archery)
जलतरणम् (Swimming)
नौकानयनम् (Rowing)

## चतुर्थः स्तबकः – शिक्षणम् ।

अधिष्ठाता (Dean)
स्नातकपदवी (Degree of Graduation)
विद्वत्सभा (Senate)
ज्ञानरचनावादः (Constructivism)
शिष्यवृत्तिः (Scholarship)
मूल्याङ्कनम् (Assessment)
प्राच्यविद्या (Oriental studies)
दूरस्थ-शिक्षणम् (Distance learning)
स्वायत्तता (Autonomy)
शोध-निबन्धः (Research Paper)


## पञ्चमः स्तबकः – कला ।

मालाग्रन्थविकल्पः (Garland making)
कर्णपत्रभङ्गः (Making floral earings)
इन्द्रजालम् (Magic)
हस्तलाघवम् (Jugglery)
सूपकर्म (Cooking)
तक्षणम् (Wood carving)
शुकसारिकाप्रलापनम् (Training birds to talk)
अक्षरमुष्टिकाकथनम् (Dumb charades)
सूत्रकर्म (Embroidery and mending clothes)
तुर्ककर्म (Spinning yarn)

### ✻ पुनःस्मारणम् । ✻

| अ. क्र. | संस्कृतम् | मराठी | English |
|---|---|---|---|
| १ | लट् | वर्तमानकाळ | Present Tense |
| २ | लङ् | अनद्यतन भूतकाळ (प्रथम भूतकाळ) | Imperfect Past |
| ३ | लोट् | आज्ञार्थ | Imperative |
| ४ | विधिलिङ् | विध्यर्थ | Potential Mood |
| ५ | लृट् | द्वितीय भविष्यकाळ | Second Future |
| ६ | लिट् | परोक्षभूतकाळ | Perfect Past |
| ७ | क्त | कर्मणि भूतकालवाचक धातुसाधित विशेषण | Past Passive Participle |
| ८ | क्तवत् | कर्तरि भूतकालवाचक धातुसाधित विशेषण | Past Active Participle |
| ९ | शतृ-शानच् | कर्तरि वर्तमानकालवाचक धातुसाधित विशेषण | Present Active Participle |
| १० | कृत्यप्रत्ययः | कर्मणि विध्यर्थ धातुसाधित विशेषण | Potential Passive Participle |

**भूमिका –** सुभाषितं नाम सुष्ठु भाषितम् । परं न केवलं सुष्ठु भाषितम् अपि तु विनोदनमपि सुभाषितेषु विद्यते। विनोदनं नाम मनोरञ्जनम् । प्राचीने वाङ्मये विकीर्णानि विनोदनप्रधानानि सुभाषितानि अत्र सङ्गृहीतानि। एतानि सुभाषितानि विभिन्नप्रकारैः हास्यं जनयन्ति । कुत्रचित् परिहासः कुत्रचित् उपहासः । श्लेषस्य तथा सूचितार्थस्य योजनापि क्रियते ।



उष्ट्राणां च विवाहेषु गीतं गायन्ति गर्दभाः ।
परस्परं प्रशंसन्ति ''अहो रूपम्!'' ''अहो ध्वनिः!'' ।।१।।
(अनुष्टुप्)

तृणाल्लघुतरस्तूलस्तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति ।।२।।
(अनुष्टुप्)

भो दारिद्र्य नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः ।
पश्याम्यहं जगत्सर्वं न मां पश्यति कश्चन ।।३।।
(अनुष्टुप्)

अद्यापि दुर्निवारं स्तुतिकन्या वहति कौमारम् ।
सद्भ्यो न रोचते साऽसन्तोऽप्यस्यै न रोचन्ते ।।४।।
(आर्या)

द्वन्द्वोऽहं द्विगुरप्यहं मद्गेहे नित्यमव्ययीभावः ।
तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः ।।५।।

(आर्या)

चतुरः सखि मे भर्ता यल्लिखति तत्परो न वाचयति ।
तस्मादप्यधिको मे स्वयमपि लिखितं स्वयं न वाचयति ।।६।।

(आर्या)

वासः प्रधानं खलु योग्यताया वासोविहीनं विजहाति लक्ष्मीः ।
पीताम्बरं वीक्ष्य ददौ स्वकन्यां दिगम्बरं वीक्ष्य विषं समुद्रः ।।७।।

(उपजातिः)

## अन्वयः ।

१) उष्ट्राणां विवाहेषु गर्दभाः गीतं गायन्ति ।
''अहो रूपम्,'' ''अहो ध्वनिः!'' इति (ते) परस्परं प्रशंसन्ति ।

२) तृणात् लघुतरः तूलः, तूलात् अपि (लघुतरः) याचकः । (तर्हि) वायुना असौ (याचकः) किं न नीतः? अयं माम् (अपि) प्रार्थयेत् इति ।

३) (दरिद्रः कविः वदति) भो दारिद्र्य! तुभ्यं नमः । अहं त्वत्प्रसादतः सिद्धः (जातः) । (यत्) अहं सर्वं जगत् पश्यामि (किन्तु) कश्चन मां न पश्यति ।

४) स्तुतिकन्या अद्यापि दुर्निवारं कौमारं वहति । (यतः) सा सद्भ्यः न रोचते । अस्यै अपि असन्तः न रोचन्ते ।

५) हे पुरुष (राजन्), अहं द्वन्द्वः (आवां द्वौ स्वः, पतिः च पत्नी च), अहं द्विगुः (केवलं गोद्वयस्य स्वामी) अपि । (किन्तु) मम गेहे नित्यम् अव्ययीभावः (व्ययाय धनं न विद्यते) । तत् (तस्माद्) (मे किमपि) कर्म धारय (देहि), येन अहं बहुव्रीहिः स्याम् (मम समीपे प्रभूतं धान्यं भवेत्) ।

६) प्रथमा- सखि, मे भर्ता चतुरः, सः यत् लिखति तत् परः न वाचयति ।
द्वितीया- तस्मात् अपि अधिकः मे (भर्ता), (यत्) स्वयं लिखितं स्वयम् अपि न वाचयति ।

७) योग्यतायाः (अपेक्षया) वासः (वस्त्रं) प्रधानं खलु? लक्ष्मीः (अपि) वासोविहीनं विजहाति । समुद्रः पीताम्बरं वीक्ष्य (तस्मै) स्वकन्यां ददौ, दिगम्बरं (च) वीक्ष्य (तस्मै) विषं (ददौ) ।

## वाग्विशेषः ।

**श्लोकः २.** प्रार्थयेदिति- प्रार्थयेत् + इति । प्र + अर्थ् इति १० आ.प. धातुः । तस्य 'प्रार्थयेत' इति व्याकरणदृष्ट्या उचितं रूपम् । श्लोके प्रयुक्तं 'प्रार्थयेत्' इति परस्मैपदीयं रूपं वृत्तसौकर्यार्थम् इति अवधेयम् ।

**श्लोकः ३.** अस्मिन् श्लोके व्याजस्तुतिः विद्यते । व्याजस्तुतिः नाम सरलार्थेन स्तुतिः वर्तते परम् अन्यार्थेन निन्दा सूचिता।

**श्लोकः ५.** द्वन्द्वः, द्विगुः, अव्ययीभावः, तत्पुरुषः, कर्मधारयः, बहुव्रीहिः एते सन्ति समासप्रकाराः । समासनामानि श्लेषार्थेन प्रयुज्य कश्चन दरिद्रः कविः चातुर्येण राजानं वृत्तिं याचते ।

**श्लोकः ७.** समुद्रः पीतम् अम्बरं (वस्त्रं) वीक्ष्य पीताम्बराय (पीतम् अम्बरं यस्य सः) तस्मै विष्णवे स्वकन्यां लक्ष्मीं ददौ । दिग् एव अम्बरं वीक्ष्य दिगम्बराय (दिग् एव अम्बरं यस्य सः) तस्मै शङ्कराय विषं ददौ।

## शब्दार्थः ।

१) तूलः – कार्पासविशेषः ।
२) कौमारं वहति – अविवाहिता अस्ति ।
३) वासः – वसनम्, वस्त्रम्, परिधानम् ।
४) वाचयति – पठति ।

## सन्धिविग्रहः ।

१) नीतोऽसौ = नीतः + असौ ।
२) पश्याम्यहम् = पश्यामि + अहम् ।
३) साऽसन्तोऽप्यस्यै = सा + असन्तः + अपि + अस्यै ।
४) द्विगुरप्यहम् = द्विगुः + अपि + अहम् ।
५) यल्लिखति = यत् + लिखति ।

## समासविग्रहः ।

१) मनोविनोदनम् – मनसः विनोदनम् । षष्ठी-तत्पुरुषः ।
२) स्तुतिकन्या – स्तुतिः एव कन्या । कर्मधारयः ।
३) असन्तः – न सन्तः । नञ्-तत्पुरुषः ।
४) पीताम्बरम् – पीतम् अम्बरम् । कर्मधारयः ।
पीतम् अम्बरं यस्य सः, तम् । बहुव्रीहिः ।

## रूपपरिचयः ।

१) असौ – अदस् सर्वनाम, पुंलिङ्गम्, स्त्रीलिङ्गम्, प्रथमा एकवचनम् ।
२) वाचयति – वच्-वाच् (१० उ.प. अत्र प.प.), लट्, प्रथमपुरुषः, एकवचनम् ।
३) वीक्ष्य – वि + ईक्ष् (१ आ.प.), पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययम् ।
४) विजहाति – वि + हा (३ उ.प. अत्र प.प.), लट्, प्रथमपुरुषः, एकवचनम् ।
५) वासः – वासस्, सकारान्तम्, नपुंसकलिङ्गम्, प्रथमा, द्वितीया एकवचनम् ।

## भाषाभ्यासः ।

### १. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।

१) वायुना किं न नीतोऽसौ ।
२) भो दारिद्र्य नमस्तुभ्यम् ।
३) येनाहं स्यां बहुव्रीहिः ।
४) पीताम्बरं वीक्ष्य ददौ स्वकन्याम् ।

### २. उचितं कारणं चित्वा वाक्यानि पुनर्लिखत ।

**१) वायुना याचकः न नीयते, यतः .....।**

अ) याचकः वायुना सह गन्तुं न इच्छति ।
ब) याचकः वायुं किमपि याचेत इति वायुः बिभेति ।

**२) कविः दारिद्र्यं नमति, यतः .....।**

अ) दारिद्र्यं नाम काचिद् देवता ।
ब) दारिद्र्यात् सः सिद्धः जातः ।

**३) स्तुतिकन्या असतः न विवहति, यतः .....।**

अ) स्तुतिकन्यायै असन्तः न रोचन्ते ।

ब) स्तुतिकन्यायै विवाहः एव न रोचते ।

**४) समुद्रः पीताम्बराय विष्णवे स्वकन्यां ददौ, यतः .....।**

अ) पीताम्बरं विष्णोः धनसम्पन्नतां सूचयति ।

ब) समुद्राय पीतवर्णः अतीव रोचते ।

**५) सखी स्वपतिं चतुरतरं मन्यते, यतः .....।**

अ) सः स्वयं लिखति तत्परो न वाचयति ।

ब) सः स्वयं लिखति स्वयं न वाचयति ।

## ३. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

**१) उष्ट्राणां विवाहेषु – .............. ।**

अ) गर्दभाः रूपं प्रशंसन्ति ।

ब) गर्दभाः ध्वनिं प्रशंसन्ति ।

## ४. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

१) वायुना असौ न नीतः – ☐

२) सद्भ्यः एषा न रोचते – ☐

३) समुद्रेण पीताम्बरं वीक्ष्य दत्ता – ☐

४) उष्ट्राणां गर्दभविषये प्रशंसोद्गाराः – ☐

## ५. पूर्णवाक्येन उत्तरं लिखत ।

१) दरिद्रः कविः किं पश्यति ?

२) तूलादपि कः लघुः ?

३) केषां विवाहेषु गर्दभाः गीतं गायन्ति ?

४) का कौमारं वहति ?

५) प्रथमायाः सख्याः भर्ता कीदृशः ?

६) समुद्रः दिगम्बरं वीक्ष्य किं ददौ ?

## ६. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।

१) याचकात् तूलः लघुतरः अस्ति ।

२) कविः दारिद्र्यस्य प्रसादात् सिद्धः जातः ।

३) गर्दभानां विवाहेषु उष्ट्राः गीतं गायन्ति ।

४) स्तुतिकन्यायै सन्तः न रोचन्ते ।

## ७. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।

१) <u>तृणात्</u> तूलः लघुः ।

२) <u>गर्दभाः</u> उष्ट्राणां विवाहेषु गीतं गायन्ति ।

३) स्तुतिः <u>सद्भ्यः</u> न रोचते ।

४) लक्ष्मी: वासोविहीनं विजहाति ।

**८. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) नम: तुभ्यम् । (दारिद्र्य)
२) वायुना न नीत: असौ । (याचक)
३) असन्त: अस्यै न रोचन्ते । (स्तुतिकन्या)
४) लक्ष्मी: वासोविहीनं विजहाति । (एतद्)

**९. पद्यांशात् विशेषणं चिनुत ।**


तूल:, भर्ता, कौमारम्, वास:

**१०. सन्धितालिकां पूरयत ।**


१) यल्लिखति = ........+......... ।
२) पश्याम्यहम् = पश्यामि +......... ।
३) ............= सा + असन्त: + अपि ।

**११. पृथक्करणं कुरुत ।**

**१) जालरेखाचित्रं पूरयत ।**




**२)**




**उपक्रम: –**

१) विनोदपराणि अन्यानि सुभाषितानि अन्विष्यत ।
२) सुभाषितानि संवादरूपेण लिखत ।
३) सुभाषितानि कण्ठस्थीकुरुत ।

***

# द्वितीयः पाठः । उत्सवप्रिया देवभूमिः ।

**भूमिका –** महाकविः पण्डितः वसन्त शेवडेमहोदयः (१९१७-१९९९) अर्वाचीनसंस्कृतक्षेत्रस्य अपूर्वं भूषणम् । उत्तरप्रदेशस्य संस्कृत-अकादम्या एषः विदर्भपुत्रः 'अपरकालिदासः' इति सर्वोच्चपुरस्कारेण सभाजितः। संस्कृतनिपुणः कविवरेण्यः अयं नैकानि काव्यानि रचितवान्। वैदर्भीं रीतिमवलम्ब्य निबद्धानि कवेः काव्यानि सहृदयहृदयानि आह्लादयन्ति ।

महाभागः एषः षोडशसर्गात्मकं 'श्रीदेवदेवेश्वरमहाकाव्यं' रचितवान्। पुण्यपत्तने पर्वतीस्थं पेशवेकालीनं श्रीदेवदेवेश्वरमन्दिरं विख्यातम् । तस्य निर्माणमाश्रित्य विरचितम् एतद् ऐतिहासिकं महाकाव्यम् । अस्मिन् पद्यपाठे छत्रपतिशिवरायादारभ्य पेशवाकुलोत्पन्न-बालाजि-बाजीरावपर्यन्तं महाराष्ट्रस्य इतिहासः वर्णितः । तत्र 'महाराष्ट्रवर्णनम्' इति प्रथमः सर्गः, तस्मिन् महाकविः साभिमानं महाराष्ट्रं वर्णितवान् ।

षोडशशतके महाराष्ट्रे ये देवताविशेषाः तथा उत्सवविशेषाः प्रचलिताः, तेषां सरलं रोचकं वर्णनम् अस्मिन् पद्यांशे वर्तते । वृत्तम् - उपजातिः ।

**गुणोत्तरो दक्षिणदिक्स्थितोऽपि सह्याश्रितोऽपि द्विषतामसह्यः ।**
**वर्वर्ति सर्वर्तुषु रम्यरूपो देशो महाराष्ट्रमिति प्रसिद्धः ।।१।।**

**गोदावरीरोधसि रामचन्द्रः समाश्रयन् पञ्चवटीं मनोज्ञाम् ।**
**उवास वन्यामवलम्ब्य वृत्तिं सहानुजो यत्र सुखं सदारः ।।२।।**

**तिष्ठन्मयूरेशपुरे गणेशः क्लेशानशेषानपि यत्र हन्ति ।**
**प्रस्तूयते प्रेमपुरे प्रमोदान्मल्लारिपूजासु च येलकोटः ।।३।।**

**विन्यस्तहस्तः स्वनितम्बबिम्बे कल्पद्रुमो भक्तमनोरथानाम् ।**
**तिष्ठत्यपास्य श्रममिष्टकायामनादिकालादिह पाण्डुरङ्गः ।।४।।**

**भक्तव्रजस्तालमृदङ्गनादैर्गर्जन्मुहुर्विट्ठल-विट्ठलेति ।**
**आषाढमासे प्रतिवर्षमत्र क्षेत्रं समागच्छति पौण्डरीकम् ।।५।।**

**स्नातुं पवित्राम्भसि कृष्णवेण्या द्रष्टुं पदाब्जद्वयमत्रिसूनोः ।**
**अजस्रमागच्छति दूरदूरान्नृसिंहवाटीमिह यात्रिवर्गः ।।६।।**

**श्रीत्र्यम्बकेशो घुसृणेश्वरो वा यत्र क्वचिद् क्षेत्रमहाबलेशः ।**
**भीमाश्रयः शङ्करनामधेयः क्वचिच्छिवो राजति वैद्यनाथः ।।७।।**

**महालसाख्यां क्वचिदादधाति यत्र क्वचिद्विन्दति रेणुकाख्याम् ।**
**लक्ष्मीस्वरूपा क्वचिदादिशक्तिः क्वचिद् भवानी तुलजापुरस्था ।।८।।**



**संवत्सरारम्भदिने प्रभाते सर्वे ध्वजारोपणमाद्रियन्ते ।**
**वितन्वते यत्र जनाः प्रमोदाद्दोलोत्सवं सद्मनि चैत्रगौर्याः ।।९।।**

**पक्षे सिते भाद्रपदे च मासे गृहे गृहे यत्र तिथौ चतुर्थ्याम् ।**
**प्रवर्तते मृण्मयमूर्तिपूजामहोत्सवः सिद्धिविनायकस्य ।।१०।।**

**निर्वर्त्य पूजाविधिमायुधानां नीराजनं वाजिविभूषणं च ।**
**व्रजन्ति सायं विजयादशम्यां सीमानमुल्लङ्घितुमत्र लोकाः ।।११।।**

**वृषोत्सवः श्रावणमासि यत्र कोजागरी शारदपौर्णिमायाम् ।**
**सम्पद्यमानस्त्रिपुरस्य दाहो विशिष्यते कार्तिकपौर्णमास्याम् ।।१२।।**

## अन्वयः ।

१) दक्षिणदिक्स्थितः अपि गुणोत्तरः, सह्याश्रितः अपि द्विषताम् असह्यः सर्वर्तुषु रम्यरूपः देशः 'महाराष्ट्रम्' इति प्रसिद्धः वर्वर्ति ।

२) यत्र गोदावरीरोधसि मनोज्ञां पञ्चवटीं समाश्रयन् सहानुजः सदारः रामचन्द्रः वन्यां वृत्तिम् अवलम्ब्य सुखम् उवास ।

३) यत्र मयूरेशपुरे तिष्ठन् गणेशः अशेषान् क्लेशान् अपि हन्ति । (यत्र) च प्रेमपुरे मल्लारिपूजासु प्रमोदात् येलकोटः प्रस्तूयते ।

४) श्रमम् अपास्य स्वनितम्बबिम्बे विन्यस्तहस्तः भक्तमनोरथानां कल्पद्रुमः पाण्डुरङ्गः अनादिकालात् इह इष्टकायां तिष्ठति ।

५) अत्र प्रतिवर्षम् आषाढमासे तालमृदङ्गनादैः 'विठ्ठल-विठ्ठल' इति मुहुः गर्जन् भक्तव्रजः पौण्डरीकं क्षेत्रं समागच्छति ।

६) इह कृष्णवेण्याः पवित्र-अम्भसि स्नातुम् अत्रिसूनोः पदाब्जद्वयं द्रष्टुं (च) नृसिंहवाटीं दूरदूरात् यात्रिवर्गः अजस्रम् आगच्छति ।

७) यत्र क्वचित् त्र्यम्बकेशः (वा) घुसृणेश्वरः (वा) क्षेत्रमहाबलेशः (वा) भीमाश्रयः शङ्करनामधेयः (वा) क्वचित् वैद्यनाथः शिवः (वा) राजति ।

८) यत्र आदिशक्तिः क्वचित् लक्ष्मीस्वरूपा, क्वचित् तुलजापुरस्था भवानी, क्वचित् महालसाख्याम् आदधाति, क्वचित् रेणुकाख्यां विन्दति ।

९) यत्र सर्वे जनाः संवत्सर-आरम्भदिने प्रभाते सद्मनि ध्वजारोपणम् आद्रियन्ते, प्रमोदात् चैत्रगौर्याः दोलोत्सवं (च) वितन्वते ।

१०) यत्र भाद्रपदे मासे सिते पक्षे चतुर्थ्यां तिथौ च सिद्धिविनायकस्य मृण्मयमूर्तिपूजामहोत्सवः गृहे गृहे प्रवर्तते ।

११) अत्र लोकाः पूजाविधिम्, आयुधानां नीराजनं वाजिविभूषणं च निर्वर्त्य विजयादशम्यां सायं सीमानम् उल्लङ्घितुं व्रजन्ति ।

१२) यत्र श्रावणमासि वृषोत्सवः, शारदपौर्णिमायां कोजागरी, कार्तिकपौर्णमास्यां सम्पद्यमानः त्रिपुरस्य दाहः विशिष्यते ।

## वाग्विशेषः ।

**श्लोकः १.** १) महाराष्ट्रदेशः यद्यपि **दक्षिण**दिशि तिष्ठति तथापि गुणैः **उत्तरः** (श्रेष्ठः) वर्तते ।
**'सह्य'** पर्वताश्रितः अपि महाराष्ट्रदेशः द्विषताम् (शत्रूणाम्) **असह्यः** वर्तते ।
परस्परविरोधं दर्शयता शब्दयुग्मेन महाराष्ट्रस्य गौरवम् आख्याति कविः । एतेन कवेः शब्दसौष्ठवं

कल्पनासौन्दर्यं च स्पष्टं भवति ।

२) वर्वर्ति- वृत्-वर्त् (१ आ.प.) 'यङ्लुक्' (पौन:पुन्यार्थक-रूपम्) इति विशिष्ट: व्याकरणप्रयोग: । '**अतिशयेन वर्तते**' इति अर्थ: ।

**श्लोक: २.** पञ्चवटी-नाशिकनगरस्य एक: विभाग:, दण्डकारण्यस्य एक: भाग: इति मन्यते । अत्र अगस्त्यमुने: आश्रमोऽस्ति । वनवासे रामलक्ष्मणसीता: अत्र न्यवसन् ।

**श्लोक: ३.** १) प्रेमपुरम्- त्रयोदशे शतके लिखिते 'मल्लारिमाहात्म्यम्' इति संस्कृत-मराठी ग्रन्थे मल्लारिदेवस्य द्वादश स्थानानि वर्णितानि । तेषु एकतमं 'प्रेमपुरम्' इति । एतस्य ग्रन्थस्य विषये 'श्री. रा. चिं. ढेरे' महोदयेन लिखिते 'खण्डोबा' इति समीक्षाग्रन्थे 'प्रेमपुरम्' इत्यस्य कृते त्रीणि स्थानानि निर्दिष्टानि ।

अ) उस्मानाबादस्थे नळदुर्गसमीपे 'अणदूर' इति ।

आ) साताराजनपदे 'पालीपेम्बर' इति ।

इ) कर्णाटकप्रान्ते बिदरनगरसमीपे 'आदिमैलार' इति ।

२) येलकोट:- 'येळु' नाम कर्णाटकभाषायां 'सप्त' (७) इति । 'कोट:' नाम मराठीभाषायां 'कोटि' सङ्ख्या इति ।

मल्लारिरायस्य सप्तकोटियुतं सैन्यम् आसीत् इति श्रूयते । तथा च सप्तवारं तेन शत्रुसैन्यं जितम् । अत: एव 'येळकोट येळकोट जय मल्हार' इति विजयघोषणा: प्रस्तूयन्ते भक्तै: ।

**श्लोक: ७.** भारतवर्षे द्वादश ज्योतिर्लिङ्गानि प्रसिद्धानि । यथा-

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोंकारममलेश्वरम् ।।
परल्यां **वैद्यनाथं** च डाकिन्यां **भीमशङ्करम्** ।
सेतुबन्धे तु रामेशं **नागेशं** दारुकावने ।।
वाराणस्यां तु विश्वेशं **त्र्यम्बकं** गौतमीतटे ।
हिमालये तु केदारं **घृष्णेशं** च शिवालये ।।
एतानि ज्योतिर्लिङ्गानि सायं प्रात: पठेन्नर: ।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ।।

तेषु महाराष्ट्रे पञ्च वर्तन्ते । तेषु चतुर्णां स्थानानां निर्देश: पाठेऽस्मिन् वर्तते ।

**श्लोक: ८.** आदिमायाया: ३ $\frac{१}{२}$ शक्तिपीठानि भक्तजनेषु परमश्रद्धास्थानानि । तेषु त्रयाणां निर्देश: अस्मिन् पाठे वर्तते । एतानि पूर्णपीठानि -

१) कोल्हापुरस्था - महालक्ष्मी: ।

२) माहुरगडस्थिता - रेणुकादेवी ।

३) तुळजापुरस्था - भवानी ।

वणीदेशीया सप्तशृङ्गीदेव्या: अर्धपीठस्य निर्देश: तु अस्मिन् काव्ये नास्ति । तथा च महालसादेव्या: स्थानं महाराष्ट्रे नेवासे इत्यत्र वर्तते ।

## शब्दार्थः ।

१) द्विषत् – शत्रुः, अरिः, रिपुः ।
२) रोधः – (रोधस्, नपुंसकलिङ्गम्) तटः, तीरम् ।
३) वन्यावृत्तिः – वनवासः ।
४) सदारः – पत्नीसहितः । ('दार' अकारान्तम्, पुंलिङ्गम् । नित्यबहुवचनम् ।)
५) क्लेशः – कष्टम् ।
६) कल्पद्रुमः – कल्पवृक्षः ।
७) इष्टका – इष्टिका । ('वीट'/Brick)
८) पौण्डरीकं क्षेत्रम् – पण्ढरपुरम् ।
९) अम्भः – (अम्भस्, नपुंसकलिङ्गम्) जलम्, नीरम्, तोयम् ।
१०) कृष्णवेणी – कृष्णानदी ।
११) अब्जम् – कमलम्, नीरजम् ।
१२) अत्रिसूनुः – अत्रिपुत्रः, दत्तात्रेयः ।
१३) अजस्रम् – सततम्, निरन्तरम् ।
१४) भक्तव्रजः – भक्तसमूहः । (वारकरी)
१५) सितपक्षः – शुक्लपक्षः ।
१६) मृण्मयमूर्तिः – मृत्तिकानिर्मिता मूर्तिः ।
१७) वृषोत्सवः – वृषभपूजा । (बैलपोळा)
१८) कार्तिकपौर्णमास्याम् – कार्तिकपौर्णिमायाम् । (पौर्णमासी = पौर्णिमा ।)

## सन्धिविग्रहः ।

१) दक्षिणदिक्स्थितोऽपि = दक्षिणदिक्स्थितः + अपि ।
२) तिष्ठत्यपास्य = तिष्ठति + अपास्य ।
३) क्वचिच्छिवः = क्वचित् + शिवः ।
४) प्रमोदाद्दोलोत्सवम् = प्रमोदात् + दोलोत्सवम् ।
५) भक्तव्रजस्तालमृदङ्गनादैर्गर्जन्मुहुर्विठ्ठल-विठ्ठलेति = भक्तव्रजः + तालमृदङ्गनादैः + गर्जन् + मुहुः + विठ्ठल-विठ्ठल + इति ।

## समासविग्रहः ।

१) गुणोत्तरः – गुणैः उत्तरः । तृतीया-तत्पुरुषः ।
२) सह्याश्रितः – सह्यम् आश्रितः । द्वितीया-तत्पुरुषः ।
३) सर्वर्तुषु – सर्वे ऋतवः, तेषु । कर्मधारयः ।
४) गोदावरीरोधसि – गोदावर्याः रोधः, तस्मिन् । षष्ठी-तत्पुरुषः ।
५) पञ्चवटीम् – पञ्चानां वटानां समाहारः, ताम् । द्विगुः ।
६) सहानुजः – अनुजेन सह । सह-बहुव्रीहिः ।
७) सदारः – दारैः सह । सह-बहुव्रीहिः ।
८) विन्यस्तहस्तः – विन्यस्तौ हस्तौ येन सः । बहुव्रीहिः ।

९) पवित्राम्भसि - पवित्रम् अम्भः, तस्मिन् । कर्मधारयः ।
१०) महालसाख्याम् - महालसा इति आख्या यस्याः सा, ताम् । बहुव्रीहिः ।
११) तुलजापुरस्था - तुलजापुरे तिष्ठति इति । उपपद-तत्पुरुषः ।
१२) वाजिविभूषणम् - वाजिनां विभूषणम् । षष्ठी-तत्पुरुषः ।

## रूपपरिचयः ।

१) समाश्रयन् - सम् + आ + श्रि (१ उ.प. अत्र प.प.)
अ) (अत्र) शतृ-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम् ।
ब) लङ्, प्रथमपुरुषः, बहुवचनम् ।
२) उवास - वस् (१ प.प.), लिट्, प्रथमपुरुषः, एकवचनम् ।
३) तिष्ठन् - स्था (१ प.प.) शतृ-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम् ।
४) हन्ति - हन् (२ प.प.), लट्, प्रथमपुरुषः, एकवचनम् ।
५) प्रस्तूयते - प्र + स्तु (२ प.प.), कर्मणि लट्, प्रथमपुरुषः, एकवचनम् ।
६) अपास्य - अप + अस् (४ प.प.), पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययम् ।
७) स्नातुम् - स्ना (२ प.प.), हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययम् ।
८) आदधाति - आ + धा (३ उ.प. अत्र प.प.), लट्, प्रथमपुरुषः, एकवचनम् ।
९) आद्रियन्ते - आ + दृ (६ आ.प.), लट्, प्रथमपुरुषः, बहुवचनम् ।
१०) वितन्वते - वि + तन् (८ उ.प. अत्र आ.प.), लट्, प्रथमपुरुषः, बहुवचनम् ।
११) सद्मनि - सद्मन्, अन्नन्तम्, नपुंसकलिङ्गम्, सप्तमी एकवचनम् ।
१२) निर्वर्त्य - निर् + वृत् (१ आ.प.), णिजन्त, पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययम् ।
१३) सीमानम् - सीमन्, अन्नन्तम्, स्त्रीलिङ्गम्, द्वितीया एकवचनम् ।
१४) सम्पद्यमानः - सम् + पद् (४ आ.प.), शानच्-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम् ।

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) गुणोत्तरो दक्षिणदिक्स्थितोऽपि सह्याश्रितोऽपि द्विषतामसह्यः ।
२) उवास वन्यामवलम्ब्य वृत्तिं सहानुजो यत्र सुखं सदारः ।
३) प्रस्तूयते प्रेमपुरे प्रमोदान्मल्लारिपूजासु च येलकोटः ।
४) तिष्ठत्यपास्य श्रममिष्टकायामनादिकालादिह पाण्डुरङ्गः ।
५) क्वचिच्छिवो राजति वैद्यनाथः ।

**२. उचितं कारणं चित्वा वाक्यानि पुनर्लिखत ।**

**१) पाण्डुरङ्गः कल्पद्रुमः इव अस्ति, यतः .....।**
अ) सः इष्टकायां तिष्ठति ।
ब) सः भक्तस्य मनोरथान् पूरयति ।

**२) यात्रिवर्गः नृसिंहवाटीम् आगच्छति, यतः .....।**
अ) सः नरसिंहदर्शनम् इच्छति ।
ब) सः अत्रिसूनोः दर्शनम् इच्छति ।

### ३. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

**१) संवत्सरारम्भदिने प्रभाते – .............. ।**

अ) जनाः दोलोत्सवं वितन्वते ।

ब) जनाः ध्वजारोपणम् आद्रियन्ते ।

**२) आषाढमासे भक्तव्रजः – .............. ।**

अ) पौण्डरीकं समागच्छति ।

ब) नृसिंहवाटीं समागच्छति ।

**३) भाद्रपदमासे सितपक्षे – .............. ।**

अ) गणेशपूजामहोत्सवः प्रवर्तते ।

ब) वाजिविभूषणं प्रवर्तते ।

### ४. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

१) रामचन्द्रस्य निवासस्थानम् – ☐

२) मयूरेशपुरस्थः देवः – ☐

३) श्रावणमासि क्रियमाणः उत्सवः – ☐

४) शारदपौर्णिमायाः नामधेयम् – ☐

५) अनादिकालात् इष्टकायां तिष्ठति – ☐

६) मल्लारिपूजासु प्रस्तूयते – ☐

### ५. पूर्णवाक्येन उत्तरं लिखत ।

१) रामचन्द्रः कुत्र उवास ?

२) भक्तव्रजः पौण्डरीकं क्षेत्रं कदा समागच्छति ?

३) आयुधानां नीराजना कदा क्रियते ?

४) जनाः ध्वजारोपणं कदा आद्रियन्ते ?

### ६. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।

१) प्रेमपुरे मल्लारिपूजासु प्रमोदात् येलकोटः प्रस्तूयते ।

२) श्रावणमासे भक्तव्रजः पौण्डरीकं क्षेत्रं समागच्छति ।

३) महाराष्ट्रे आषाढपौर्णमास्यां सम्पद्यमानः त्रिपुरस्य दाहः विशिष्यते ।

### ७. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।

१) जनाः <u>सद्मनि</u> चैत्रगौर्याः दोलोत्सवं वितन्वते ।

२) सिद्धिविनायकस्य पूजामहोत्सवः <u>भाद्रपदमासे</u> प्रवर्तते ।

३) लोकाः विजयादशम्यां <u>सीमानम्</u> उल्लङ्घितुं व्रजन्ति ।

### ८. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) गोदावरीरोधसि रामचन्द्रः उवास । (तद्)

२) जनाः चैत्रगौर्याः दोलोत्सवं वितन्वते । (तद्)

### ९. विशेषण–विशेष्याणां मेलनं कुरुत ।

| अ | आ |
|---|---|
| १) मनोज्ञाम् | क्लेशान् |
| २) सदारः | पञ्चवटीम् |
| ३) अशेषान् | भवानी |
| ४) तुलजापुरस्था | क्षेत्रम् |
| ५) चतुर्थ्याम् | रामचन्द्रः |
| | तिथौ |

### १०. सन्धितालिकां पूरयत ।


१) क्वचिच्छिवः = ......... + शिवः ।

२) .............. = प्रमोदात् + दोलोत्सवम् ।

### ११. पृथक्करणं कुरुत ।

**१) जालरेखाचित्रं पूरयत ।**


१)





२)



३)




४)




**२) मञ्जूषायाः आधारेण स्तम्भपूरणं कुरुत । (श्लोक ११-१२ आधारेण)**

| अ | ब |
|---|---|
| विजयादशमी | |
| श्रावणमासि | |
| शारदपौर्णिमा | |
| कार्तिकपौर्णिमा | |

(वृषोत्सवः, त्रिपुरदाहः, ध्वजारोपणम्, सीमोल्लङ्घनम्, कोजागरी)

**उपक्रमः -**

१) भारतस्य विविधप्रान्तानाम् उत्सवानाम् अल्पपरिचयं लिखत ।

२) युष्माकं प्रियम् उत्सवं यूयं कथं सभाजयथ तद्विषये लिखत ।

***

**शुभाशयाः**

**शरीरमाद्यं खलु धर्मसाधनम् । श्रुतं मया, रुग्णो भवान् ।**
**भगवतः अनुग्रहेण शीघ्रं स्वास्थ्यलाभं करोतु भवान् ।**
**(स्वास्थ्यलाभार्थम्)**

# तृतीयः पाठः । मोदं वितनोतु संवादः ।

**भूमिका** – सुभाषितानां बहवः प्रकाराः इतः पूर्वम् अस्माभिः दृष्टाः । अत्र विशिष्य संवादमयानि सुभाषितानि सङ्गृहीतानि। देवताद्वयस्य, देवतामनुष्ययोः, पक्षिणोः रोचकाः संवादाः सुभाषितेषु दृश्यन्ते । अत्र श्लेषालङ्कारस्य तथा अन्योक्ति-अलङ्कारस्य उदाहरणम् अपि दृश्यते । कुत्रचित् कृतककलहः, कुत्रचित् परिहासः, कुत्रचित् उपहासोऽपि दृश्यते ।



कृष्णेनाम्ब गतेन रन्तुमधुना मृद् भक्षिता स्वेच्छया
सत्यं कृष्ण क एवमाह मुसली मिथ्याम्ब पश्याननम् ।
व्यादेहीति विकासितेऽथ वदने दृष्ट्वा समस्तं जगद्
माता यस्य जगाम विस्मयवशं पायात्स वः केशवः ।।१।।
(शार्दूलविक्रीडितम्)

कस्त्वं? शूली मृगय भिषजं नीलकण्ठः प्रियेऽहं
केकामेकां कुरु पशुपतिर्नैव दृश्ये विषाणे ।
स्थाणुर्मुग्धे न वदति तरुर्जीवितेशः शिवायाः
गच्छाटव्यामिति हतवचाः पातु वश्चन्द्रचूडः ।।२।।
(मन्दाक्रान्ता)



कस्त्वं लोहितलोचनास्यचरणो हंसः कुतो मानसात् ।
किं तत्रास्ति सुवर्णपङ्कजवनान्यम्भः सुधासन्निभम् ।
रत्नानां निचयः प्रवालमणयो वैदूर्यरोहाः क्वचित्
शम्बूका अपि सन्ति? नेति च बकैराकर्ण्य हीहीकृतम् ।।३।।
(शार्दूलविक्रीडितम्)

पद्मे मूढजने ददासि विभवं विद्वत्सु किं मत्सरः?
नाहं मत्सरिणी, न चापि चपला नैवास्ति मूर्खे रतिः ।
मूर्खेभ्यो द्रविणं ददामि नितरां तत्कारणं श्रूयतां
विद्वान्सर्वजनेषु पूजिततमो मूर्खस्य नान्या गतिः ।।४।।
(शार्दूलविक्रीडितम्)

अम्बा कुप्यति तात मूर्ध्नि विधृता गङ्गेयमुत्सृज्यतां
विद्वन् षण्मुख का गतिर्मम चिरं मूर्ध्नि स्थिताया वद ।
कोपावेशवशादशेषवदनैः प्रत्युत्तरं दत्तवान्
''अम्भोधिर्जलधिः पयोधिरुदधिर्वारान्निधिर्वारिधिः'' ।।५।।
(शार्दूलविक्रीडितम्)

## अन्वयः ।

१) मुसली/बलरामः- अम्ब, रन्तुं गतेन कृष्णेन अधुना स्वेच्छया मृद् भक्षिता!
अम्बा - सत्यं कृष्ण?
कृष्णः - कः एवम् आह?
अम्बा - मुसली ।
कृष्णः - अम्ब, मिथ्या; आननं पश्य ।
अम्बा - व्यादेहि ।
इति विकासिते वदने समस्तं जगत् दृष्ट्वा यस्य माता विस्मयवशं जगाम सः केशवः वः पायात् ।

२) पार्वती - कः त्वम्?
शङ्करः - शूली ।
पार्वती - भिषजं मृगय ।
शङ्करः - प्रिये, अहं नीलकण्ठः ।
पार्वती - एकां केकां कुरु ।
शङ्करः - पशुपतिः ।
पार्वती - विषाणे एव न दृश्ये ।
शङ्करः - मुग्धे, स्थाणुः ।
पार्वती - तरुः न वदति ।
शङ्करः - शिवायाः जीवितेशः ।
पार्वती - अटव्यां गच्छ ।
इति हतवचाः चन्द्रचूडः वः पातु ।

३) बकाः - लोहितलोचनास्यचरणः त्वं कः?
हंसः - हंसः ।
बकाः - कुतः?
हंसः - मानसात् ।
बकाः - तत्र किम् अस्ति?
हंसः - सुवर्णपङ्कजवनानि, सुधासन्निभम् अम्भः, रत्नानां निचयः, प्रवालमणयः, क्वचित् वैदूर्यरोहाः।
बकाः - अपि शम्बूकाः सन्ति?
हंसः - न ।
इति आकर्ण्य बकैः हीहीकृतम् ।

४) (भक्तः वदति) पद्मे, मूढजने विभवं ददासि, विद्वत्सु मत्सरः किम्? (लक्ष्मीः वदति), ''अहं न मत्सरिणी, न च अपि चपला, न एव (मम) मूर्खे रतिः अस्ति । (अहं) मूर्खेभ्यः नितरां द्रविणं ददामि, तत्कारणं श्रूयताम् । सर्वजनेषु विद्वान् पूजिततमः, मूर्खस्य अन्या गतिः न ।''

५) (षण्मुखः वदति) ''तात, अम्बा कुप्यति (अतः) मूर्ध्नि विधृता इयं गङ्गा उत्सृज्यताम् ।''
(शङ्करः वदति) ''विद्वन् षण्मुख, मम मूर्ध्नि चिरं स्थितायाः (गङ्गायाः) का गतिः वद''!
(तदा) कोपावेशवशात् अशेषवदनैः (षण्मुखः) प्रत्युत्तरं दत्तवान्, ''अम्भोधिः, जलधिः, पयोधिः, उदधिः, वारान्निधिः, वारिधिः ।''

## वाग्विशेषः ।

**श्लोकः २.**

❋ इदं श्लेषालङ्कारस्य उदाहरणम् । श्लेषः नाम एकस्य शब्दस्य नैके अर्थाः सन्ति । अयं पार्वतीशिवयोः संवादः । शूली, नीलकण्ठः इति विशेषणानि शिवः आत्मानम् उद्दिश्य वदति । श्लेषार्थं गृहीत्वा पार्वती प्रत्युत्तरं ददाति ।

**शूली** – १. त्रिशूलधारी २. शूलः यस्य अस्ति–रुग्णः

**नीलकण्ठः** – १. शिवः २. मयूरः

**पशुपतिः** – १. शिवः २. वृषभः

**स्थाणुः** – १. शिवः २. तरुः

**शिवाः** – १. पार्वती २. जम्बूकी

❋ 'गच्छाटव्याम्' इति गम् धातोः प्रयोगे सति अपि द्वितीयास्थाने सप्तमी विभक्तिः प्रयुक्ता ।

**श्लोकः ३.** अप्रस्तुतप्रशंसा–अलङ्कारस्य प्रकारः अन्योक्तिः । एषा बकान्योक्तिः । सामान्यजनानां रुचिः अपि सामान्या । ते असामान्यत्वं न जानन्ति एव इति एषा अन्योक्तिः सूचयति । यथा हिन्दीभाषायाम् उच्यते–''बन्दर क्या जाने अद्रक का स्वाद!'' इति ।

**श्लोकः ५.**

❋ एतत् समस्यापूर्तेः उदाहरणम् । अन्तिमा पङ्क्तिः समस्यारूपेण तिष्ठति । समस्यायाः उत्तररूपेण पूर्वपङ्क्तयः रचिताः । अम्भोधिः, जलधिः, पयोधिः इत्यादीनि सन्ति समुद्रनामानि ।

❋ वारान्निधिः – वाराम् निधिः । अलुक्–षष्ठी–तत्पुरुषः । 'अलुक्' इत्युक्ते पूर्वपदस्य विभक्तिः यथावत् दृश्यते । वार् = जलम् । तस्य षष्ठी–बहुवचनं 'वाराम्' इति समस्तपदे अपि यथावत् तिष्ठति ।

❋ अन्तिमचरणे 'धि' वर्णस्य पुनरुक्त्या अनुप्रास–अलङ्कारः ।

### शब्दार्थः ।

| | | | | | |
|---|---|---|---|---|---|
| १) रन्तुम् | – | खेलितुम् । | २) मुसली | – | बलरामः । |
| ३) व्यादेहि | – | मुखम् उद्घाटय । | ४) पायात् | – | रक्षेत् । |
| ५) केका | – | मयूरध्वनिः । | ६) विषाणम् | – | शृङ्गम् । |
| ७) अटवी | – | वनम् । | ८) लोहितम् | – | रक्तम्, रक्तवर्णीयम् । |
| ९) आस्यम् | – | तुण्डम्, मुखम्, वदनम् । | १०) सुधासन्निभम् | – | अमृतसदृशम् । |
| ११) शम्बूकः | – | जलमन्थरः । (गोगलगाय/Snail) | १२) विभवम् | – | वैभवम्, ऐश्वर्यम् । |
| १३) रतिः | – | प्रीतिः । | १४) द्रविणम् | – | धनम् । |
| १५) मूर्धा | – | मस्तकम् । | | | |

### सन्धिविग्रहः ।

| | | |
|---|---|---|
| १) पायात्स वः | = | पायात् + सः+ वः । |
| २) तरुर्जीवितेशः | = | तरुः + जीवितेशः । |
| ३) सुवर्णपङ्कजवनान्यम्भः | = | सुवर्णपङ्कजवनानि + अम्भः । |
| ४) बकैराकर्ण्य | = | बकैः + आकर्ण्य । |
| ५) गङ्गेयम् | = | गङ्गा + इयम् । |
| ६) कोपावेशवशादशेषवदनैः | = | कोपावेशवशात् + अशेषवदनैः । |

### समासविग्रहः ।

१) हतवचाः – हतानि वचांसि यस्य सः । बहुव्रीहिः ।
२) चन्द्रचूडः – चन्द्रः चूडायाम् यस्य सः । बहुव्रीहिः ।

### रूपपरिचयः ।

१) व्यादेहि – वि + आ + दा (३ उ.प. अत्र प.प.), लोट्, मध्यमपुरुषः, एकवचनम् ।
२) जगाम – गम् (१ प.प.), लिट्, प्रथमपुरुषः, एकवचनम् ।
३) पायात् – पा (२ प.प.), विधिलिङ्, प्रथमपुरुषः, एकवचनम् ।
४) मृगय – मृग् (१० उ.प. अत्र प.प.), लोट्, मध्यमपुरुषः, एकवचनम् ।
५) दृश्ये – दृश् (१ प.प.), कृत्य (य)-प्रत्ययान्तं विशेषणम्, नपुंसकलिङ्गम्, प्रथमा, द्वितीया द्विवचनम् ।
६) आकर्ण्य – आ + कर्ण् (१० उ.प.), पूर्वकालवाचक-ल्यबन्त-अव्ययम् ।
७) विद्वत्सु – विद्वस्, वस् – प्रत्ययान्तम्, पुंलिङ्गम्, सप्तमी बहुवचनम् ।
८) श्रूयताम् – श्रु-शृ (५ प.प.), कर्मणि लोट्, प्रथमपुरुषः, एकवचनम् ।
९) पूजिततमः – पूज् (१० उ.प.), क्त-प्रत्ययान्तस्य तमवाचकं विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम् ।
१०) मूर्ध्नि – मूर्धन्, अन्नन्तम्, पुंलिङ्गम्, सप्तमी एकवचनम् ।

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) हतवचाः पातु वश्चन्द्रचूडः ।
२) नेति च बकैराकर्ण्य हीहीकृतम् ।
३) मूर्खस्य नान्या गतिः ।
४) विद्वन् षण्मुख का गतिर्मम चिरं मूर्ध्नि स्थितायां वद ।

**२. उचितं कारणं चित्वा वाक्यानि पुनर्लिखत ।**

**१) मुसली कृष्णम् अधिक्षिपति, यतः .....।**

अ) कृष्णः रन्तुं गतः ।
ब) कृष्णेन मृद् भक्षिता ।

**२) बकाः मानसजलाशयाय न स्पृहयन्ति, यतः .....।**

अ) तत्र वातावरणं सुन्दरं नास्ति ।
ब) तत्र शम्बूकाः न सन्ति ।

**३) पद्मा मूढजनेभ्यः विभवं ददाति, यतः .....।**

अ) सा अविचारिणी ।

ब) मूर्खाणाम् अन्या गतिः नास्ति ।

**४) षण्मुखः पित्रे गङ्गाम् उत्स्रष्टुं कथयति, यतः .....।**

अ) गङ्गा शिवस्य शिरसि भारभूता ।

ब) षण्मुखस्य माता गङ्गायाः कारणात् कुप्यति ।

## ३. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

**१) कृष्णस्य विकासिते वदने अम्बया – .............. ।**

अ) भक्षिता मृद् दृष्टा ।

ब) समस्तं जगद् दृष्टम् ।

**२) नीलकण्ठं शङ्करं पार्वती – .............. ।**

अ) नृत्यं कर्तुम् आदिशति ।

ब) केकां कर्तुम् आदिशति ।

## ४. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

१) रन्तुं गतेन कृष्णेन भक्षिता – ☐

२) पार्वत्या हतवचाः – ☐

३) हंसस्य मूलस्थानम् – ☐

४) सर्वजनेषु पूजिततमः – ☐

५) अशेषवदनैः प्रत्युत्तरं दत्तवान् – ☐

## ५. पूर्णवाक्येन उत्तरं लिखत ।

१) माता कृष्णस्य वदने किम् अपश्यत्?

२) कीदृशः चन्द्रचूडः वः पातु?

३) कैः हीहीकृतम्?

४) पद्मा मूढजनेभ्यः किं ददाति?

## ६. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।

१) कृष्णेन नवनीतं भक्षितम् ।

२) लक्ष्मीः विद्वज्जनेभ्यः नितरां द्रविणं ददाति ।

३) यमुना शङ्करस्य मूर्ध्नि स्थिता ।

## ७. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।

१) तरुः न वदति । २) पद्मा मूर्खेभ्यः द्रविणं ददाति ।

## ८. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) अम्ब, पश्य आननम् । (इदम्)

२) मानसे सुधासन्निभम् अम्भः अस्ति । (तद्)

## ९. विशेषण–विशेष्याणां मेलनं कुरुत ।

| अ | आ |
|---|---|
| १) विकासिते | अम्भः |
| २) समस्तम् | वदने |
| ३) हतवचाः | विद्वान् |
| ४) लोहितलोचनास्यचरणः | चन्द्रचूडः |
| ५) पूजिततमः | जगत् |
| | हंसः |

## १०. सन्धितालिकां पूरयत ।

१) तरुर्जीवितेशः = तरुः +......... ।


२) सुवर्णपङ्कजवनान्यम्भः = ......... + अम्भः ।

३) ......... = बकैः + आकर्ण्य ।


## ११. पृथक्करणं कुरुत ।

**(अ) जालरेखाचित्रं पूरयत ।**


१)




२)




३)



**(आ) क्रमेण योजयित्वा वाक्यानि पुनर्लिखत ।**

* मातु: विस्मयवशता ।
* कृष्णस्य मृद्भक्षणम् ।
* वदने जगद्दर्शनम् ।
* मुसलिन: अम्बायै कथनम् ।

**उपक्रम: –**

१) एतानि सुभाषितानि चित्रकथारूपेण आलिखत ।

२) सूत्रधारं नियोज्य सुभाषितानां नाट्यीकरणं कुरुत ।

***

## ज्ञानरञ्जनी

'दशकुमारचरितम्' इत्यस्य हिन्दी व्याख्याकार: लिखति– दशकुमारचरितस्य रचयिता महाकवि: दण्डी संस्कृत–गद्यसाहित्यमालाया: मध्यमणि: अस्तीति मन्यते । पुनश्च स लिखति–संस्कृतकाव्यजगति शब्दानां कलात्मक–वाटिका–समलङ्करणे अभूतपूर्वसफलता प्राप्ताऽस्ति दण्डिना । दण्डी शब्दराज्यस्य समर्थ: राजा वर्तते । अनेन रचितस्य गद्यकाव्य–दशकुमारचरिते आनुप्रासिक–पदविन्यास: प्रदर्शनीय: एव विद्यते यथार्थतया । ललितपदानां (शब्दानां) शृङ्खलाबद्ध–संस्थापना–चातुर्यं विलक्षणीयं वर्तते इति समस्तदशकुमारचरिते ओतप्रोततया अवतीर्णं विद्यते । अत एव संस्कृतभाषासाहित्ये 'दण्डिन: पदलालित्यम्' इति उक्ति: आत्यन्तिकतया सुप्रसिद्धा स्वयमेव जाता अस्ति सर्वत्र ।

'गद्यं कवीनां निकषं वदन्ति' इति उक्ति: प्राचीन–संस्कृतसाहित्यकारेषु प्रचलितजाता अस्तीति प्राचीनकालत: एव दशकुमारचरितस्य अध्ययनेन एतत् सिद्धं भवतीति यत् दण्डी इत्ययं व्यावहारिक–संस्कृत–गद्यस्य सिद्धहस्त–लेखक: आसीदिति । दण्डिन: गद्यलेखनशैली सरला, सुलभा, सुबोधा एवं प्रसादमयी अस्तीति । दशकुमारचरिते दशकुमाराणां चरितं रचितं जातमस्ति । दशसु कुमारेषु मन्त्रगुप्त इत्यस्य चरितम् 'ओष्ठ्यवर्णविरहितशब्दै:' गुम्फितं विद्यते। प्, फ्, ब्, भ्, म् इत्येते ओष्ठ्यवर्णा: । दशकुमारचरितात् स्वीकृत: ओष्ठवर्णविरहित: परिच्छेद: ।

सद्य: सङ्गतानां च सैनिकानां तदत्यचित्रीयताकारान्तरग्रहणम् । गजस्कन्धगत: सितच्छत्रादिसकलराज चिह्नराजितश्चण्डतरदण्डिदण्डताडनत्रस्तजनदत्तान्तरालया राजवीथ्या यातस्तां निशां रसनयननिरस्तनिद्रारतिनैषम् । नीते च जनाक्षिलक्ष्यतां लाक्षारसदिग्धदिग्गजशिर:सदृक्षे शक्रदिगङ्गनारत्नादर्शेऽर्कचक्रे कृतकरणीय: किरणजालकरालरत्नराजिराजितराजार्हासनाध्यासी सहायानगादिषम्–दृश्यतां शक्तिरार्षी, यत्तस्य यतेरजेयस्येन्द्रियाणां संस्कारेण नीरजसा नीरजसांनिध्यशालिनि सहर्षालिनि सरसि सरसिजदलसंनिकाशच्छाय–स्याधिकतरदर्शनीयस्याकारान्तरस्य सिद्धिरासीत् । अद्य सकलनास्तिकानां जायेत लज्जानतं शिर: । तदिदानीं चन्द्रशेखरनरकशासनसरसिजासनादीनां त्रिदशेशानां स्थानान्यत्यादररचितनृत्यगीताद्याराधनानि क्रियन्ताम् । ह्रियन्तां च गृहादित: क्लेशनिरसनसहान्यर्थिसार्थैर्धनानि इति । आश्चर्यरसातिरेकहृष्टदृष्टयस्ते 'जय जगदीश! जयेन सातिशयं दश दिश: स्थगयन्निजेन यशसादिराजयशांसि' इत्यसकृदाशास्यारचयन्यथादिष्टा: क्रिया: । स चाहं दयिताया: सखीं हृदयस्थानीयां शशामसेनां कन्यकां कदाचित्कार्यान्तरागतां रहस्याचक्षिषि–'कच्चिदयं जन: कदाचिदासीदृष्ट: ?' इति ।

## चतुर्थः पाठः । भावेन भावः, क्रियया क्रिया ।

**भूमिका –** सुभाषितं नाम मुक्तककाव्यम् । यस्य श्रवणं पठनं च आनन्ददायकं तत् सुभाषितम् । संस्कृतसुभाषितानि तेषाम् आशयसौन्दर्यार्थं, शब्दसौन्दर्यार्थं, कल्पनावैविध्यार्थं च प्रसिद्धानि एव । किन्तु सुभाषितानि प्रायशः वैशिष्ट्यपूर्णाः व्याकरणरचनाः अपि प्रकटीकुर्वन्ति । सुभाषितेषु निहितं व्याकरणसौन्दर्यं परिचाययितुम् एतत् सुभाषितसङ्कलनं प्रस्तुतम् ।

'सति-सप्तमी' संस्कृतस्य विशेषरचना । अस्मिन् पाठे 'सति-सप्तमी' रचनायुतानि सुभाषितानि सङ्गृहीतानि । एषा रचना अल्पाक्षरा सारगर्भा च इति तस्याः विशेषः ।



**चित्ते प्रसन्ने** भुवनं प्रसन्नं **चित्ते विषण्णे** भुवनं विषण्णम् ।
अतोऽभिलाषो यदि ते सुखे स्यात् चित्तप्रसादे प्रथमं यतस्व ॥१॥
(उपजातिः)

खद्योतो द्योतते तावत् यावन्नोदयते शशी।
**उदिते** तु **सहस्रांशौ** न खद्योतो न चन्द्रमाः ॥२॥
(अनुष्टुप्)



पुस्तकस्था तु या विद्या परहस्तगतं धनम् ।
**कार्यकाले समुत्पन्ने** न सा विद्या न तद्धनम् ॥३॥
(अनुष्टुप्)

**पथ्ये सति** गदार्तस्य भेषजग्रहणेन किम् ।
**पथ्येऽसति** गदार्तस्य भेषजग्रहणेन किम् ॥४॥
(अनुष्टुप्)

चिन्तनीया हि विपदामादावेव प्रतिक्रिया ।
न कूपखननं युक्तं **प्रदीप्ते** वह्निना **गृहे** ॥५॥
(अनुष्टुप्)



**गतेऽपि वयसि** ग्राह्या विद्या सर्वात्मना बुधैः ।
यद्यपि स्यान्न फलदा सुलभा साऽन्यजन्मनि ॥६॥
(अनुष्टुप्)

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या **यत्ने कृते** यदि न सिध्यति कोऽत्र दोषः ॥७॥
(वसन्ततिलका)

रात्रिर्गमिष्यति भविष्यति सुप्रभातं भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।
इत्थं **विचिन्तयति कोषगते द्विरेफे** हा हन्त हन्त नलिनीं गज उज्जहार ॥८॥
(वसन्ततिलका)

## अन्वयः ।

१) प्रसन्ने चित्ते भुवनं प्रसन्नं, विषण्णे चित्ते भुवनं विषण्णम् । अतः यदि ते सुखे अभिलाषः स्यात् (तर्हि) प्रथमं चित्तप्रसादे यतस्व ।

२) यावत् शशी न उदयते तावत् खद्योतः द्योतते । सहस्रांशौ उदिते तु खद्योतः न (द्योतते) चन्द्रमाः (अपि) न (द्योतते) ।

३) या विद्या पुस्तकस्था सा कार्यकाले समुत्पन्ने तु विद्या न (भवति) । (यद्) धनं परहस्तगतं तद् (कार्यकाले समुत्पन्ने तु) धनं न (भवति) ।

४) गदार्तस्य पथ्ये सति भेषजग्रहणेन किम्? (आवश्यकता एव नास्ति ।) गदार्तस्य पथ्ये असति भेषजग्रहणेन किम्? (उपयोगः एव नास्ति ।)

५) विपदाम् आदौ एव हि प्रतिक्रिया चिन्तनीया । वह्निना प्रदीप्ते गृहे कूपखननं न युक्तम् ।

६) बुधैः वयसि गते अपि सर्वा विद्या आत्मना ग्राह्या । यद्यपि सा फलदा न स्यात्, (तथापि) अन्यजन्मनि (सा) सुलभा (भवेत्) ।

७) लक्ष्मीः उद्योगिनं पुरुषसिंहम् उपैति । कापुरुषाः 'दैवेन देयम्' इति वदन्ति । (त्वं) दैवं निहत्य आत्मशक्त्या पौरुषं कुरु । यत्ने कृते (अपि) यदि कार्यं न सिध्यति (तर्हि) अत्र कः दोषः? (कः अपि दोषः नास्ति ।)

८) 'रात्रिः गमिष्यति, सुप्रभातं भविष्यति, भास्वान् उदेष्यति, पङ्कजश्रीः हसिष्यति, इत्थं विचिन्तयति कोषगते द्विरेफे, हा हन्त हन्त! गजः नलिनीम् उज्जहार ।

## वाग्विशेषः ।

१. सतिसप्तमीयुक्तस्य वाक्यस्य सरलार्थं ज्ञातुं गौणवाक्ये अर्थमनुसृत्य यदा-तदा, यावत्-तावत् अथवा यद्यपि-तथापि एतेषाम् अव्यययुग्मानां प्रयोगः भवति । यथा-'यदा गृहं वह्निना प्रदीप्तं तदा...।'

२. महर्षिणा पाणिनिना अष्टाध्यायीग्रन्थे सतिसप्तमीरचनाविषयकं सूत्रं रचितम् - 'यस्य च भावेन भावलक्षणम्।' (२/३/३७)

### शब्दार्थः ।

१) अभिलाषः - इच्छा, कामना, वाञ्छा ।
२) खद्योतः - प्रभाकीटः । (काजवा/firefly)
३) द्योतते - प्रकाशते, दीप्यते ।
४) सहस्रांशुः/भास्वान् - सूर्यः, सहस्ररश्मिः, आदित्यः, भास्करः ।
५) गदार्तः - रुग्णः, व्याधिग्रस्तः, रोगी ।
६) भेषजम् - औषधम् ।
७) विपद् - आपद्, सङ्कटम्, विपत्तिः ।
८) कापुरुषः - भीरुः, कातरः ।
९) द्विरेफः - भृङ्गः, भ्रमरः, षट्पदः, अलिः।
१०) नलिनी - कमलिनी, मृणालिनी ।

### सन्धिविग्रहः ।

१) अतोऽभिलाषो यदि = अतः + अभिलाषः + यदि ।
२) यावन्नोदयते = यावत् + न + उदयते ।

३) पथ्येऽसति = पथ्ये + असति ।
४) सान्यजन्मनि = सा + अन्यजन्मनि ।
५) रात्रिर्गमिष्यति = रात्रि: + गमिष्यति ।

## समासविग्रहः ।

१) खद्योत: - खे द्योतते इति । उपपद-तत्पुरुषः ।
२) सहस्रांशौ - सहस्रम् अंशव: यस्य स:, तस्मिन् । बहुव्रीहि: ।
३) पुस्तकस्था - पुस्तके तिष्ठति इति । उपपद-तत्पुरुषः ।
४) गदार्तः - गदेन आर्त: । तृतीया-तत्पुरुषः ।
५) फलदा - फलं ददाति इति । उपपद-तत्पुरुषः ।
६) पुरुषसिंहम् - पुरुषः एव सिंहः, तम् । कर्मधारयः ।
७) कापुरुष: - कुत्सित: पुरुष: । प्रादि तत्पुरुष: ।
८) पङ्कजश्री: - पङ्के जायते इति । उपपद-तत्पुरुष: । **अथवा** पङ्कात् जायते इति । उपपद-तत्पुरुष: । पङ्कजस्य श्री: । षष्ठी-तत्पुरुष: ।
९) कोषगते - कोषं गतः, तस्मिन् । द्वितीया-तत्पुरुष: ।

## रूपपरिचयः ।

१) यतस्व - यत् (१ आ.प.), लोट्, मध्यमपुरुष:, एकवचनम् ।
२) प्रसन्नम् - प्र + सद्-सीद् (१ प.प.), क्त-प्रत्ययान्त-विशेषणम्, नपुंसकलिङ्गम्, प्रथमा, द्वितीया, एकवचनम् । पुंलिङ्गम्, द्वितीया एकवचनम् ।
३) विषण्णम् - वि + सद्-सीद् (१ प.प.), क्त-प्रत्ययान्त-विशेषणम्, नपुंसकलिङ्गम्, प्रथमा, द्वितीया एकवचनम् । पुंलिङ्गम्, द्वितीया एकवचनम् ।
४) द्योतते - द्युत् (१ आ.प.), लट्, प्रथमपुरुष:, एकवचनम् ।
५) समुत्पन्ने - सम् + उद् + पद् (४ आ.प.), क्त-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, सप्तमी एकवचनम्।
६) सति - अस् (२ प.प.), शतृ-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, नपुंसकलिङ्गम्, सप्तमी एकवचनम्।
७) विपदाम् - विपद्, दकारान्तम्, स्त्रीलिङ्गम्, षष्ठी बहुवचनम् ।
८) प्रदीप्ते - प्र + दीप् (४ आ.प.), 'क्त' प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, नपुंसकलिङ्गम्, सप्तमी एकवचनम् ।
९) ग्राह्या - ग्रह् (९ उ.प.), कृत्य-प्रत्ययान्त-विशेषणम् (य-प्रत्ययान्तम्), स्त्रीलिङ्गम्, प्रथमा एकवचनम्।
१०) उपैति - उप + इ (२ प.प.), लट्, प्रथमपुरुष:, एकवचनम् ।
११) देयम् - दा (१ प.प., ३ उ.प.), कृत्य-प्रत्ययान्त-विशेषणम् (य-प्रत्ययान्तम्), नपुंसकलिङ्गम्, प्रथमा, द्वितीया एकवचनम् ।
१२) निहत्य - नि + हन् (२ प.प.), पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययम् ।
१३) विचिन्तयति - १) वि + चिन्त् (१० उ.प. अत्र प.प.) लट्, प्रथमपुरुष:, एकवचनम् ।
२) (अत्र) वि + चिन्त् (१० उ.प. अत्र प.प.), शतृ-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, नपुंसकलिङ्गम्, सप्तमी एकवचनम् ।
१४) उज्जहार - उद् + हृ (१ प.प.), लिट्, प्रथमपुरुष:, एकवचनम् ।

## भाषाभ्यासः ।

### १. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।

१) चित्तप्रसादे प्रथमं यतस्व ।

२) न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ।

३) यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ।

४) हा हन्त हन्त नलिनीं गज उज्जहार ।

### २. उचितं कारणं चित्वा वाक्यानि पुनर्लिखत ।

**१) मनुजः चित्तप्रसादे एव प्रथमं यतेत, यतः .....।**

अ) चित्तप्रसादनम् अतीव सुलभम् ।

ब) चित्तप्रसादेन भुवनं प्रसन्नं प्रतिभाति ।

**२) आत्मशक्त्या यत्नः कर्तव्यः एव, यतः .....।**

अ) यत्नेन एव फलं लभ्यते ।

ब) यत्नेन न किमपि लभ्यते ।

**३) बुधैः वयसि गते अपि विद्या ग्राह्या, यतः .....।**

अ) अन्यजन्मनि विद्या सुलभा भविष्यति ।

ब) वृद्धावस्थायां स्मरणशक्तिः वर्धते ।

### ३. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

**१) यदि चित्तं प्रसन्नं, तर्हि – .............. ।**

अ) भुवनं प्रसन्नं स्यात् ।

ब) सुखे अभिलाषः स्यात् ।

**२) यदा कार्यकालः समुत्पन्नः तदा पुस्तकस्था विद्या – .............. ।**

अ) उपयुक्ता भवति ।

ब) अनुपयुक्ता भवति ।

**३) स्वपराक्रमेण प्राप्तव्यम् इति – .............. ।**

अ) कापुरुषाः वदन्ति ।

ब) उद्योगिनः वदन्ति ।

### ४. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

१) उदिते सहस्रांशौ यः न द्योतते – [ ]

२) पथ्ये असति गदार्तस्य निरुपयोगि – [ ]

३) प्रदीप्ते वह्निना गृहे न युक्तम् – [ ]

४) गतेऽपि वयसि ग्राह्या – [ ]

५) उद्योगिनं पुरुषसिंहम् उपैति – [ ]

## ५. पूर्णवाक्येन उत्तरं लिखत ।

१) पुस्तकस्था विद्या कदा अनुपयुक्ता?
२) विपदाम् आदौ का चिन्तनीया?
३) गतेऽपि वयसि का ग्राह्या?
४) कापुरुषा: किं वदन्ति?
५) लक्ष्मी: कम् उपैति?

## ६. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।

१) वह्निना प्रदीप्ते गृहे कूपखननं युक्तम् ।
२) धीरा: 'दैवेन देयम्' इति वदन्ति ।
३) कार्यकाले समुत्पन्ने पुस्तकस्था विद्या उपयुक्ता न भवति ।

## ७. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।

१) चित्ते प्रसन्ने भुवनं प्रसन्नम् ।
२) खद्योत: द्योतते ।
३) प्रदीप्ते वह्निना गृहे कूपखननं न युक्तम् ।
४) बुधै: सर्वा विद्या ग्राह्या ।
५) लक्ष्मी: उद्योगिनं पुरुषसिंहम् उपैति ।
६) भास्वान् उदेष्यति ।
७) नलिनीं गज: उज्जहार ।

## ८. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) तव अभिलाष: सुखे स्यात् । (मानव)
२) विपदां प्रतिक्रिया चिन्तनीया । (तद्)
३) सा अन्यजन्मनि सुलभा । (विद्या)
४) दैवेन देयमिति कापुरुषा: वदन्ति । (तद्)
५) भास्वान् उदेष्यति । (इदम्)

## ९. विशेषण–विशेष्याणां मेलनं कुरुत ।

| अ | आ |
|---|---|
| १) प्रदीप्ते | धनम् |
| २) परहस्तगतम् | चित्ते |
| ३) प्रसन्ने | द्विरेफे |
| ४) उद्योगिनम् | गृहे |
| ५) चिन्तनीया | पुरुषसिंहम् |
| | प्रतिक्रिया |

१०. सन्धितालिकां पूरयत ।


१) अतोऽभिलाषो यदि = ......... +.........+......... ।

२) ......... = यावत् + न + उदयते ।


३) पथ्येऽसति = ......... + असति ।

११. पृथक्करणं कुरुत ।

**(अ) जालरेखाचित्रं पूरयत ।**




**(आ) प्रवाहिजालं पूरयत ।**



(पङ्कजश्री: हसिष्यति, रात्रि: गमिष्यति, भास्वान् उदेष्यति, सुप्रभातं भविष्यति)

उपक्रम: –

सति-सप्तमी-रचनायुक्तानि अन्यानि सुभाषितानि अन्विष्यत ।

***

**गृहे पेयं स्वागतं च**
**हार्दिकी मधुरा च वाक् ।**
**स्नेहश्रयौ प्रेरणा च**
**नोच्छिद्यन्तां कदाचन ॥**
**(गृहप्रवेश:)**

**शुभाशया:**

**नववर्षं सुखदं, मंगलमयं, सौभ्याग्यकरं च भूयात् ।**
**(नववर्षम्)**

## पञ्चमः पाठः ।

# हनुमत्-प्लुतिः ।

**भूमिका** – आधुनिक-संस्कृत-महाकविषु डॉ. ग. बा. पळसुले-महोदयः (१९२१-२००५) अग्रगण्यः। भाषाशास्त्र-व्याकरणादिषु विद्वत्तमः पळसुलेमहोदयः ललित-संस्कृत-लेखनेऽपि निपुणः । त्रीणि नाटकानि, द्वे चरित्रे, एकं महाकाव्यम् इति महोदयस्य साहित्यसम्पत् । नैकेषां काव्यनाटकानां संस्कृते अनुवादः अपि महोदयेन कृतः। 'वैनायकम्' इत्यस्य महाकाव्यस्य नायकः स्वातन्त्र्यवीरः विनायक-दामोदर-सावरकरमहोदयः। विद्याध्ययनाय आङ्ग्लदेशं गतः विनायकः क्रान्तिकार्ये निमग्नः । अतः सर्वकारेण बद्धः तथा 'मोरिया' इति यन्त्रनौकया भारतं प्रेषितः । मार्गे फ्रान्सदेशस्य 'मार्सेलिस' नौशयस्य समीपं सः स्वविमोचनार्थं सागरे प्लुतवान् । तस्य इयं धैर्यकृतिः विश्वविख्याता। अयं चरित्रांशः वैनायकमहाकाव्यस्य 'हनुमत्-प्लुतिः' इति दशमसर्गात् अत्र उद्धृतः । अत्र १ तः १७ श्लोकाः रथोद्धता इति वृत्ते निबद्धाः। अन्तिमः अष्टादशः श्लोकः वसन्ततिलकावृत्ते निबद्धः 'सर्गान्ते वृत्तभेदः' इति महाकाव्यलक्षणानुसारेण।



**वीर-सावरकरस्य वाहिनी 'मोरिया' समनुदिश्य भारतम् ।**
**प्रस्थिता विधृतसत्त्वधारिणी व्याघ्रिकेव निजगह्वरं प्रति ।।१।।**

**सागरः स्तिमित आस सानिलः केवलं द्वितयमेव जङ्गमम् ।**
**वीर-सावरकरस्य वाहिनी नित्यदक्षमथ तस्य मानसम् ।।२।।**

**''कंसबन्धनगृहात् पलायितोऽर्भकश्च निशि देवकीसुतः ।**
**दैवतं निखिलराष्ट्रवादिनां श्रीशिवाजिरपि शत्रुबन्धनात् ।।३।।**

**बन्धने न हि मया विपत्स्यतेऽहं करोमि न चिरात् पलायनम् ।''**
**'मोरिया' सततगामिनी दिनैर् मारसेलिसमवाप सप्तभिः ।।४।।**

वीचिविग्रहकरस्य सागरे प्राणहानिरपि मे वरं, न तु ।
न्यायनाट्यकृतशूलरोपणं स्यात् कदाचिदिति तेन चिन्तितम् ।।५।।

'एष काल' इति चिन्तयन् द्रुतं वीर–सावरकर: समुत्थित: ।
'पोर्ट–होल'– विवराश्रयेण स ऐच्छदब्धिसलिले प्रकूर्दितुम् ।।६।।

नित्यसंनिहितमेत्य रक्षकं वीर–सावरकरस्तमब्रवीत् ।
''देहधर्मपरिपालनाय मां शौचकूपमभि नेतुमर्हसि'' ।।७।।

तत्र भित्तिगतदर्पणं बहिर्दर्शयन्तमथ वृत्तमान्तरम् ।
रात्रिकञ्चुकमपास्य छादयन् तेन तं वितथवृत्तिमातनोत् ।।८।।

रक्षकश्च स बहि: स्थितस्तथा बन्दिवीक्षणसमुद्यमाक्षम: ।
आकुल: किमपि जातसंशयो द्वारताडनमथाकरोद् बहु ।।९।।

अन्तरेऽत्र विवरं विनायकोऽल्पयत्नकरणाद् अपावृणोत् ।
संप्रवेश्य च तनूकृतां तनुं तेन सोऽयतत निर्गमे बहि: ।।१०।।

घर्मपूरित इत: श्वसन् मुहुर्द्वारभङ्गमकरोत् स रक्षक: ।
शून्यकक्षमवलोक्य तु क्षणात् भीतिभग्नहृदयो बभूव स: ।।११।।

घर्षणोन्मथितपार्श्वचर्मवान् वीर–सावरकरो गवाक्षत: ।
नि:सृतोऽब्धिसलिले स्वमक्षिपत् त्रेतिनीव हनुमान् पुराप्लवत् ।।१२।।

मज्जनोत्थित इतो विनायको नौशयाभिमुखतां गतो जवात् ।
छेत्तुमारभत वीचिशृङ्खला: स्पर्धकानिव स शिक्षयन् कलाम् ।।१३।।

कैश्चिदेव निमिषैर् व्यलोकयत् पृष्ठतश्च स निजानुसारिणौ ।
वर्धयंश्च गतिमात्मनस्ततो गोलिकाध्वनिमथाशृणोदपि ।।१४।।

स्पृष्ट एव च तटे 'जितं मये'त्याह तीर्णजलधिर्विनायक: ।
आङ्ग्लशासनबहि: स्थितोऽधुना फ्रान्सदेशकृतसंश्रयो हि स: ।।१५।।

रक्षकौ तदनुसारिणावुभौ नातिदूरमधुना समागतौ ।
संनिगृह्य करयोस्तथा गले तौ स्फुरन्तमथ तं चकर्षतु: ।।१६।।

वस्तुतस्तु शरणागतं जनं राजनैतिक–समाश्रयार्थिनम् ।
भारताय विसृजन् स रक्षको न्यायभङ्गमकरोत् न संशय: ।।१७।।

इत्थं हि बुद्धिविभवेन विचिन्तितोऽसौ धैर्येण साहसयुजा समनुष्ठितश्च ।
व्यूहो महान् अहह! निष्फलतां जगाम किं वा शुचा? न पुरुषस्य फलेऽधिकार: ।।१८।।

## अन्वयः ।

१) विधृतसत्त्वधारिणी (स्वभक्ष्यं गृहीत्वा) व्याघ्रिका इव (यथा) निजगह्वरं प्रति (तथा) वीर-सावरकरस्य वाहिनी 'मोरिया' भारतं समनुदिश्य प्रस्थिता ।

२) सानिलः सागरः स्तिमितः आस अथ केवलं वीरसावरकरस्य वाहिनी तस्य नित्यदक्षं मानसं (च) द्वितयम् एव जङ्गमम् ।

३) देवकीसुतः अर्भकः निशि कंसबन्धगृहात्, निखिलराष्ट्रवादिनां दैवतं श्रीशिवाजिः अपि च शत्रुबन्धनात् पलायितः ।

४) बन्धने मया न विपत्स्यते, न चिरात् अहं पलायनं करोमि । सप्तभिः दिनैः सततगामिनी मोरिया मारसेलिसम् अवाप ।

५) वीचिविग्रहकरस्य मे सागरे प्राणहानिः अपि वरं, न तु न्यायनाट्यकृतशूलरोपणं कदाचित् स्यात्, इति तेन चिन्तितम् ।

६) 'एषः कालः' इति चिन्तयन् वीर-सावरकरः द्रुतं समुत्थितः । सः 'पोर्ट-होल' विवराश्रयेण अब्धिसलिले प्रकूर्दितुम् ऐच्छत् ।

७) नित्यसंनिहितं रक्षकम् एत्य वीर-सावरकरः तम् अब्रवीत्, 'देहधर्मपरिपालनाय शौचकूपम् अभि मां नेतुम् अर्हसि ।'

८) अथ तत्र रात्रिकश्चुकम् अपास्य, आन्तरं वृत्तं बहिः दर्शयन्तं भित्तिगतदर्पणं तेन (रात्रिकश्चुकेन) छादयन् (सावरकरः), तं (दर्पणं) वितथवृत्तिम् आतनोत् ।

९) तथा बहिः स्थितः बन्दिवीक्षणसमुद्यम-अक्षमः किमपि जातसंशयः आकुलः रक्षकः बहु द्वारताडनम् अकरोत् ।

१०) अत्र अन्तरे विनायकः अल्पयत्नकरणात् विवरम् अपावृणोत् । तनूकृतां तनुं (विवरं) संप्रवेश्य, तेन (विवरेण) सः बहिः निर्गमे अयतत ।

११) घर्मपूरितः श्वसन् सः रक्षकः इतः मुहुः द्वारभङ्गम् अकरोत् । शून्यकक्षं तु अवलोक्य क्षणात् सः भीतिभग्नहृदयः बभूव ।

१२) पुरा त्रेतिनि (काले) प्लवन् हनुमान् इव, गवाक्षतः निःसृतः घर्षणोन्मथितपार्श्वचर्मवान् वीर-सावरकरः अब्धिसलिले स्वम् अक्षिपत् ।

१३) इतः मज्जनोत्थितः स्पर्धकान् कलां शिक्षयन् इव सः विनायकः वीचिशृङ्खलाः छेत्तुम् आरभत । नौशयाभिमुखतां जवात् गतः ।

१४) अथ कैश्चित् एव निमिषैः सः पृष्ठतः निजानुसारिणौ रक्षकौ व्यलोकयत् । ततः आत्मनः गतिं वर्धयन् च (सः) गोलिकाध्वनिम् अपि अशृणोत् ।

१५) स्पृष्टे एव तटे तीर्णजलधिः विनायकः 'जितं मया' इति आह फ्रान्सदेशकृतसंश्रयः हि सः अधुना आङ्ग्लशासनबहिः स्थितः च ।

१६) तदनुसारिणौ उभौ रक्षकौ अधुना न अतिदूरं समागतौ । करयोः तथा गले संनिगृह्य स्फुरन्तं तं तौ चकर्षतुः ।

१७) राजनैतिकसमाश्रयार्थिनं शरणागतं जनं भारताय विसृजन् सः (फ्रेंचः) रक्षकः वस्तुतः तु न्यायभङ्गम् अकरोत्, न संशयः ।

१८) अहह! इत्थं हि बुद्धिविभवेन विचिन्तितः असौ महान् व्यूहः साहसयुजा धैर्येण च समनुष्ठितः (अपि) निष्फलतां जगाम । किं वा शुचा? फले पुरुषस्य न अधिकारः ।

## वाग्विशेषः ।

१. भाषायाः नित्यनूतनतया उपयोगसामर्थ्यं तदा एव भवति यदा समकालीनव्यवहाराय आवश्यकानां शब्दानां निर्माणं भवति । एतादृशाः एव कतिचनशब्दाः अस्मिन् काव्ये कविना योजिताः ।
रात्रिकञ्चुकः, नौशयः, गोलिकाध्वनिः

२. युगम् – युगशब्दः कालस्य परिमाणं दर्शयति । पुराणेषु कृतयुगं, त्रेतायुगं, द्वापरयुगं तथा च कलियुगम् इति चत्वारि युगानि निर्दिष्टानि । एतानि चत्वारि युगानि योजयित्वा महायुगम् अथवा दिव्ययुगं भवति । साम्प्रतं कलियुगं वर्तते । विनायकेन 'मोरिया' वाहिन्याः महासागरे यत् प्लवनं कृतं, तस्य अपूर्वसाहसस्य तुलना केवलं त्रेतायुगे हनुमता कृतेन समुद्रलङ्घनेन भवितुम् अर्हति इति गौरवेण वैनायकमहाकाव्ये कविः कथयति। पुरा हनुमान् मातृवत् पूजनीयायाः सीतायाः अन्वेषणार्थं समुद्रम् उल्लङ्घितवान्, विनायकः अपि स्वमातृभूमेः दैन्यनिवारणार्थं सागरं प्लुतवान् । एतेन हनुमत्प्लुतिः इति पाठस्य शीर्षकम् अन्वर्थकं भवति ।

## शब्दार्थः ।

१) सत्त्वम् – पशुः, प्राणी ।
२) गह्वरम्/गह्वरः – गिरिबिलम्, गुहा, कन्दरा ।
३) विधृतसत्त्वधारिणी – स्वभक्ष्यं गृहीत्वा ।
४) अनिलः – वायुः, समीरः, वातः ।
५) जङ्गमम् – चलः, सञ्चारी ।
६) दक्षम् – अवहितम्, सावधानम् ।
७) स्तिमितः – स्तब्धः, स्थिरः ।
८) अर्भकः – नवजातः शिशुः ।
९) निशि – रात्रौ, निशायाम् ।
१०) वीचिविग्रहकरः – सागरतरङ्गैः सह सङ्घर्षं कुर्वन् (प्लवमानः विनायकः) ।
११) द्रुतम् – झटिति, शीघ्रम् ।
१२) विवरम् – छिद्रम् ।
१३) अब्धिः – सागरः, समुद्रः, जलधिः ।
१४) संनिहितः – समीपस्थः ।
१५) वितथवृत्तिः – वञ्चना, मिथ्याचारः ।
१६) आन्तरम् – अन्तर्गतम् ।
१७) आकुलः – व्याकुलः ।
१८) वीक्षणम् – दर्शनम् ।
१९) अक्षमः – असमर्थः, अशक्तः ।
२०) अपावृणोत् – अपाकरोत्, उदघाटयत् ।
२१) तनूकृता तनुः – सङ्कोचितं शरीरम् ।
२२) घर्मः – स्वेदः ।
२३) शून्यकक्षः – रिक्तः कक्षः ।
२४) गवाक्षम् – वातायनम् ।
२५) चर्म – त्वक् ।
२६) स्वम् – आत्मानम् ।
२७) त्रेतिनि – त्रेतायुगे ।
२८) नौशयः – नौकाश्रयः ।
२९) जवः – वेगः, त्वरा ।
३०) साहसयुजा (साहसयुज्) – साहसयुक्तेन ।
३१) शुचा (शुच्) – शोकेन, दुःखेन ।

## सन्धिविग्रहः ।

१) व्याघ्रिकेव = व्याघ्रिका + इव । २) बहिर्दर्शयन्तम् = बहिः + दर्शयन्तम् ।
३) स्थितस्तथा = स्थितः + तथा । ४) सोऽयतत = सः + अयतत ।
५) आत्मनस्ततः = आत्मनः + ततः । ६) स्पृष्ट एव = स्पृष्टे + एव ।
७) मयेत्याह = मया + इति + आह ।
८) स्थितोऽधुना = स्थितः + अधुना ।
९) तदनुसारिणावुभौ = तदनुसारिणौ + उभौ ।
१०) विचिन्तितोऽसौ = विचिन्तितः + असौ ।

## समासविग्रहः ।

१) सानिलः - अनिलेन सह । सह-बहुव्रीहिः ।
२) वीचिविग्रहकरस्य - वीचीनां विग्रहः । षष्ठी-तत्पुरुषः ।
वीचिविग्रहं करोति इति । उपपद-तत्पुरुषः ।
३) वितथवृत्तिम् - वितथा वृत्तिः यस्य सः, तम् । बहुव्रीहिः ।
४) भीतिभग्नहृदयः - भीत्या भग्नम् । तृतीया-तत्पुरुषः ।
भीतिभग्नं हृदयं यस्य सः । बहुव्रीहिः ।
५) मज्जनोत्थितः - मज्जनात् उत्थितः । पञ्चमी-तत्पुरुषः ।
६) तीर्णजलधिः - तीर्णः जलधिः येन सः । बहुव्रीहिः ।
७) साहसयुजा - साहसेन युज्यते, तेन । उपपद-तत्पुरुषः ।

## रूपपरिचयः ।

१) समनुदिश्य - सम् + अनु + दिश् (६ उ.प.), पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययम् ।
२) प्रस्थिता - प्र + स्था-तिष्ठ् (१ प.प.), क्त-प्रत्ययान्त-विशेषणम्, स्त्रीलिङ्गम्, प्रथमा एकवचनम्।
३) पलायितः - परा + अय् (१ आ.प.), क्त-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम्।
४) निशि - निश् ('निशा' इति शब्दस्य वैकल्पिकं रूपम्) शकारान्तम्, स्त्रीलिङ्गम्, सप्तमी एकवचनम्।
५) विपत्स्यते - वि + पद् (४ आ.प.) भावे लृट्, प्रथमपुरुषः, एकवचनम् ।
६) अवाप - अव + आप् (५ प.प.), लिट्, प्रथमपुरुषः, एकवचनम् ।
७) सप्तभिः - सप्तन् सङ्ख्यावाचक-विशेषणम्, त्रिषु लिङ्गेषु समानम्, तृतीया बहुवचनम् ।
८) चिन्तयन् - चिन्त् (१० उ.प. अत्र प.प.), शतृ-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम्।
९) ऐच्छत् - इष्-इच्छ् (६ प.प.), लङ्, प्रथमपुरुषः, एकवचनम् ।
१०) प्रकूर्दितुम् - प्र + कूर्द् (१ प.प.), हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययम् ।
११) समुत्थितः - सम् + उद् + स्था-तिष्ठ् (१ प.प.), क्त-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम् ।
१२) एत्य - आ + इ (२ प.प.), पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययम् ।
१३) दर्शयन्तम् - दृश्-पश्य् (१ प.प.), णिजन्तम्, शतृ-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, द्वितीया एकवचनम् ।
१४) अपास्य - अप + अस् (४ प.प.), पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययम् ।

१५) छादयन् - छद् (१० उ.प.), णिजन्तम्, शतृ-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम् ।
१६) अपावृणोत् - अप + आ + वृ (५ उ.प. अत्र प.प.), लङ्, प्रथमपुरुष:, एकवचनम् ।
१७) संप्रवेश्य - सम् + प्र + विश् (६ प.प.), णिजन्तम्, पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययम् ।
१८) तनूकृताम् - तनु + कृ (८ उ.प.) च्वि-रूपम्, क्त-प्रत्ययान्त-विशेषणम्, स्त्रीलिङ्गम्, द्वितीया एकवचनम् ।
१९) श्वसन् - श्वस् (२ प.प.), शतृ-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम् ।
२०) नि:सृत: - निस् + सृ (१ प.प.), क्त-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम् ।
२१) छेत्तुम् - छिद् (७ उ.प.), हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययम् ।
२२) शिक्षयन् - शिक्ष् (१ आ.प.), णिजन्तम्, शतृ-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम् ।
२३) वर्धयन् - वृध् (१ आ.प.), णिजन्तम्, शतृ-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा एकवचनम् ।
२४) अशृणोत् - श्रु-शृ (५ प.प.), लङ्, प्रथमपुरुष:, एकवचनम् ।
२५) स्पृष्टे - स्पृश् (६ प.प.) क्त-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, सप्तमी एकवचनम् ।
२६) चकर्षतु: - कर्ष् (१ प.प.), लिट्, प्रथमपुरुष:, द्विवचनम् ।
२७) जगाम - गम्-गच्छ् (१ प.प.), लिट्, प्रथमपुरुष:, एकवचनम् ।

## भाषाभ्यास: ।

### १. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।

१) आकुल: किमपि जातसंशयो द्वारताडनमथाकरोत् बहु ।
२) त्रेतिनीव हनुमान् पुराप्लवत् ।
३) किं वा शुचा? न पुरुषस्य फलेऽधिकार: ।

### २. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

**१) वीर-सावरकरस्य वाहिनी- .............. ।**
अ) 'व्याघ्रिका' भारतं समनुदिश्य प्रस्थिता ।
ब) 'मोरिया' भारतं समनुदिश्य प्रस्थिता ।

**२) वीर-सावरकर: चिन्तितवान्- .............. ।**
अ) न्यायनाट्यकृतशूलरोपणं वरम् ।
ब) सागरे प्राणहानि: वरम् ।

**३) तीर्णजलधि: विनायक: अधुना - .............. ।**
अ) फ्रान्सदेशं संश्रित: ।
ब) आङ्ग्लदेशं संश्रित: ।

**३. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।**

१) कंसबन्धनगृहात् पलायित: अर्भक: – [ ]

२) अब्धिसलिले प्रकूर्दितुम् ऐच्छत् – [ ]

३) भीतिभग्नहृदय: बभूव – [ ]

४) वीचिशृङ्खला: छेत्तुम् आरभत – [ ]

**४. पूर्णवाक्येन उत्तरं लिखत ।**

१) वीरसावरकरस्य वाहिन्या: नाम किम्?

२) क: शत्रुबन्धनात् पलायित:?

३) वीरसावरकर: नित्यसंनिहितं रक्षकं किम् अब्रवीत्?

४) रक्षक: किम् अवलोक्य भीतिभग्नहृदय: बभूव?

५) वीरसावरकर: कुत: स्वम् अब्धिसलिले अक्षिपत्?

६) मज्जनोत्थित: विनायक: किम् आरभत?

७) स्पृष्टे एव तटे विनायक: किम् आह?

**५. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।**

१) श्रीशहाजिरपि शत्रुबन्धनात् पलायित: ।

२) दशभि: दिनै: सततगामिनी मोरिया मारसेलिसम् अवाप ।

३) पुरा त्रेतिनि काले प्लवन् हनुमान् इव वीर-सावरकर: गवाक्षत: नि:सृत: ।

४) वीर-सावरकरस्य समनुष्ठित: व्यूह: निष्फलतां जगाम ।

**६. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।**

१) सानिल: सागर: स्तिमित: आस ।

२) देवकीसुत: कंसबन्धनगृहात् पलायित: ।

३) स: अब्धिसलिले प्रकूर्दितुम् ऐच्छत् ।

४) विनायक: विवरम् अपावृणोत् ।

५) रक्षक: द्वारभङ्गम् अकरोत् ।

६) विनायक: वीचिशृङ्खला: छेत्तुम् आरभत ।

७) स: निजानुसारिणौ व्यलोकयत् ।

८) पुरुषस्य फले न अधिकार:?

**७. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) श्रीशिवाजि: निखिलराष्ट्रवादिनां दैवतम् । (एतद्)

२) बन्धने मया न विपत्स्यते । (विनायक)

३) द्रुतं वीरसावरकर: समुत्थित: । (इदम्)

४) वीरसावरकर: रक्षकम् अब्रवीत् । (तद्)

५) रक्षिणौ स्फुरन्तं तं चकर्षतु: । (विनायक)

६) रक्षक: न्यायभङ्गम् अकरोत् । (एतद्)

## ८. विशेषण-विशेष्याणां मेलनं कुरुत ।

| अ | आ |
|---|---|
| १) स्तिमित: | दिनै: |
| २) शरणागतम् | विनायक: |
| ३) आन्तरम् | रक्षक: |
| ४) आकुल: | वृत्तम् |
| ५) तीर्णजलधि: | सागर: |
| | जनम् |

## ९. सन्धितालिकां पूरयत ।

१) ऐच्छदब्धिसलिले = ......... + अब्धिसलिले ।

२) बहिर्दर्शयन्तम् = ......... + ......... ।

३) ............. = नि:सृत: + अब्धिसलिले ।

४) तदनुसारिणावुभौ = तदनुसारिणौ + ......... ।

५) मयेत्याह = ......... + ......... + ......... ।


## १०. पृथक्करणं कुरुत ।

**क्रमेण योजयित्वा वाक्यानि पुनर्लिखत ।**

१) अ) रक्षकस्य शून्यकक्षावलोकनम् ।
   ब) रात्रिकञ्चुकेन भित्तिगतदर्पणस्य आच्छादनम् ।
   क) सावरकरस्य रक्षकं शौचकूपं नेतुं प्रार्थना ।
   ड) आकुलस्य रक्षकस्य द्वारताडनम् ।

२) अ) वीचिशृङ्खलानां छेदनम् ।
   ब) तीर्णजलधिविनायकस्य तटस्पर्श: ।
   क) सावरकरस्य गवाक्षत: नि:सरणम् ।
   ड) रक्षकयो: विनायकस्य अनुसरणम् ।

३) श्लोक ९ आधारेण जालरेखाचित्रं पूरयत ।




**उपक्रम: -**

१) आधुनिक-भारतीय-स्वातन्त्र्य-योद्धृणां संस्कृते रचितानां चरित्रग्रन्थानां नामानि लिखत ।

२) डॉ. ग. बा. पळसुले-महोदयेन के अन्ये संस्कृतग्रन्था: रचिता:, इति अन्विष्य सूचिं लिखत ।

***

# भाषासंवादः ।

**भूमिका –** शब्दव्युत्पत्तिशास्त्रम् इति संस्कृतभाषायाः विशेषः । यास्कमुनिना रचितं निरुक्तं व्युत्पत्तिशास्त्रविषयकः आद्यः ग्रन्थः । तस्य आधारेण शब्दमूलानाम् अन्वेषणं रोचकम् । नैकासु भारतीयभाषासु संस्कृतम् इति समानसूत्रं तथैव बहवः शब्दाः संस्कृतोद्भवाः संस्कृतसमाः वा सन्ति । अतः संस्कृतसाहाय्येन भारतीयभाषाः समलङ्कृताः। शब्दानां मूलार्थप्रतिपादनम् एव भाषाणां वैभवम् इति दर्शितम् अस्मिन् पाठे । अनेन कल्पितेन भाषासंवादेन भारतीयभाषासु सामञ्जस्यं वर्धेत ।

पुरा किल परस्परं विवदमानाः भारतीयभाषाः सर्वाः देवीं सरस्वतीं जग्मुः। सर्वाः तामूचुः, '' देवि, का नु अस्मासु श्रेष्ठा ?'' तदा सरस्वती ताः उवाच, ''आसेतुहिमाचलं भारते विराजमानाः यूयं सर्वाः भाषाः श्रेष्ठाः ।'' सर्वाः अवदन्, ''कथमेतत् शक्यम् ?'' तदा सरस्वती उवाच, ''भवतीषु प्रत्येकं भाषा आत्मस्थितान् सर्वान् शब्दान् आह्वयतु ।'' अथ सर्वभाषाणां कोषगताः शब्दाः तत्र सम्मिलिताः । तदा सरस्वती उवाच, ''शब्दाः सर्वदा अर्थपूर्णाः भवेयुः नैव अर्थहीनाः । शब्दरूपं नाम भाषायाः शरीरम्; अर्थरूपः च आत्मा। यथा यत्र मनः रमते सः 'रामः' । यः अबोधत् सः 'बुद्धः' । चारुः वाक् यस्य सः 'चार्वाकः' । या सततम् अग्रे गच्छति सा 'गङ्गा' इत्यादयः'' । अत्रान्तरे अमरकोषादयः नैके संस्कृतकोषाः अपि तत्र सम्मिलिताः । तेषु शब्दानां पर्यायशब्दाः नाम समानार्थकशब्दाः उपलब्धाः । सरस्वती पुनरवदत्, ''पर्यायशब्दानां मूलार्थाः अपि चिन्तनीयाः, यथा 'वृक्षः' इति शब्दस्य विविधाः पर्यायशब्दाः सन्ति । पादपः–पादैः पिबति इति । महीरुहः–मह्याः रोहति इति । शाखी–शाखाः धारयति इति । इत्थं वृक्षस्य विविधानि लक्षणानि पर्यायशब्दाः प्रकटयन्ति । शब्दाः तु शक्तिस्वरूपाः अतः पर्यायशब्दानां यथोचितः उपयोगः करणीयः ।''

सर्वाः भाषाः ऊचुः, ''अस्मदीयाः खलु एते शब्दाः ।'' विहस्य देवी उवाच, ''आम्, भवतीषु सर्वासु भाषासु समानसूत्रं वर्तते । तत् किमिति अन्वेष्टव्यम् ।'' सर्वाः भाषाः चिन्तनमग्नाः अभवन् । अत्रान्तरे मार्जारम् अनुधावन् एकः कुक्कुरः तत्र आगच्छति । मराठीभाषा वदति, 'मांजर' । बाङ्ग्लाभाषा भाषते 'बिराल', गुजराती–हिन्दीभाषे उच्चैः कथितवत्यौ 'बिलाडी–बिल्ली' इति । कुक्कुरं दृष्ट्वा कोंकणीभाषा उक्तवती, 'सुणें' । बाङ्ग्ला–तेलुगुभाषे ऊचतुः, 'कुकुर, कुक्का' इति । तदा कोणे स्थितात् अमरकोषात् ध्वनिः प्रस्फुरितः –


**ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् ।**
**कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ।**
**शुनको भषकः श्वा स्यादलर्कस्तु स योगितः ।**
**श्वाविश्वकद्रुर्मृगयाकुशलः सरमा शुनी ।**

तदा संस्कृतेतरभाषाः अमरकोषस्थशब्दानाम् निजशब्दैः साम्यं दृष्ट्वा चकितचकिताः अभवन्। सरस्वती उवाच, ''चिन्तयन्तु किल । संस्कृतेतरशब्देषु कुत्रचित् वर्णानां क्रमः विपर्यस्तः, कुत्रचित् वर्णाः लुप्ताः, कुत्रचित् नूतनवर्णाः आगताः किन्तु समानसूत्रत्वं तथैव ।'' चिन्तनमग्नासु सर्वासु भाषासु सरस्वती पुनर्वदति, ''उक्तं च –

**'वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।**
**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ।।'**

इति निर्वचनस्य पञ्च विधाः सन्ति।

निर्वचनसिद्धान्तम् अनुसृत्य सर्वेषां शब्दानां निर्वचनं भवितुम् अर्हति एव। अतः एव यास्कमुनिः वदति, ''न तु एव न निर्ब्रूयात् ।''




सर्वाः भाषाः तां पप्रच्छुः, ''किं नाम निर्वचनम्? का च तस्य आवश्यकता?'' इति।

सरस्वती जगाद, ''निःशेषेण वचनं निर्वचनम् इति उच्यते । शब्दानां मूलं तथा तेषाम् अर्थः एतयोः स्पष्टीकरणं नाम निर्वचनम् । स एव निरुक्तग्रन्थस्य प्रतिपाद्यः विषयः।''

भाषाः प्रत्यपृच्छन्, ''किन्तु शब्दकोषाः शब्दानाम् अर्थान् तु प्रकाशयन्ति एव। तर्हि निरुक्तस्य किं महत्त्वम्?''

सरस्वती प्रत्यवदत्, ''शब्दकोषाः अर्थप्रकाशकाः इति तु सत्यम् एव । किन्तु ते शब्दानां वर्तमानम् अर्थम् एव प्रकाशयन्ति। निरुक्तं तु शब्दानां निर्मितेः इतिहासं निःशेषं कथयति ।''

भाषाः ऊचुः, ''सम्यक् अवगतम् अधुना । लौकिक-वैदिक-संस्कृतशब्दानां निर्वचनं कर्तुं शक्यते। अपि भारतीयभाषास्थितानां शब्दानां निर्वचनं कर्तुं शक्यम्?''

सरस्वती स्मितं कृत्वा उक्तवती, ''अथ किम्? पश्यन्तु सर्वाः भवत्यः । अहम् एकं संस्कृतशब्दं वदामि । तस्य कृते स्वान् स्वान् शब्दान् झटिति वदन्तु ...भ्रमरः''।

तदा भाषाः भ्रमरवाचकैः शब्दैः युगपद् गुञ्जनम् चक्रुः- ''भृंगा (मराठी)... भमरो (गुजराती)... भ्रॉमोर (बाङ्ला)... भरिंग (पंजाबी)... बुमरो (काश्मिरी)... भमरो (पालिः)...भँवरा (हिन्दी)... भोमोरा (असमिया) ... भ्रमरमु (तेलुगु) ... भअँर (उडिया)''

सरस्वती पुनः वदति, ''शब्दानां मूलार्थप्रतिपादनम् एव भाषायाः वैभवम् । नित्यं भ्रमति एव अयम् अतः **भ्रमरः**। 'भ्रम्' इति धातोः व्युत्पन्नः अयं शब्दः। अधुना अवलोकयन्तु सर्वान् एतान् शब्दान् । निर्वचन-सिद्धान्तेन स्पष्टतया अवगम्यते यत्, शब्दस्य क्व मूलं? कीदृशः च विन्यासः? कुत्र समानता? किमु भेदः? तर्कयन्तु सम्यक् ।

यूयं सर्वाः भगिनीभावं भजध्वे। न कापि श्रेष्ठा कनिष्ठा वा । यदा यदा एतादृशः संभ्रमः अहम्भावः वा युष्माकं मनसि उद्भवेत्, तदा तदा युष्माभिः शब्दानां मूलं प्रति गन्तव्यम् ।'' सरस्वत्याः वचनं श्रुत्वा सर्वाः भारतीयभाषाः भगिनीभावम् अवगम्य संवदितुम् उद्यताः।

## वाग्विशेषः ।

१. निरुक्तम्- षट्सु वेदाङ्गेषु अन्यतमं निरुक्तम् । 'निघण्टु' इति वैदिकशब्दानां सूचिग्रन्थः । तद्विषये यास्काचार्येण विरचिता टीका नाम 'निरुक्तम्' । यास्काचार्यस्य कालः ख्रिस्तपूर्वं नवमम् अथवा अष्टमं शतकम् इति विद्वद्भिः मन्यते । निरुक्ते शब्दानां व्युत्पत्तिं तथा तदनुसारेण अर्थं स्पष्टीकर्तुं यत्नाः कृताः। यास्काचार्येण शब्दानां निर्वचनाय एतानि पञ्च तत्त्वानि निरूपितानि -

१) वर्णागमः - वारयति इति द्वारम् (वृ-वार् इति धातुः- द् वर्णस्य आगमः) ।

२) वर्णविपर्ययः - हिंस्-सिंहः, कस्-सिकता ।

३) वर्णविकारः - यष्टिः-लट्ठी-लाठी (मराठी);
तृष्णा-तण्हा (पाली)-तन्हा (प्राकृतम्)- तहान (वर्णविपर्ययेण मराठीभाषायाम्);
सप्ताहः-हफ्ता (मराठी-हिन्दी) ।

४) वर्णनाशः - गम् + त्वा = गत्वा; नम् + त्वा = नत्वा (म् वर्णस्य नाशः) ।

५) धातोः अर्थातिशयेन योगः- वह्-विवाहः, प्रवाहः, वाहनम्, वाहकः, उद्वाहनम्, कार्यवाहः;
चल्-चलः; अचलः, चञ्चलः, चलनम्, चलित्रम्, सञ्चलनम् ।

२. अमरकोषः = अध्येतृणां सुखबोधाय समानार्थकशब्दानां पद्यमयीं रचनां कृत्वा पण्डित-अमरसिंहेन अमरकोषः ग्रथितः ।

* ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् । अमरकोषः, २.५.६.१
* कौलेयकः सारमेयः कुक्कुरो मृगदंशकः । अमरकोषः, २.१०.२१.२
* शुनको भषकः श्वा स्यादलर्कस्तु स योगितः । अमरकोषः, २.१०.२२.१
* श्वाविश्वकद्रुर्मृगयाकुशलः सरमा शुनी । अमरकोषः, २.१०.२२.१

## शब्दार्थः ।

१) विवदमानाः - विवादं (कलहं) कुर्वाणाः ।
२) लौकिकशब्दाः - लोकव्यवहारे जनैः प्रयुज्यमानाः शब्दाः ।
३) वैदिकशब्दाः - वेदेषु प्रयुक्ताः शब्दाः ।
४) युगपत् - एकस्मिन् एव समये ।
५) व्युत्पन्नः - व्युत्पत्त्या सिद्धः ।
६) विन्यासः - संरचना ।

## सन्धिविग्रहः ।

१) ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् = ओतुः + बिडालः + मार्जारः + वृषदंशकः + आखुभुक्।
२) स्यादलर्कस्तु = स्यात् + अलर्कः + तु
३) वर्णविपर्ययश्च = वर्णविपर्ययः + च ।
४) धातोस्तदर्थातिशयेन = धातोः + तदर्थातिशयेन ।
५) योगस्तदुच्यते = योगः + तत् + उच्यते ।

## समासविग्रहः ।

१) आसेतुहिमाचलम् - सेतोः आरभ्य हिमाचलपर्यन्तम् । अव्ययीभावः ।

२) अर्थहीनाः – अर्थेन हीनाः । तृतीया-तत्पुरुषः ।
३) चिन्तनमग्नाः – चिन्तने मग्नाः । सप्तमी-तत्पुरुषः ।
४) वर्णविपर्ययः – वर्णयोः विपर्ययः । षष्ठी-तत्पुरुषः ।

## रूपपरिचयः ।

१) जग्मुः – गम्-गच्छ् (१ प.प.), लिट्, प्रथमपुरुषः, बहुवचनम् ।
२) ऊचुः – ब्रू (२ उ.प., अत्र प.प.), वच् (२ प.प.), लिट्, प्रथमपुरुषः, बहुवचनम् ।
३) निर्ब्रूयात् – निर् + ब्रू (२ उ.प., अत्र प.प.), विधिलिङ्, प्रथमपुरुषः, एकवचनम् ।
४) पप्रच्छुः – प्र + पृच्छ्-प्रच्छ् (६ प.प.), लिट्, प्रथमपुरुषः, बहुवचनम् ।
५) जगाद – गद् (१ प.प.), लिट्, प्रथमपुरुषः, एकवचनम् ।
६) उच्यते – ब्रू (२ उ.प.), वच् (२ प.प.), कर्मणि लट्, प्रथमपुरुषः, एकवचनम् ।
७) प्रकाशयन्ति – प्र + काश् (१ आ.प.), णिजन्तम्, लट्, प्रथमपुरुषः, बहुवचनम् ।
८) चक्रुः – कृ (८ उ.प., अत्र प.प.), लिट्, प्रथमपुरुषः, बहुवचनम् ।
९) भ्रमति – भ्रम् (१ प.प.), लट्, प्रथमपुरुषः, एकवचनम् ।
१०) भजध्वे – भज् (१ उ.प., अत्र आ.प.), लट्, मध्यमपुरुषः, बहुवचनम् ।

## भाषाभ्यासः ।

### १. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।

१) निर्वचनस्य पञ्च विधाः सन्ति ।
२) अपि भारतीयभाषास्थितानां शब्दानां निर्वचनं कर्तुं शक्यम्?

### २. उचितं कारणं चित्वा वाक्यानि पुनर्लिखत ।

**१) शब्दानाम् उपयोगः योग्यः भवेत्, यतः ... ।**
अ) शब्दरूपं भाषायाः शरीरम् ।
ब) शब्दाः शक्तिस्वरूपाः ।

**२) संस्कृतेतरभाषाः चकितचकिताः अभवन्, यतः ... ।**
अ) तासु अतीव लघुसङ्ख्याः वर्तन्ते ।
ब) संस्कृतशब्दानाम् इतरभाषाशब्दैः च साम्यं वर्तते ।

**३) सर्वाः भाषाः समानाः भवन्ति, यतः ... ।**
अ) सर्वाः भाषाः नूतनाः भवन्ति ।
ब) भाषासु न कापि ज्येष्ठा कनिष्ठा वा ।

### ३. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

**१) सरस्वती भाषाः अवदत् – .............. ।**
अ) भाषायाः शरीरं शब्दरूपम्, आत्मा अर्थरूपः ।
ब) भाषायाः शरीरं अर्थरूपम्, आत्मा शब्दरूपः ।

**२) निरुक्तं शब्दानां – .............. ।**
अ) निर्मितेः इतिहासं निःशेषं कथयति ।

ब) वर्तमानम् अर्थम् एव प्रकाशयति ।

**४. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।**

१) मह्या: रोहति इति – ☐

२) निरुक्तग्रन्थस्य कर्ता – ☐

३) निरुक्तग्रन्थस्य प्रतिपाद्य: विषय: – ☐

**५. पूर्णवाक्येन उत्तरं लिखत ।**

१) किं नाम भाषाया: आत्मा?

२) के शक्तिस्वरूपा:?

३) भाषाया: वैभवं किम्?

४) निर्वचनस्य कति विधा: सन्ति?

५) निर्वचनं नाम किम्?

६) के अर्थप्रकाशका:?

७) 'भ्रमर:' इति शब्द: कस्मात् धातो: आगत:?

**६. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।**

१) सर्वा: भारतीयभाषा: देवीं पार्वतीं जग्मु: ।

२) शब्दरूपं भाषाया: आत्मा ।

३) समानार्थक-शब्दानां मूलार्था: अपि चिन्तनीया: ।

४) मराठीभाषा वदति, 'बिराल' ।

५) भास्कराचार्येण निरुक्तग्रन्थ: लिखित: ।

६) सर्वेषां शब्दानां निर्वचनं भवितुम् अर्हति एव ।

७) लौकिक-वैदिक-संस्कृतशब्दानां निर्वचनं कर्तुं शक्यते ।

**७. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।**

१) भारतीयभाषा: सरस्वतीं जग्मु: ।

२) भारते विराजमाना: सर्वा: भाषा: श्रेष्ठा: ।

३) शब्दा: सर्वदा अर्थपूर्णा: भवेयु: ।

४) भाषासु समानसूत्रं वर्तते ।

५) अमरकोषात् ध्वनि: प्रस्फुरित: ।

६) निरुक्तं शब्दानां निर्मिते: इतिहासं कथयति ।

७) यूयं सर्वा: भगिनीभावं भजध्वे ।

**८. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) सर्वा: ताम् ऊचु: । (सरस्वती)

२) शब्दा: सर्वदा अर्थपूर्णा: भवेयु: । (एतद्)

३) अमरकोषात् ध्वनि: प्रस्फुरित: । (इदम्)

४) शब्दानां मूलार्थप्रतिपादनम् एव भाषाया: वैभवम् । (तद्)

५) यास्काचार्येण निरुक्तग्रन्थे निरूपितम् अस्ति । (तद्)
६) भाषा: तां पप्रच्छु: । (सरस्वती)
७) पुष्पाणि परित: भ्राम्यति एष: । (भ्रमर)

## ९. विशेषण–विशेष्याणां मेलनं कुरुत ।

| अ | आ |
|---|---|
| १) श्रेष्ठा: | संस्कृतेतरभाषा: |
| २) कोषगता: | क्रम: |
| ३) यथोचित: | उपयोग: |
| ४) चकितचकिता: | इतिहासम् |
| ५) विपर्यस्त: | विषय: |
| ६) लुप्ता: | भाषा: |
| ७) प्रतिपाद्य: | वर्णा: |
| ८) नि:शेषम् | शब्दा: |

## १०. सन्धितालिकां पूरयत ।


१) धातोस्तदर्थातिशयेन = ........+......... ।
२) .................. = योग: + तत् + उच्यते ।

## ११. पृथक्करणं कुरुत ।

**(अ) कोष्टकं पूरयत ।**

| | |
|---|---|
| १) मराठीशब्द: | ................. |
| २) संस्कृतशब्द: | ................. |
| ३) बाङ्ग्लाशब्द: | ................. |
| ४) गुजरातीशब्द: | बिलाडी |
| ५) हिन्दीशब्द: | ................. |

**(आ) जालरेखाचित्रं पूरयत ।**



**उपक्रमः –**

१) भारतीयसंविधानस्य अष्टमे परिशिष्टे समाविष्टाः भाषाः काः ?

२) अधोलिखितशब्दानां व्युत्पत्तिः निरुक्तग्रन्थात् अन्विष्य लिखत–
पृथ्वी, मेघः, इन्द्रः, अश्वः, तृणम् ।

***

## ज्ञानरञ्जनी

### अष्टावधानम्

अष्टावधानम् इति वाङ्मयेन सम्बद्धा प्राचीना क्रीडा स्पर्धा । वेदानाम् अध्ययनं तथा पठनं निर्दोषं भवतु इत्यतः पठनस्य विविधाः पद्धतयः तथा च विविधानि तन्त्राणि प्रयुक्तानि आसन् । वेदैः सह तन्त्राणि अपि परम्परया रक्षितानि । न केवलं तावदेव अपि च आधुनिककाले विशेषतः तेलङ्गाणे, आन्ध्रप्रदेशे च विद्वद्भिः तेषां तन्त्राणां पुनरुज्जीवनं कृतम्। –

* एकवारं कथितः पाठ्यांशः स्मरणीयः।
* निर्दिष्टविषये अनुक्षणं काव्यरचना करणीया।
* तस्यां काव्यरचनायां सूचनानुसारं विशिष्टस्य वृत्तस्य प्रयोगः करणीयः।
* श्लोके विशिष्टप्रकारस्य अक्षररचना साधनीया।
* तत्समये निर्दिष्टस्य विषयस्य विवेचनं करणीयम्।
* असम्बद्धतया पृष्टानां प्रश्नानाम् उत्तराणि दातव्यानि।

एतादृशानि विविधानि कौशल्यानि अष्टावधाने समाविष्टानि। एवम् अष्टतः अधिकानि, षोडश अवधानानि तथा च अपवादात्मकरीत्या शतम् अवधानानि साधयन्तः विद्वांसः जनाः अद्यापि सन्ति। एतत् साधयन् जनः अवधानी इति कथ्यते। ततः च अवधानी इति अस्य जनस्य कुलस्य उपनाम भवति। अवधानिनं जनं प्रश्नं पृच्छतां विदुषां पृच्छकाः इति संज्ञा । अष्टावधानस्य कार्यक्रमस्य त्रीणि आवर्तनानि भवन्ति। यदा प्रथमद्वितीययोः आवर्तनयोः उपरिनिर्दिष्टानि कौशल्यानि परीक्ष्यन्ते तदा अन्यैः प्रश्नैः सह नूतनस्य श्लोकस्य प्रथमद्वितीयपादौ रचितौ भवतः। तथा च अन्तिमे आवर्तने तृतीयचतुर्थौ चरणौ रचितौ भवतः। कार्यक्रमस्य अन्ते पृच्छकैः पृष्टानां सर्वेषां प्रश्नानाम् उत्तराणि पुनः संपूर्णतया कथ्यन्ते । अष्टावधानस्य कार्यक्रमे साधारणतः अधोनिर्दिष्टानाम् अवधानानां प्रात्यक्षिकम् एकसमयावच्छेदेन समान्तरपद्धत्या क्रियते।

१) निषिद्धाक्षरी – निर्दिष्टविषये श्लोकरचनां कुर्वतः अवधानिनः प्रत्येकम् अक्षरे रोधः क्रियते। अग्रिमम् अक्षरं किं न भवतु इति कश्चन पृच्छकः आदिशति। तदनुसारम् अवधानी श्लोकरचनां पूर्णां करोति।

२) समस्यापूर्तिः – श्लोकस्य अन्तिमः पादः दत्तः अस्ति। पूर्वस्य पादत्रयस्य रचना अवधानिना कर्तव्या ।

३) दत्तपदी – चत्वारि पदानि श्लोकरचनार्थं दत्तानि । तानि प्रयुज्य श्लोकरचना कर्तव्या ।

४) वर्णनम् – निर्दिष्टविषये काव्यात्मकं विवेचनम् अवधानिना करणीयम्।

५) न्यस्ताक्षरी – दत्तानि चत्वारि अक्षराणि विशिष्टस्थाने योजयित्वा श्लोकरचना कर्तव्या।

६) आशुकवनम् – प्रतिवारं निर्दिष्टविषये एकः सम्पूर्णः श्लोकः अवधानिना रचयितव्यः।

७) पुराणपठनम् – प्राचीनवाङ्मयतः कश्चन श्लोकं पृच्छकः कथयति। अवधानिना तस्य श्लोकस्य विवेचनं पुराणस्य पद्धत्या करणीयम् ।

८) अप्रस्तुतप्रसङ्गः – उपरिनिर्दिष्टा परीक्षा यदा प्रचलति तदा अवधानिनः एकाग्रतां विचलितां कर्तुं पृच्छकः स्वैरतया प्रश्नं पृच्छति। तस्य उत्तरम् अवधानिना तदानीमेव दातव्यम् ।

# द्वितीयः पाठः । प्राचीनकाले प्रसाधनम् ।

**भूमिका** – प्रसाधनं कस्मै न रोचते? संस्कृतेः उषःकालादारभ्य अद्यतनीयं कालं यावत् मनुष्यः प्रसाधनप्रियः। सिन्धु-संस्कृति-विषयकेषु उत्खननेषु एका प्रसाधनपेटिका अपि उपलब्धा । प्राचीनकालात् ज्ञायते, यत् स्त्रियः प्रसाधनैः अलङ्करणं कृत्वा उत्सवेषु विलसन्ति स्म। रामायणे अनसूया सीतायै गन्धान् (perfumes) उपहृतवती इति उल्लिखितमस्ति । महाभारते द्रौपदी सैरन्ध्रीरूपेण सुदेष्णायाः प्रसाधनम् अकरोत् । कौटिलीये अर्थशास्त्रे, पुराणेषु तथा जातककथासु अपि प्रसाधनस्य कानिचन अङ्गानि वर्णितानि । आयुर्वेदग्रन्थैः प्रसाधनानाम् आरोग्यदृष्ट्या विवरणं कृतम् । प्रसाधनानां निर्माणविधयः अपि विविधग्रन्थेषु स्पष्टीकृताः। अजन्ता-वेरुल-गुहासु चित्रशिल्पेष्वपि प्रसाधिताः जनाः दृश्यन्ते ।

केश-त्वक्-मुख-नखादीनां शरीरावयवानां सौन्दर्यवर्धनम्, केशरचना, वस्त्रपरिधारणम्, भूषणधारणम्, गन्धयुक्त्यादयः सन्ति प्रसाधनकलायाः घटकाः ।

प्रसाधनं नाम मानवजीवनस्य महत्त्वपूर्णम् अङ्गम् । न केवलम् अद्यतनीये काले, अपि तु प्राचीनकालेऽपि जगत्यस्मिन् सर्वत्र सर्वे स्त्रीपुरुषाः प्रसाधनप्रियाः। वेदादिषु, ऋतुसंहार-मेघदूत-गाहासत्तसई-आदिषु संस्कृत-प्राकृतकाव्येषु तथा मानसोल्लास-बृहत्संहितादिषु शास्त्रग्रन्थेषु प्रसाधनकला वर्णिता। बौद्धवाङ्मये ललितविस्तरादिषु ग्रन्थेष्वपि प्रसाधनानां बहवः सन्दर्भाः प्राप्यन्ते। पुरातने कालेऽपि सौन्दर्यस्पर्धानाम् आयोजनं भवति स्म यथा 'जनपदकल्याणी' ('Lady of the Land') नगरसौभिनी ('Beauty of the town') ।

चित्रशिल्पेषु नैकविधाः प्रसाधनपराः जनाः दृश्यन्ते। तथा उत्खननेषु अपि प्राचीनानि प्रसाधनसाधनानि प्राप्तानि। अनेन सुष्ठु ज्ञायते यद् अतिप्राचीनकालादेव भारते न केवलं स्त्रियः, किन्तु पुरुषाः अपि प्रसाधनकलायां निपुणाः । तदर्थं विविधप्रसाधनसाहित्यस्य प्रभूतम् उपयोजनं भारतीयाः कृतवन्तः।

याः चतुष्षष्टिकलाः सुविदिताः, तास्वपि नैकाः प्रसाधनकलाः निर्दिष्टाः। मर्दनं, विलेपनं, केशभूषा, माल्यभूषा, परिधेयं, गन्धयुक्तिः, अलङ्करणम् इत्यादीनि प्रसाधनकलायाः षोडश अङ्गानि सन्ति ।

प्रसाधनस्य द्वौ विभागौ-आन्तरिकप्रसाधनं तथा बाह्यप्रसाधनम्। शरीरस्य निरामयत्वं नाम आन्तरिकप्रसाधनम्। तद् उचिताहार-निद्रा-जलपान-व्यायामादिकैः अवश्यमेव साध्यम्। तदनन्तरमेव बाह्यप्रसाधनानाम् उपयोजनं कर्तव्यम्। दन्तधावनं, केशसम्मार्जनं, स्नानं तथा विलेपनं प्रतिदिनं करणीयम् इति उचितमेव उपदिष्टं प्राचीनैः। स्नानार्थं फेनकं तथा वनौषधियुतानि चूर्णकानि उपलब्धानि । विलेपनेन त्वक् उज्ज्वला मृदुतरा च भवति, तथा दुर्गन्धनाशनमपि शक्यम् । ऋतुम् अनुसृत्य प्रसाधनं करणीयम् इत्यपि सूचितम्, यथा ग्रीष्मकाले चन्दनविलेपनम्, कार्पासवस्त्रपरिधानम्, मौक्तिकमालाधारणं च योग्यम्। शिशिरे ऊर्णावस्त्रं, कृष्णागरुधूपनं तथा कुङ्कुममण्डनम् उपयुक्तम् ।








केशसंवर्धनस्य कृते ब्राह्मी-आमलक-भृङ्गादि-वनौषधियुक्तेन तैलेन शिरोमर्दनम् आवश्यकम् । वराहमिहिरेण बृहत्संहितायाम् उक्तम्-

''स्रग्गन्धधूपाम्बरभूषणाद्यं न शोभते शुक्लशिरोरुहस्य ।'' (बृहत्संहिता ७७.१)

अतः शुक्लकेशानां कृष्णीकरणम् तेनोपदिष्टम् । 'तदुपायेन बकस्य पक्षौ अपि कृष्णवर्णौ भवतः, किं पुनः कुन्तलविषये ?' इति तस्य गर्वोक्तिः।

केशधूपकृते स्वेदयूकादीनां नाशो भवति तथैव केशाः सुगन्धेन विराजन्ते । चूडा-वेणी-आम्रातक-धम्मिल्लादयः केशरचनाविशेषाः माल्य-मुक्ताजालादिभिः आभरणैः रमणीयतराः दृश्यन्ते ।

मुखसौन्दर्यस्य कृते बहवः कल्पाः प्रसिद्धाः । हरिद्रामधुमिश्रितेन मुखलेपेन तथा लोध्रपुष्पपरागचूर्णेन मुखकान्तिः शालते । ललाटे शुभ्र-रक्त-कृष्णवर्णैः आरेखणीयः तिलकविशेषः। सिक्थयुक्तेन अलक्तकेन अथवा ताम्बूलेन ओष्ठौ रञ्जनीयौ । कज्जलशलाकया नेत्रयोः अलङ्करणं तथा पत्रावलीरेखणेन कपोलयोः अलङ्करणं कर्तव्यम् । नखरागेण तथा अलक्तकेन करचरणाः प्रसाधनीयाः ।

बाणकविना हर्षचरिते दुकूल-कौशेय-चीनांशुक-क्षौमादयः पटभेदाः निरूपिताः । वस्त्राणां रञ्जनं, मुक्तामणिभिः तथा भक्तिभिः सुशोभनमपि वर्णितं तेन । नागपत्तनं, प्रतिष्ठाननगरं, काशीपुरं, तथा कलिङ्ग-वङ्ग-अङ्ग-चोलादिप्रदेशाः, चीन-सिंहलादिदेशाः प्रसिद्धाः नानाविधवस्त्राणां निर्माणे ।

प्रसाधनस्य परमोत्कर्षः नाम भूषणविन्यासः। हेम-रजत-गजदन्त-शङ्खशुक्ति-मौक्तिक-रत्नादिभिः अलङ्काराणां निर्माणं भवति। भरतमुनिना वर्णितं चतुर्विधम् अलङ्करणं तथा तस्य कतिपयानि उदाहरणानि ईदृशानि सन्ति (भरतनाट्यशास्त्रम्-२१.१२-१४) -

आवेध्यम् - कुण्डले, नासामौक्तिकम् ।
बन्धनीयम् - केयूरम्, मेखला ।
आरोप्यम् - बहुविधाः हाराः, चूडामणिः ।
प्रक्षेप्यम् - नूपुरौ, कङ्कणानि ।

'बहुभूषणं खेदकरम्, लघुभूषणं श्लाघ्यम्' एतदपि सूचितं भरतमुनिना । (नाट्यशास्त्रम्-२१.४६-४८)

सुगन्धीनि मृदुतराणि पुष्पभूषणान्यपि सर्वलोकप्रियाणि । यदि अशोक-कर्णिकार-सिन्दुवारादि-कुसुमालङ्काराः धार्यन्ते, तर्हि अनुक्रमेण माणिक्य-सुवर्ण- मौक्तिकादिभिः किं प्रयोजनम् ?

दैनन्दिनजीवने प्रसाधनानि उपयुज्यन्ते एव, किन्तु विवाहादिषु तथैव उत्सवप्रसङ्गेषु जनाः विशेषेण प्रसाधनपराः भवन्ति । प्राचीनप्रसाधनविषये अयं विशेषः लक्षणीयः नाम नैसर्गिकतया उपलब्धानां प्रसाधनानां प्राचुर्यम् । मानसोल्लासग्रन्थे प्राकृतिकसामग्र्या विलेपन-चूर्णक-तैल-गन्धादिकानां निर्माणं वर्णितम् । कृतकानि तथा रसायनबहुलानि प्रसाधनानि तत्र न दृश्यन्ते। आधुनिककालेऽपि अस्माभिः एतत् सुष्ठु अवधारणीयम् अनुकरणीयं च ।

(लेखनसाहाय्यम्-डॉ. स्मिता होटे ।)

## वाग्विशेषः ।

१. चतुष्षष्टिकलाः – वात्स्यायनेन कामसूत्रम् इति ग्रन्थे चतुष्षष्टिकलानां वर्णनं कृतम् । शुक्रनीतिसारग्रन्थेऽपि ताः वर्णिताः । आलेख्यम् (चित्रकला), पुस्तकवाचनम्, तक्षणकर्माणि, देशभाषाविज्ञानम्, अभिधानकोषः, संवाहनम्, बालक्रीडनकानि, माल्यग्रथनम् इत्यादयः । तासु षोडशकलाः प्रसाधनकलायाम् अन्तर्भूताः ।

२. दुकूल–कौशेय–चीनांशुक–क्षौमादयः 'पट्टस्य' (रेशीम/silk) प्रकारविशेषाः । तेषु केचन वनस्पतिजाः तथा केचन कीटजाः ।

३. भक्तिः – विविधवर्णैः पुष्पपत्रावलिरेखणेन सुशोभीकरणम् । यथा– भक्तिच्छेदैरिव विरचिता भूतिमङ्गे गजस्य । (मेघदूतम्–पूर्वमेघः १९)

४. कविश्रेष्ठाय कालिदासाय सुवर्णरत्नाभूषणापेक्षया पुष्पशृङ्गारः अधिकतरं रोचते इति प्रतिभाति । यथा–
अशोकनिर्भत्सितपद्मरागम् आकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्दुवारं वसन्तपुष्पाभरणं वहन्ती ।। (कुमारसंभवम्, ३.५३)

५. ऋत्वनुसारं पुष्पाणि प्रसाधनार्थं योज्यन्ते स्म । यथा–
हस्ते लीलाकमलमलके बालकुन्दानुविद्धं, नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं, सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ।। (मेघदूतम्–उत्तरमेघः २)

६. लोध्रपुष्पम् – शुभ्रवर्णं पुष्पम् । तस्य परागान् उपयुज्य मुखलेपार्थं चूर्णं निर्मीयते स्म ।

## शब्दार्थः ।

१) भृङ्गः – मार्कवः । (माका/eclipta alba)
२) कपोलः – गण्डः । (गाल/cheek)
३) धम्मिल्लः – अलङ्कृतं वेणीबन्धनम् ।
४) परिधेयम्/अम्बरम् – वस्त्रम् ।
५) गन्धयुक्तिः – सुगन्धिद्रव्यनिर्माणम् ।
६) कुङ्कुमम् – काश्मीरजम् । (केशर/saffron)
७) स्रक् – माला ।
८) शिरोरुहः – केशः ।
९) आम्रातकः – विशिष्टः केशबन्धः ।
१०) कल्पाः – मुखलेपाः ।
११) सिक्थः – मधूच्छिष्टम् । (मेण/wax)
१२) अशोकः – रक्तपुष्पयुक्तः वृक्षः ।
१३) कर्णिकारः – पीतपुष्पयुक्तः वृक्षः ।
१४) सिन्दुवारः – शुभ्रपुष्पयुक्तः वृक्षः ।

## सन्धिविग्रहः ।

१) प्राचीनकालेऽपि = प्राचीनकाले + अपि ।
२) जगत्यस्मिन् = जगति + अस्मिन् ।

३) सुविदितैव = सुविदिता + एव ।

### समासविग्रहः ।

१) स्त्रीपुरुषाः - स्त्रियः च पुरुषाः च । इतरेतर-द्वन्द्वः ।
२) प्रतिदिनम् - दिने दिने । अव्ययीभावः ।
३) स्नानार्थम् - स्नानाय इदम् । चतुर्थी-तत्पुरुषः ।
४) वनौषधियुतानि - वने उपलब्धाः ओषधयः, वनौषधयः । मध्यमपदलोपि-कर्मधारयः ।
वनौषधिभिः युतानि । तृतीया-तत्पुरुषः ।
५) शिरोमर्दनम् - शिरसः मर्दनम् । षष्ठी-तत्पुरुषः ।
६) शुक्लशिरोरुहस्य - शुक्लाः शिरोरुहाः यस्य सः, तस्य । बहुव्रीहिः ।
७) गर्वोक्तिः - गर्वपूर्णा उक्तिः । मध्यमपदलोपि-कर्मधारयः ।

### रूपपरिचयः ।

१) दृश्यन्ते - दृश्-पश्य् (१ प.प.), कर्मणि, लट्, प्रथमपुरुषः, बहुवचनम् ।
२) कृतवन्तः - कृ (८ उ.प.), क्तवतु-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा बहुवचनम् ।
३) कर्तव्यम् - कृ (८ उ.प.), कृत्य-प्रत्ययान्त-विशेषणम्, नपुंसकलिङ्गम्, प्रथमा, द्वितीया एकवचनम्।
४) करणीयम् - कृ (८ उ.प.), कृत्य-प्रत्ययान्त-विशेषणम्, नपुंसकलिङ्गम्, प्रथमा, द्वितीया एकवचनम्।
५) अनुसृत्य - अनु + सृ (१ प.प.), पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययम् ।
६) उक्तम् - ब्रू (२ उ.प.), वच् (२ प. प.) क्त-प्रत्ययान्त-विशेषणम्, नपुंसकलिङ्गम्, प्रथमा, द्वितीया एकवचनम् ।
७) विराजन्ते - वि + राज् (१ उ.प. अत्र आ.प.), लट्, प्रथमपुरुषः, बहुवचनम् ।
८) शालते - शाल् (१ आ.प.), लट्, प्रथमपुरुषः, एकवचनम् ।
९) निरूपिताः - नि + रूप् (१० प.प), क्त-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा, बहुवचनम्, स्त्रीलिङ्गम्, प्रथमा, द्वितीया बहुवचनम् ।
१०) ज्ञायते - ज्ञा (९ उ.प.), कर्मणि, लट्, प्रथमपुरुषः, एकवचनम् ।
११) वर्णितम् - वर्ण् (१० उ.प.), क्त-प्रत्ययान्त-विशेषणम्, नपुंसकलिङ्गम्, प्रथमा द्वितीया एकवचनम्।
१२) उपदिष्टम् - उप + दिश् (६ उ.प.), क्त-प्रत्ययान्त-विशेषणम्, नपुंसकलिङ्गम्, प्रथमा, द्वितीया एकवचनम्।
१३) अवधारणीयम् - अव + धृ (१० उ.प.), कृत्य-प्रत्ययान्त-विशेषणम्, नपुंसकलिङ्गम् प्रथमा, द्वितीया एकवचनम् ।

### भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) तदर्थं विविधप्रसाधनसाहित्यस्य प्रभूतम् उपयोजनं भारतीयाः कृतवन्तः ।
२) प्रसाधनस्य द्वौ विभागौ ।
३) ऋतुम् अनुसृत्य प्रसाधनं करणीयम् ।

## २. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।

**१) प्राय: सर्वे जना: प्रसाधनं कुर्वन्ति, यत: ... ।**

अ) जना: प्रसाधनप्रिया: ।

आ) प्रसाधनै: विना जीवितुं न शक्यते ।

**२) ऋतुम् अनुसृत्य एव प्रसाधनं क्रियते, यत: ... ।**

अ) ऋतुविरुद्धं प्रसाधनं कर्तुं न शक्यते ।

आ) ऋतुविरुद्धं प्रसाधनं हिताय न भवति ।

**३) केशधूपनं काले काले कर्तव्यम्, यत: ... ।**

अ) केशधूपनेन विना प्रसाधनं न शोभते ।

आ) केशधूपनेन स्वेदयूकादय: नश्यन्ति ।

## ३. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

**१) उचिताहार-निद्रा-जलपान-व्यायामादिकै: - .............. ।**

अ) बाह्यप्रसाधनं साध्यम् ।

ब) आन्तरिकप्रसाधनं साध्यम् ।

**२) ऋतुम् अनुसृत्य प्रसाधनम् - .............. ।**

अ) ग्रीष्मकाले कृष्णागरुधूपनं शिशिरकाले चन्दनविलेपनम् ।

ब) ग्रीष्मकाले चन्दनविलेपनम्, शिशिरकाले कृष्णागरुधूपनम् ।

**३) प्राचीनप्रसाधनानां विशेष: यत् तत्र - .............. ।**

अ) कृतकानां रसायनबहुलानां प्रसाधनानां प्राचुर्यम् ।

ब) नैसर्गिकप्रसाधनानां प्राचुर्यम् ।

## ४. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

१) सुविदितानां कलानां सङ्ख्या - [ ]

२) प्राचीनकाले आयुज्यमाना एका सौन्दर्यस्पर्धा - [ ]

३) प्रसाधनकलाया: षोडश-अङ्गेषु एकम् - [ ]

४) एकं बाह्यप्रसाधनम् - [ ]

५) एक: केशरचनाविशेष: - [ ]

६) प्रसाधनस्य परमोत्कर्ष: - [ ]

७) गाहासत्तसई वर्णिता - [ ]

८) वनौषधियुतै: चूर्णकै: विलेपनेन मृदुतरा भवति - [ ]

## ५. पूर्णवाक्येन उत्तरं लिखत ।

१) प्रसाधनकला केषु काव्येषु वर्णिता अस्ति?

२) प्रसाधनकलाया: कति अङ्गानि सन्ति?

३) केशसंवर्धनस्य कृते किम् आवश्यकम्?

४) केशधूपनेन किं भवति?
५) मुखे केन गौरकान्ति: शालते?
६) केन ओष्ठौ रञ्जनीयौ?
७) करचरणा: कथं प्रसाधनीया:?
८) हर्षचरिते के पटभेदा: निरूपिता:?
९) प्राचीनप्रसाधनविषये क: विशेष: लक्षणीय:?

**६. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।**

१) प्रसाधनं नाम मानवजीवनस्य महत्त्वपूर्णम् अङ्गम् ।
२) प्रसाधनकलाया: चतुष्षष्टि: अङ्गानि सन्ति ।
३) मुखसौन्दर्यस्य कृते बहव: कल्पा: प्रसिद्धा ।
४) प्रसाधनस्य परमोत्कर्ष: नाम केशसंवर्धनम् ।

**७. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।**

१) चित्रशिल्पेषु नैकविधा: प्रसाधनपरा: जना: दृश्यन्ते ।
२) प्रसाधनकलाया: षोडश अङ्गानि सन्ति ।
३) शिशिरे ऊर्णावस्त्रं कृष्णागुरुधूपनं तथा कुङ्कुममण्डनम् उपयुक्तम् ।
४) विलेपनेन त्वक् उज्ज्वला मृदुतरा च भवति ।
५) मुखसौन्दर्यस्य कृते बहव: कल्पा: प्रसिद्धा: ।

**८. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) वेदपूर्वकालादेव न केवलं स्त्रिय: किन्तु पुरुषा: अपि प्रसाधनकलायां निपुणा: । (तद्)
२) तासु प्रसाधनविषयका: नैका: कला: निर्दिष्टा: । (चतुष्षष्टिकला)
३) प्रसाधनस्य द्वौ विभागौ–आन्तरिकप्रसाधनं तथा बाह्यप्रसाधनम् । (तद्)
४) ऋतुम् अनुसृत्य प्रसाधनं करणीयम् इति सूचितम् । (एतद्)
५) कज्जलशलाकया तयो: अलङ्करणं कर्तव्यम् । (नेत्र)

**९. विशेषण–विशेष्याणां मेलनं कुरुत ।**

| अ | आ |
|---|---|
| १) प्रसाधनप्रिया: | बहुभूषणम् |
| २) षोडश | चूर्णकानि |
| ३) वनौषधियुतानि | त्वक् |
| ४) उज्ज्वला | अलङ्करणम् |
| ५) चतुर्विधम् | अङ्गानि |
| | जना: |


**१०. सन्धितालिकां पूरयत ।**

१) जगत्यस्मिन् = जगति +......... ।
२) ......... = सुविदिता + एव ।


## ११. पृथक्करणं कुरुत ।

**(अ) जालरेखाचित्रं पूरयत ।**


१)




२)




३)



**(आ) मञ्जूषातः उचितं शब्दं चित्वा तालिकां पूरयत ।**

१)

| आन्तरिकप्रसाधनम् | बाह्यप्रसाधनम् |
|---|---|
| | |
| | |

(निद्रा, स्नानम्, केशसम्मार्जनम्, व्यायामः)

२)

| ग्रीष्मऋतुः | शिशिरऋतुः |
|---|---|
| | |
| | |

(ऊर्णावस्त्रम्, कार्पासवस्त्रपरिधानम्, कृष्णागरुधूपनम्, मौक्तिकमालाधारणम्)

३)

| केन | किम् |
|---|---|
| ............................ | यूकानाशः |
| ............................ | केशसंवर्धनम् |
| लोध्रपुष्पपरागचूर्णेन | ............................ |
| ..................... | ओष्ठरञ्जनम् |
| प्राकृतिकसामग्र्या | ............................ |
| ............................ | नेत्रालङ्करणम् |
| ............................ | स्नानम् |
| विलेपनेन | ............................ |

(वनौषधियुक्ततैलेन, मुखवर्णकान्तिः, केशधूपनेन, प्रसाधननिर्माणम्, कज्जलशलाकया, दुर्गन्धनाशनम्, ताम्बूलेन, फेनकेन)

**उपक्रमः –**

१) आधुनिककाले उपयुज्यमानानि प्राचीनानि प्रसाधनानि अन्विष्यत ।

२) चतुर्विधानाम् अलङ्करणानां चित्राणि सङ्गृह्णीत ।

***

# तृतीयः पाठः । प्रजापालनार्थं राजकर्तव्यानि ।



**भूमिका** – प्राचीनभारते बहूनि शास्त्राणि विकसितानि। तेषु अन्यतमं शास्त्रम् अस्ति राजनीतिशास्त्रम् । एतत् शास्त्रम् 'अर्थशास्त्रम्' इति नाम्ना प्रसिद्धम् । राजनीतिविषयकाणां तत्त्वानां विमर्शः वेदेषु तथा रामायण-महाभारतादिषु बहुषु ग्रन्थेषु दृश्यते । शास्त्ररूपेण तेषां ग्रथनं प्रथमतः कौटिल्यविरचिते 'अर्थशास्त्रम्' इति ग्रन्थे प्राप्यते। ग्रन्थस्य कालविषये मतभिन्नता वर्तते । किन्तु ख्रिस्ताब्दपूर्वं चतुर्थं शतकम् इति तस्य कालः नैकैः विद्वद्भिः निर्णीतः । अर्थशास्त्रं नाम राजनीतिविषयकः ज्ञानकोषः एव । तत्र राज्ञः अध्ययनं, दिनचर्या, राजकर्तव्यानि, अमात्यनियुक्तिः, गूढपुरुषनियुक्तिः, परराज्यसम्बन्धः, युद्धम् इत्यादयः नैके विषयविभागाः सन्ति। अस्य ग्रन्थस्य प्रभावः उत्तरकालीनेषु सर्वेषु राज्यशास्त्रग्रन्थेषु दृश्यते।

राज्ञः प्रथमं तथा परमं कर्तव्यं नाम प्रजापालनम् । तदेव राज्ञः तथा राज्यव्यवस्थायाः परमोच्चं ध्येयम् इति कौटिल्येन वारं वारं प्रतिपादितम् । तदर्थं राज्ञा किं किं कर्तव्यं तदस्मिन् सम्पादिते पाठे वर्णितम् । एतत् सर्वम् आधुनिककाले गणराज्यानां सर्वकारैः तथा नागरिकैः अपि सुष्ठु अवधारणीयम् इत्यत्र नास्ति शङ्कालेशः ।

कृषि-पशुपाल्य-वणिज्या च वार्ताः। धान्य-पशु-हिरण्य-कुप्य-विष्टिप्रदानात् औपकारिकी। तया स्वपक्षं परपक्षं च वशीकरोति कोषदण्डाभ्याम् । (१.४.१,२)

**कृषिविषयकाणि कर्तव्यानि –**

करदेभ्यः कृतक्षेत्राणि प्रयच्छेत् । अकृतानि कर्तृभ्यो नादेयानि । अकृषताम् आच्छिद्य अन्येभ्यः प्रयच्छेत् । ग्रामभृतकवैदेहका वा कृषेयुः । धान्य-पशु-हिरण्यैः चैतान् अनुगृह्णीयात् । तान्यनु सुखेन दद्युः। अनुग्रहपरिहारौ चैतेभ्यः कोषवृद्धिकरौ दद्यात्, कोषोपघातकौ वर्जयेत् । अल्पकोषो हि राजा पौरजानपदानेव ग्रसते। निवेशसमकालं यथागतकं वा परिहारं दद्यात् । निवृत्तपरिहारान् पितेवानुगृह्णीयात् । (२.१.८-१८)

सीताध्यक्षः सर्वधान्य-पुष्प-फल-शाक कन्दमूल-वाल्लिक्य-क्षौम-कार्पासबीजानि यथाकालं गृह्णीयात् । (२.२४.१,२) बहुहलपरिकृष्टायां भूमौ (बीजानि) वापयेत् । यथाकालं च सस्यादि जातं जातं प्रवेशयेत् । न क्षेत्रे स्थापयेत् किञ्चित् पलालमपि पण्डितः। (२.२४.३१)

दुर्भिक्षे राजा बीजभक्तोपग्रहं कृत्वाऽनुग्रहं कुर्यात्, दुर्गसेतुकर्म वा भक्तानुग्रहेण, भक्तसंविभागं वा । (४.३.१७) उपहतान् पितेवानुगृह्णीयात् । बाल-वृद्ध-व्यसन्यनाथांश्च राजा बिभृयात् । (२.१.२६)

**सेतुबन्धनविषयकाणि कर्तव्यानि –**

सहोदकम् आहार्योदकं वा सेतुं बन्धयेत् । अन्येषां वा बध्नतां भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात्, पुण्यस्थानारामाणां च । मत्स्य-प्लव- हरितपण्यानां सेतुषु राजा स्वाम्यं गच्छेत् । पूर्वकृतान् सेतुबन्धादिकान् रक्षेत्, नवांश्चाभिप्रवर्तयेत् । (२.१.२०, २१, २४, ३९)

**पशु-वन-विषयकाणि कर्तव्यानि –**

अकृष्यायां भूमौ पशुभ्यो विवीतानि प्रयच्छेत् । (२.२.१) ग्रामान्तरेषु च विवीतं स्थापयेत् । (२.३४.६) अनुदके कूपसेतुबन्धोत्सान् स्थापयेत्, पुष्पफलवाटांश्च । (२.३४.८) स्तेन-व्याल-व्याधिभिः उपहतान्

पशुव्रजान् रक्षेत् । (२.१.३७)

राजा अभयवनानि कारयेत् । प्रदिष्टाभयानाम् अभयवनवासिनां च मृग-पशु-पक्षि-मत्स्यानां बन्धने हिंसायां वा दण्डं कारयेत् । (२.२६.१)

**सूत्रविषयकाणि कर्तव्यानि –**

सूत्राध्यक्ष: सूत्र – वर्म – वस्त्र – रज्जु – व्यवहारं तज्जातपुरुषै: कारयेत् । ऊर्णा – वल्क – कार्पास – तूल–शण–क्षौमाणि च विधवा–न्यङ्गा–कन्या–प्रव्रजिता–वृद्धराजदासीभि: कर्तयेत् । (२.२३.१,२) सूत्रशालां प्रत्युषसि भाण्डवेतनविनिमयं कारयेत् । सूत्रपरीक्षामात्र: प्रदीप: । स्त्रिया मुखसन्दर्शनेऽन्यकार्यसम्भाषायां, वेतनकालातिपातने, अकृतकर्मवेतनप्रदाने च दण्ड: । (२.२३.१२–१४)

## वाग्विशेष: ।

१. वार्ता: – कौटिल्यमतानुसारेण राज्ञा चतस्र: विद्या: पठितव्या:, तासु अन्यतमा वार्ता । वृत्ति: नाम उपजीविका । सा यै: उपायै: साध्यते, ते उपाया: वार्तायाम् अन्तर्भूता: । वार्ताबलेन राजकोषसमृद्धि: भवति तथा सैन्यबलं नाम दण्ड: वर्धते ।
२. तान्यनु सुखेन दद्यु: – राज्ञा कृपारूपेण यद् धनधान्यादिकं कृषिकेभ्य: दीयते, तद् कृषिकै: यथाकालं सौकर्येण प्रत्यर्पितव्यम् ।
३. निवेशसमकालं यथा आगतकं वा–नूतननगरवसनसमये वा तदनन्तरं वा ये जना: तस्मिन् नगरे उषित्वा कृषिकर्म कर्तुमिच्छन्ति, तेभ्य: राज्ञा कश्चित्कालपर्यन्तं परिहारा: दातव्या: ।
४. सीताध्यक्ष: – कृषिविभागस्य मुख्याधिकारी । राज्यशासने विविधविभागानां मुख्याधिकारिण: 'अध्यक्ष' इति संज्ञया कौटिल्येन उल्लिखिता:, यथा सूत्राध्यक्ष: ।
५. आहार्योदकम् – यत्र नैसर्गिका: जलस्रोता: अनुपलब्धा:, तत्र समन्तत: उदकम् आनीय सेतुबन्धा: पूरणीया: ।
६. तज्जातपुरुषै: – तत् (तस्मिन्) नाम सूत्रव्यवहारे जातै: कुशलै: पुरुषै: ।

## शब्दार्थ: ।

१) कुप्यम् – सुवर्णं रजतं च विहाय इतरे धातव: ।
२) विष्टि: (स्त्री.) – श्रमिक:, कर्मकर: ।
३) कृतक्षेत्रम् – सुक्षेत्रम् (सस्यवर्धनाय योग्यम्) ।
४) आदेयानि – हर्तव्यानि ।
५) ग्रामभृतक: – ग्रामसेवक: ।
६) वैदेहक: – वणिक् ।
७) परिहार: – अनुदानम् ।
८) ग्रसते – निगिलति ।
९) वाल्लिक्यम् (विशेषणम्) – वल्ल्यां/लतायां जातम् (फलादिकम्) इति ।
१०) क्षौमाणि – अतसीसूत्राणि । (threads collected from the bush of linseed/flax/जवस)
११) पलालम् – तृणम्, धान्यकल्क: ।
१२) भक्तम् – अन्नम्, भोजनम्, खाद्यम् ।
१३) उपग्रह: – सञ्चय: ।
१४) उपहतान् – पीडितान् ।

१५) सहोदकम् – नैसर्गिकम् उदकम् ।
१६) पुण्यस्थानम् – मन्दिरम्, देवालयः, तीर्थस्थानम् ।
१७) आरामः – उपवनम्, उद्यानम्, वाटिका ।
१८) प्लवः – जलचरः ।
१९) हरितपण्यम् – वनस्पत्यादीनि विक्रेयवस्तूनि ।
२०) स्वाम्यम् – स्वामित्वम्, आधिपत्यम् ।
२१) विवीतम् – धेनूनां कृते तृणस्थली ।
२२) उत्सः – निर्झरः, जलाशयः ।
२३) वाटः – उद्यानम्, वाटिका ।
२४) स्तेनः – चौरः, तस्करः ।
२५) व्यालः – हिंस्रपशुः ।
२६) व्रजः – समूहः ।
२७) वर्म (वर्मन्-नपुं.) – कवचः, संनाहः ।
२८) वल्कः/वल्कम् – वृक्षत्वक् ।
२९) तूलः – शाल्मलीतन्तवः । (शाल्मली-काटेसावर/silk cotton tree)
३०) शणः – (ताग/ Jute) ।
३१) न्यङ्गा – विकलाङ्गा ।
३२) प्रव्रजिता – संन्यासिनी ।

## सन्धिविग्रहः ।

१) नादेयानि = न + आदेयानि ।
२) तान्यनु = तानि + अनु ।
३) पितेवानुगृह्णीयात् = पिता + इव + अनुगृह्णीयात् ।
४) कृत्वाऽनुग्रहम् = कृत्वा + अनुग्रहम् ।
५) व्यसन्यनाथांश्च = व्यसनी + अनाथान् + च ।
६) नवांश्चाभिप्रवर्तयेत् = नवान् + च + अभिप्रवर्तयेत् ।
७) मुखसन्दर्शनेऽन्यकार्यसम्भाषायाम् = मुखसन्दर्शने + अन्यकार्यसम्भाषायाम् ।

## समासविग्रहः ।

१) कोषदण्डाभ्याम् – कोषः च दण्डः च, ताभ्याम्, इतरेतर-द्वन्द्वः ।
२) करदेभ्यः – करं ददाति इति, तेभ्यः, उपपद-तत्पुरुषः ।
३) अनुग्रहपरिहारौ – अनुग्रहः च परिहारः च, इतरेतर-द्वन्द्वः ।
४) कोषोपघातकौ – कोषस्य उपघातकौ, षष्ठी-तत्पुरुषः ।
५) अल्पकोषः – अल्पः कोषः यस्य सः, बहुव्रीहिः ।
६) अकृष्यायाम् – न कृष्या, तस्याम्, नञ्-तत्पुरुषः ।
७) ग्रामान्तरेषु – अन्ये ग्रामाः, तेषु, कर्मधारयः ।
८) अनुदके – न विद्यते उदकं यस्मिन् तत्, तस्मिन्, नञ्-बहुव्रीहिः ।

## रूपपरिचयः ।

१) वशीकरोति - वश + कृ (८ उ.प. अत्र प.प.), च्वि-रूपम्, लट्, प्रथमपुरुषः, एकवचनम् ।
२) प्रयच्छेत् - प्र + दा-यच्छ् (१ प.प.), विधिलिङ्, प्रथमपुरुषः, एकवचनम् ।
३) अनुगृह्णीयात् - अनु + ग्रह् (९ उ.प. अत्र प.प.), विधिलिङ्, प्रथमपुरुषः, एकवचनम् ।
४) दद्युः - दा (३ उ.प. अत्र प.प.), विधिलिङ्, प्रथमपुरुषः, बहुवचनम् ।
५) ग्रसते - ग्रस् (१ आ.प.), लट्, प्रथमपुरुषः, एकवचनम् ।
६) बिभृयात् - भृ (३ प.प.), विधिलिङ्, प्रथमपुरुषः, एकवचनम् ।
७) बन्धयेत् - बन्ध् (९ प.प.), विधिलिङ्, णिजन्तम्, प्रथमपुरुषः, एकवचनम् ।
८) व्याधिभिः - व्याधि इकारान्तम्, पुंलिङ्गम्, तृतीया, बहुवचनम् ।

## भाषाभ्यासः ।

### १. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।

१) निवृत्तपरिहारान् पितेवानुगृह्णीयात् ।
२) सूत्रपरीक्षामात्रः प्रदीपः ।

### २. उचितं कारणं चित्वा वाक्यानि पुनर्लिखत ।

**१) राजा अल्पकोषः न स्यात्, यतः .....।**
अ) सः धान्यं क्रेतुम् असमर्थः स्यात् ।
ब) सः पौरजानपदानेव ग्रसेत ।

**२) विवीतेषु कूपसेतुबन्धोत्सान् स्थापयेत्, यतः .....।**
अ) तत्र पुष्पफलवाटांश्च भवेयुः ।
ब) तत्र नैसर्गिकम् उदकम् अनुपलब्धम् ।

### ३. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

**१) दुर्भिक्षे उपहतान् प्रति राज्ञः वर्तनम् - .............. ।**
अ) पिता इव स्नेहपूर्णं स्यात् ।
ब) खलः इव कठोरपूर्णं स्यात् ।

**२) सूत्राध्यक्षः अकृतकर्मवेतनप्रदाने - .............. ।**
अ) पारितोषकं दद्यात् ।
ब) दण्डं कुर्यात् ।

### ४. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

१) सस्यादिकं यथाकालं गृह्णाति सः - [ ]
२) मत्स्य-प्लव-हरितपण्यानाम् स्वामी - [ ]
३) सूत्र-वर्म-वस्त्र व्यवहारस्य मुख्याधिकारी - [ ]

**५. पूर्णवाक्येन उत्तरं लिखत ।**

१) वार्ता: का: ?
२) करदेभ्य: किं प्रयच्छेत् ?
३) राजा उपहतान् कीदृशम् अनुगृह्णीयात् ?
४) राजा कै: उपहतान् पशुव्रजान् रक्षेत् ?

**६. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।**

१) करदेभ्य: कृतक्षेत्राणि प्रयच्छेत् ।
२) निवृत्तपरिहारान् मित्रमिवानुगृह्णीयात् ।
३) सहोदकम् आहार्योदकं वा सेतुं बन्धयेत् ।
४) अकृष्यायां भूमौ जनेभ्यो विवीतानि प्रयच्छेत् ।
५) राजा उपहतान् पशुव्रजान् रक्षेत् ।

**७. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।**

१) करदेभ्य: कृतक्षेत्राणि प्रयच्छेत् ।
२) दुर्भिक्षे राजा बीजभक्तोपग्रहं कृत्वा अनुग्रहं कुर्यात् ।
३) बाल-वृद्ध-व्यसन्यनाथांश्च राजा बिभृयात् ।
४) ग्रामान्तरेषु राजा विवीतं स्थापयेत् ।

**८. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) निवृत्तपरिहारान् पितेवानुगृह्णीयात् । (तद्)
२) बहुहलपरिकृष्टायां भूमौ बीजानि वापयेत् । (इदम्)
३) राजा सेतुं बन्धयेत् । (भवत्)

**९. विशेषण-विशेष्याणां मेलनं कुरुत ।**

| अ | आ |
|---|---|
| १) अल्पकोष: | भूमौ |
| २) कृषिविषयकाणि | अनुग्रहपरिहारौ |
| ३) कोषवृद्धिकरौ | पशुव्रजान् |
| ४) बहुहलपरिकृष्टायाम् | प्रदीप: |
| ५) उपहतान् | कर्तव्यानि |
| ६) सूत्रपरीक्षामात्र: | राजा |


**१०. सन्धितालिकां पूरयत ।**

१) नादेयानि = ......... + ......... ।
२) ................. = नवान् + च + अभिप्रवर्तयेत् ।


## ११. पृथक्करणं कुरुत ।

**जालरेखाचित्रं पूरयत ।**


१)




२)




३)




**उपक्रम : –**

१) पाठे उल्लिखितेषु प्रजापालनतत्त्वेषु कानि कानि वर्तमाने भारतीयसंविधाने समाविष्टानि? सङ्कलनं कुरुत ।

२) यूट्यूबमाध्यमेन 'चाणक्य' नाम्नीं दूरदर्शनमालिकां पश्यत ।

***

भारतदेशस्य प्राचीनेतिहास-संस्कृतिविषयिणी या ज्ञानशाखा सा भारतविद्या इति नाम्ना विख्याता। प्राचीनभारतवर्षस्य भाषिक-साहित्यिक-भौगोलिक-आर्थिक-सामाजिक-धार्मिक-राजकीयादीनां सर्वेषाम् अङ्गानां सम्यग् अध्ययनं भारतविद्यायां समाविष्टम् । प्राचीनभारतस्य इतिहासस्य अन्वेषणं, सुसङ्गता रचना तथैव भारतीयसंस्कृतिप्रवाहस्य समालोचनम् इति भारतविद्यायाः प्रयोजनम् । भारतविद्यायाः परिक्षेत्रम् अतीव विस्तीर्णम् । तस्याः बहुविधाः शाखोपशाखाः सन्ति। तासु काश्चन अत्र निर्दिष्टाः -

अ) **नाणकशास्त्रम् (Numismatics) -**
प्राचीनभारतस्य इतिहासविषये नाणकशास्त्रस्य स्थानम् अतीव महत्त्वपूर्णम् । १८३७ तमे ख्रिस्ताब्दे प्राचीननाणकानाम् अध्ययनं कृत्वा 'जेम्स् प्रिन्सेप्' अनेन ब्राह्मीलिपी विशदीकृता । शक-क्षत्रप-कुशाण-सातवाहनादीनां राजवंशानां, मालव-शिबि-यौधेयादीनां गणराज्यानां तथा सङ्घ-निगम-जनपदादीनां परिचयः तैः सर्वैः स्वकाले प्रचालितैः नाणकैः एव जातः। गुप्तकालः सुवर्णकालः इति यदुच्यते, तस्य प्रतीतिः तत्कालीनैः सुवर्णनाणकैः एव जायते । 'रोमन'-नाणकानाम् उपलब्धिः भारत-रोम-वाणिज्यं सूचयति । अस्मिन् शास्त्रे डॉ. शोभना-गोखले-महोदयायाः योगदानं महत्त्वपूर्णम्।

आ) **प्रतिमाविद्या/मूर्तिविज्ञानम् (Iconography)-**
मूर्तेः निर्माणविषयकं तथा तस्याः अभिज्ञानविषयकम् इदं शास्त्रं प्राचीनभारते बहु विकसितम् । पुराणानि, आगमग्रन्थाः, साधनमाला-रूपावतार-प्रभृतयः ग्रन्थविशेषाः मूर्तिनिर्माणं विशदीकुर्वन्ति। प्रतिमानाम् अध्ययने प्रतिमायाः संज्ञा, आकृतिः, आसनं, लाञ्छनं, मुद्रा, वाहनं, वर्णः, परिवारः इत्यादीनि अङ्गानि वर्तन्ते । श्री. नी. पु. जोशी-महोदयस्य 'भारतीय मूर्तिशास्त्र' इति ग्रन्थे तथैव डॉ. गो. बं. देगलूरकरमहोदयेन लिखितेषु ग्रन्थेषु मूर्तीनाम् अध्ययनं कथं कर्तव्यम् इति विशदीकृतम्।

इ) **हस्तलिखितशास्त्रम् (Manuscriptology)-**
मुद्रणकलायाः प्राक् हस्तेनैव ग्रन्थाः लिख्यन्ते स्म। भारते अद्यापि शताधिकानि हस्तलिखितानि वर्तन्ते, येषाम् अध्ययनं तथा परिपालनं करणीयम्। तदर्थं हस्तलिखितशास्त्रस्य उदयः जातः । हस्तेन लिखितः अक्षरविन्यासः नाम हस्तलिखितम्। हस्तलिखितानां सङ्कलनं, सूचीकरणं, वाचनं, मुद्रणं, स्पष्टीकरणं, तथैव संरक्षणम् इत्येते विषयाः अस्मिन् शास्त्रे अन्तर्भूताः। कर्गजात् प्राक् भूर्जपत्रेषु, तालपत्रेषु, पटेषु वा लिखितानि हस्तलिखितानि उपलब्धानि। नीली, निर्यासः, कज्जलम्, हरिद्रा इत्यादीनां नैसर्गिकद्रव्याणाम् उपयोगः मसीरूपेण क्रियते स्म। डॉ. आर्. एस्. शिवगणेश-मूर्ति-महोदयानां 'Introduction to Manuscriptology' इति पुस्तकं प्रसिद्धम् । नैकासु संस्थासु शास्त्रस्यास्य अभ्यासक्रमाः वर्तन्ते ।

ई) **पुराभिलेखविद्या (Paleography and Epigraphy) -** प्राचीनकाले उत्कीर्णः (कोरलेला/ engraved) अभिलेखः नाम पुराभिलेखः। दानपत्रं, राजाज्ञा, प्रशस्तिः इति पुराभिलेखानां त्रयः प्रकाराः। काष्ठ-प्रस्तर-ताम्रपट-चर्मादिषु तष्टाः नैके पुराभिलेखाः अभ्यासकैः संशोधिताः, संरक्षिताः तथा अधीताः। प्राचीनकाले ब्राह्मी, खरोष्ठी, शारदा, ग्रन्थलिपिः इत्यादयः लिपिभेदाः प्रचलिताः। तासां वाचनार्थं लिपिशास्त्रस्य ज्ञानम् आवश्यकम् । डॉ. वा. वि. मिराशीमहोदयेन पुराभिलेखविद्यासाहाय्येन भवभूति-कालिदासयोः कालनिर्णयः कृतः ।

उ) **पुरातत्त्वशास्त्रम् (Archaeology) -**
मानवीयसंस्कृतेः कीदृशः आरम्भः, कथं तस्याः

विकासः, तस्यां कानि परिवर्तनानि इत्येषाम् अङ्गानां ज्ञानम् अस्य शास्त्रस्य फलम्। समन्वेषणम्, उत्खननं (Excavation), उत्खननात् लब्धानाम् अवशेषाणां कालमापनं, तथा तेषाम् अध्ययनं, सूचीकरणं, प्रतिपालनम् एते विभागाः अस्मिन् शास्त्रे वर्तन्ते । तैः मानवस्य उत्क्रान्तिः, जीवनपद्धतिः, संस्कृतिः एतेषां परिचयः भवति । श्री. राखालदास-बॅनर्जी-महोदयः सिन्धु-संस्कृति-अन्वेषणे सहभागं दत्तवान्, तथैव डॉ. ह. धी. साङ्कलियामहोदयेन महाराष्ट्रे प्राचीनसंस्कृतिः अन्वेषिता । डॉ. म. के. ढवळीकरमहोदयैः 'इनामगाव' विषये कृतं संशोधनं प्रसिद्धम् ।

ऊ) **स्थापत्यशास्त्रम्/वास्तुकला** (Architecture) – प्राचीनभारते एतत् शास्त्रम् अतीव विकसितम् । मयमतम्, समराङ्गणसूत्रधारः, प्रासादमण्डनम् इत्यादयः प्राचीन-स्थापत्य-विषयकाः नैके ग्रन्थाः प्रसिद्धाः । नागर - वेसर - द्रविड - नामभिः प्रसिद्धाभिः पद्धतिभिः निर्मितानि बहूनि मन्दिराणि भारते दृश्यन्ते। शैलगुहाः, काष्ठ-पाषाणादिकैः रचितानि मन्दिराणि, प्रासादाः, प्राचीननगराणि, इत्यादीनाम् अध्ययनम् अस्य शास्त्रस्य विषयः। डॉ. विष्णु श्रीधर वाकणकरमहोदयस्य संशोधनेन 'भीमबेटका' शैलभित्तिचित्राणि प्रकाशितानि ।

ऋ) **बृहत्तरभारतविद्या** – वाणिज्यार्थं तथा बौद्धधर्मप्रसारार्थं भारतीयाः विविध-देशान् गताः। अतः तत्र विकसिता भारतीयसंस्कृतिः अद्यापि दृश्यते । आग्नेय-आशियास्थितेषु बाली-कम्बोडियादिदेशेषु अपि भारतीय-वास्तुकलायाः आविष्कारः दृश्यते । यथा कम्बोडियादेशे अङ्कोरमन्दिरसमूहः ।

एताभिः शाखाभिः सार्धं भाषाशास्त्रं, दैवतशास्त्रं, तत्त्वज्ञानं, धर्मशास्त्रं, चित्रकला, शिल्पकला इत्यादीनां कतिपयानां विषयाणां समावेशः भारतविद्यायाम् एव भवति । एतस्याः भारतीयविद्यायाः द्वारेण ऐतिह्यं संशोधयितुं नैके विद्वांसः प्रयत्नशीलाः । डेक्कन कॉलेज (पुणे)-भाण्डारकर-प्राच्यविद्या-संशोधन-मन्दिरम् (पुणे)-भारत-इतिहास-संशोधनमण्डलम् (पुणे)-एशियाटिक सोसायटी (मुम्बई)-विदर्भ-संशोधन-मण्डलम् (नागपुर) इत्यादिषु संशोधनसंस्थासु भारतविद्याविषयकं संशोधनं प्रचलति । संस्कृतज्ञानां कृते अस्मिन् विषये नैकाः उपलब्धयः सन्ति ।

## नाट्यविशेषः ।

'भिन्नरुचेर्जनस्य बहुधापि एकं समाराधनं' नाम नाट्यं, यतः नृत्याभिनयसङ्गीतादीनां कलानां सङ्गमः अत्र दृश्यते । संस्कृतरङ्गभूमिः तु विश्वरञ्जनी । संस्कृतनाट्यस्य मूलं वैदिकसूक्तेषु तथा यज्ञविधिषु दृश्यते । ऋग्वेदे संवादसूक्तानि सन्ति । सरमापणिसंवादे, विश्वामित्रनदीसंवादे तथा अन्येषु सूक्तेषु अपि कथाः संवादरूपेण निवेद्यन्ते। सूक्तमेकम् (१०. ११९) इन्द्रस्य स्वगत-भाषणरूपेणापि वर्तते । अग्रतो गत्वा ब्राह्मणग्रन्थेषु एते काव्यरूपसंवादाः कथास्वरूपेण परिवर्तिताः । ऐतरेयब्राह्मणे शुनःशेपाख्यानम् अस्य परिवर्तनस्य अन्यतमम् उदाहरणम्। यज्ञसत्रेषु कुशीलवाः जनानां रञ्जनार्थं गीताभिनयद्वारेण आख्यानानि कथयन्ति स्म। सोऽपि नाट्यात्मकः आविष्कारः एव । अपि च नैकेषां यज्ञविधीनां स्वरूपं नृत्याभिनयसङ्गीतमयं भवति स्म । यथा महाव्रतविधौ अश्वमेधयज्ञे च कृतककलहः क्रियते स्म । अत एव उच्यते –

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि।। **(नाट्यशास्त्रम् १.१७)**

रामायणमहाभारतयोः नटनर्तकाः वर्णिताः। एवं प्रायः धार्मिकविधिरूपेण नृत्यनाट्यगायनादिकं प्रचलितम् । अत एव नाटकं नाम **कान्तः चाक्षुषः क्रतुः** इति कालिदासः वर्णयति ।

अस्याः नाट्यपरम्परायाः ग्रथनं कृत्वा भरतमुनिना **'नाट्यशास्त्रम्'** निर्मितम् । स एव ग्रन्थः **'पञ्चमवेदः'** इति नाम्ना प्रसिद्धः । ख्रिस्ताब्दस्य-द्वितीये-शतके अस्य निर्मितिः जाता इति मन्यते । नाट्यशास्त्रे षट्त्रिंशत् अध्यायाः, तेषु च षट्सहस्रं श्लोकाः सन्ति । अभिनवगुप्तः नाट्यशास्त्रस्य टीकाकारः । भरतमुनिना नाट्यस्य स्वरूपं **'दृश्यं श्रव्यं च क्रीडनीयकम्'** इत्येतैः शब्दैः वर्णितम् । अयमेव नाट्यस्य विशेषः । अन्ये सर्वे साहित्यप्रकाराः केवलं श्रव्याः भवन्ति । नाट्यस्य प्रयोजनद्वयं-मनोविनोदनं तथा सदुपदेशनम् ।

नाट्यशास्त्रे रसभावविचारः महत्त्वपूर्णः । 'रस्यते आस्वाद्यते इति रसः ।' नाट्यशास्त्रानुसारं अष्ट रसाः वर्तन्ते।

**शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाः ।**
**बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ।।**

'शान्तोऽपि नवमो रसः' इत्यपि मन्यते । नाट्ये अभिनयः महत्त्वपूर्णः । **वाचिकः, आङ्गिकः, आहार्यः तथा सात्त्विकः** इति अभिनयस्य चत्वारः प्रकाराः भरतेन स्पष्टीकृताः । नाट्यस्य सर्वेषां सप्त-अङ्गानां विवेचनम् अत्र प्राप्यते यथा-पाठ्यं, नृत्यं, गीतं, वाद्यं, रसाः, नाट्यगृहं तथा रङ्गसज्जा। भरतमुनिः नाट्यस्य नाम रूपकस्य दश प्रकारान् वर्णयति-**नाटकं, प्रकरणं, भाणः, डिमः, प्रहसनं, व्यायोगः, समवकारः, ईहामृगः, वीथी, अङ्कः** । नाट्यशास्त्रं नाट्यविषयकः ज्ञानकोषः खलु ।

भरतमुनिना स्वपुत्रैः सह देवदानवयुद्धात्मकं नाटकम् इन्द्रध्वजमहोत्सवे प्रस्तुतम् इति नाट्यशास्त्रे वर्णितम्। सा एव प्रथमा नाट्यप्रस्तुतिः । भारतवर्षे नाट्यमञ्चनं नाट्यशास्त्रादपि पूर्वं प्रचलितम् । आद्यः संस्कृतनाटककारः भासः ख्रिस्तपूर्वे पञ्चमे शतके जातः इति मन्यते । 'स्वप्नवासवदत्तम्' इति तेन रचितं नाटकं बहुत्र उद्धृतम्। तेन लिखितानां केषाञ्चन नाटकानां मञ्चनं केरलप्रान्ते चाक्याराः 'कुडियट्टम्' इति रूपेण कुर्वन्ति स्म। टी. गणपतिशास्त्री इति विदुषा संशोध्य भासस्य त्रयोदश नाटकानि जनानां पुरतः आनीतानि । तत्र कर्णभारम्, ऊरुभङ्गम् च शोकान्तौ एकाङ्कौ । प्रथमे शतके अश्वघोषेण सारिपुत्तप्रकरणं रचितम् । शूद्रकेण 'मृच्छकटिकम्' इति प्रकरणं लिखितं यत्र समाजजीवनं प्रतिबिम्बितम् । कालिदासस्य अभिज्ञानशाकुन्तलमिति सप्ताङ्कं नाटकं विश्वविख्यातम्। **'काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला'** इति तस्य महत्तां को न जानाति! विशाखदत्तस्य मुद्राराक्षसनाटकात् राजकीयकूटनीतेः यथार्थं दर्शनं भवति । भट्टनारायणस्य वेणीसंहारम्, श्रीहर्षस्य नागानन्दम् तथा च अन्यानि अपि बहूनि नाटकानि अभिजातसंस्कृतरङ्गमञ्चे नाटितानि । भवभूतिना उत्तररामचरिते रामायणस्य कथा एव सुखान्ते परिवर्तिता । दिङ्नागेन कालिदासस्य भाषासौष्ठवं तथा भवभूतेः कथावस्तु आश्रित्यैव कुन्दमाला इति नाटकं रचितम् । रूपकस्य अन्यप्रकारेषु कर्पूरचरितं नाम भाणः, तथा च मत्तविलासप्रहसनं, भगवदज्जुकीयम् इति प्रहसनद्वयं लोके प्रसिद्धम्। नाटिका इति उपप्रकारः अपि संस्कृतरङ्गभूमौ जनप्रियः । श्रीहर्षस्य रत्नावली इत्यस्ति तस्याः उदाहरणम् । एषा समृद्धा अभिजातसंस्कृतरङ्गभूमिः आधुनिकयुगे संस्कृतेतरेषां नाटकानां कृते अपि स्रोतोरूपेण उपयुक्ता । सा अद्यापि विविधैः रूपैः जनानां चेतांसि आमोदयति।

वेबर, कीथ, दासगुप्ता, डे, डॉ. गो. के. भट आदिभिः संशोधकैः षोडश-शतकं यावत् विरचितस्य अभिजातसंस्कृतनाट्यस्य आलोडनं कृतम् । तदनन्तरं संस्कृतनाटकस्य आधुनिकम्, अत्याधुनिकं रूपम् अपि अस्माभिः अनुभूयते। अभिजातनाटकेभ्यः एतेषां नाटकानां स्वरूपं भिन्नं, विषयाः भिन्नाः, मञ्चनम् अपि भिन्नम् । ओगेटिपरीक्षितशर्मणा अपि रामायणमहाभारतकथानां नाट्यरूपेण आविष्कारः कृतः । महाराष्ट्रे नैके आधुनिकाः संस्कृतनाटककाराः जाताः । मान्यवरैः ग. बा. पळसुले, श्री. भि. वेलणकरः, श्री. भा. वर्णेकरः,

श्री. वि. पां. बोकिलः इत्यादिभिः अभिजातनाटकानां स्वरूपमाश्रित्य नूतननाटकानि लिखितानि । प्रभाकरभातखण्डेमहोदयेन सामाजिकनाट्यं, बालनाट्यं, सङ्गीतनाटकं, प्रहसनं, लोकनाट्यम् इत्यादयः नैके नूतननाट्यप्रकाराः, अद्यतनीयाः विषयाः च संस्कृतनाट्यरूपेण आविष्कृताः । नैकैः विद्वद्भिः आधुनिकभारतीयभाषासु विख्यातानां नैकेषां नाटकानां संस्कृतेन अनुवादः कृतः । सम्प्रति नैकेषु महाविद्यालयेषु तरुणानां नाट्यसङ्घाः संस्कृतनाटकानि प्रस्तुवन्ति। एतत् संस्कृतनाट्यस्य अत्याधुनिकं रूपमेव । नैकाभिः संस्थाभिः प्रतिवर्षं विविधाः संस्कृतनाट्यस्पर्धाः आयोज्यन्ते यथा, महाराष्ट्र-शासनायोजिता राज्यस्तरीया स्पर्धा। नैके नाट्यसङ्घाः तासु उत्साहेन सहभागिनः भवन्ति । एवं यस्मिन् '**त्रैगुण्योद्भवं नानारसं लोकचरितं**' वर्णितं तस्य काव्यस्य दृक्श्रव्यं स्वरूपं नाम नाट्यम् । यावद् लोकः भवेत् तावद् लोकरञ्जनार्थं तथा लोकशिक्षणार्थं विविधरूपैः एतद् नाट्यम् अवतरेद् एव ।

## नाट्यरञ्जनी

### नाटकादि-दशरूपक-निरूपणचक्रम् ।

| रूपकविधाः | अङ्कः - सङ्ख्या | नायकः सङ्ख्या / प्रकारः | कथावस्तु | रसः | उदाहरणम् |
|---|---|---|---|---|---|
| नाटकम् | ५-१० | १ धीरोदात्तः देवः/राजा | इतिहासपुराणेषु प्रसिद्धम् | शृङ्गारः/ वीरः | अभिज्ञानशाकुन्तलम् |
| प्रकरणम् | १० | १ धीरप्रशान्तः अमात्यः/वणिक् | लौकिकम् तथा कल्पितम् | शृङ्गारः | मृच्छकटिकम् |
| भाणः | १ | १ विटः | कविकल्पितम् | वीरः | लीलामधुकरम् |
| व्यायोगः | १ | १ धीरोदात्तः | इतिहासपुराणेषु प्रसिद्धम् | हास्यः/ शृङ्गारः/ शान्तः च वर्जयित्वा अन्ये | सौगन्धिकाहरणम् |
| समवकारः | ३ | १२ देवताः / मानवाः | इतिहासपुराणेषु प्रसिद्धम् | वीरः | समुद्रमन्थनम् |
| डिमः | ४ | १६ विविधाः | इतिहासपुराणेषु प्रसिद्धम् | रौद्रः | त्रिपुरदाहः |
| ईहामृगः | ४ | १/६ | ऐतिहासिकं कल्पितं च | शृङ्गारः | कुसुमशेखरविजयादिः |
| अङ्कः | १ | १ साधारणः पुरुषः | इतिहासपुराणेषु प्रसिद्धम् | करुणः | शर्मिष्ठाययातिः |
| वीथी | १ | १ साधारणः पुरुषः | कविकल्पितम् | शृङ्गारः | मालविका |
| प्रहसनम् | १ | १ साधारणः पुरुषः | कविकल्पितम् | हास्यः | कन्दर्पकेलिः |

## भाषाभ्यासः ।

* **उचितं विकल्पं चित्वा वाक्यं पुनर्लिखत ।**

१. भारतविद्या नाम ........ प्राचीनेतिहास-संस्कृतिविषयिणी ज्ञानशाखा ।
(सिंहलद्वीपस्य, कम्बोजद्वीपस्य, भारतदेशस्य)

२. ब्राह्मीलिपी ........ अनेन विशदीकृता ।
(जेम्स प्रिन्सेप्, जेम्स वॅट, मॅक्सम्यूलर)

३. १८३७ तमे वर्षे ........ विशदीकृता ।
(ब्राह्मीलिपी, शारदालिपी, ग्रन्थलिपी)

४. ........ सुवर्णकालः इति उच्यते ।
(मौर्यकालः, कुशाणकालः, गुप्तकालः)

५. मालवादीनां गणराज्यानां परिचयः ........ एव जातः ।
(हस्तलिखितैः, प्रतिमाभिः, नाणकैः)

६. शक-क्षत्रप-कुशाणादयः ........ ।
(राजवंशाः, सङ्घराज्याः, गणराज्याः)

७. मूर्तिविज्ञानशास्त्रे ........ मूर्तिप्रमाणं विशदीकुर्वन्ति ।
(पुराणानि, वेदाः, दर्शनवाङ्मयम्)

८. अङ्कोर-मन्दिर-समूहः ........ देशे वर्तते ।
(कम्बोडिया, बाली, श्रीलंका)

९. हस्तलिखितनिर्माणे हरिद्रा, कज्जलम् इत्यादीनां नैसर्गिकद्रव्याणाम् उपयोगः ........ क्रियते ।
(कर्गजरूपेण, लेखनीरूपेण, मसीरूपेण)

१०. डॉ. वा. वि. मिराशीमहोदयेन पुराभिलेखविद्यासाहाय्येन ........ कालनिर्णयः कृतः ।
(अश्वघोषस्य, भवभूतेः, बाणस्य)

११. ........ संशोधनेन भीमबेटका-शैलभित्तिचित्राणि प्रकाशितानि ।
(डॉ. ढवळीकरमहोदयस्य, डॉ. वाकणकरमहोदयस्य, डॉ. गोखलेमहोदयायाः)

१२. सङ्कलनं, सूचीकरणं, वाचनं, मुद्रणं, स्पष्टीकरणं तथैव संरक्षणम् इत्येते विषयाः ....... अन्तर्भूताः ।
(मूर्तिशास्त्रे, हस्तलिखितशास्त्रे, स्थापत्यशास्त्रे)

१३. प्राचीनकाले उत्कीर्णः अभिलेखः नाम ....... ।
(नवाभिलेखः, पुराभिलेखः, अभियोगः)

१४. प्राचीनकाले ब्राह्मी, खरोष्ठी, शारदा, ग्रन्थलिपिः इत्यादयः ....... प्रचलिताः ।
(लिपिभेदाः, भाषाभेदाः, लिपिग्रन्थाः)

१५. पुरातत्त्वशास्त्रे....... इति एक: विभाग: वर्तते ।
(उत्खननम्, मुद्रणम्, प्रशस्ति:)

१६. डॉ. शोभना गोखले महोदयाया: योगदानं....... महत्त्वपूर्णम् ।
(नाणकशास्त्रे, मूर्तिविज्ञाने, स्थापत्यशास्त्रे)

१७. पुराभिलेखानां....... प्रकारा: सन्ति ।
(दश, त्रय:, पञ्च)

१८. 'वेसर' इति....... पद्धति: ।
(मन्दिरनिर्माणस्य, नाणकशास्त्रस्य, नगरनिर्माणस्य)

१९. प्राचीनभारतवर्षस्य सर्वेषाम् अङ्गानां सम्यग् अध्ययनं ........ समाविष्टम् ।
(मूर्तिविद्यायां, पुराभिलेखविद्यायां, भारतविद्यायां)

२०. साधनमाला-रूपावतार-प्रभृतय: ग्रन्थविशेषा: ........ विशदीकुर्वन्ति ।
(चित्रनिर्माणं, लेखनिर्माणं, मूर्तिनिर्माणं)

२१. दानपत्रं, राजाज्ञा, प्रशस्ति: इति ........ प्रकारा: ।
(हस्तलिखितानां, नाणकानां, पुराभिलेखानां)

२२. ........ वाचनार्थं लिपिशास्त्रस्य ज्ञानम् आवश्यकम् ।
(लिपीनां, चित्राणां, मूर्तीनां)

२३. समन्वेषणं, कालमापनम् इत्यादय: विभागा: ........ वर्तन्ते ।
(पुराभिलेखविद्यायां, हस्तलिखितशास्त्रे, पुरातत्त्वशास्त्रे)

२४. प्रासादमण्डनम् इति ........ विषयक: ग्रन्थ: ।
(स्थापत्यशास्त्र, पुरातत्त्वशास्त्र, प्रतिमाविद्या)

२५. चित्रकलाशिल्पकलादय: विषया: अपि ........ समाविष्टा: ।
(प्रतिमाविद्यायां, भारतविद्यायां, पुराभिलेखविद्यायां)

२६. संस्कृतनाट्यस्य मूलं ........ तथा यज्ञविधिषु दृश्यते ।
(वैदिकसूक्तेषु, उपनिषदि, वेदाङ्गेषु)

२७. ऋग्वेदे ........ सन्ति ।
(संवादसूक्तानि, चित्रसूक्तानि, नृत्यसूक्तानि)

२८. ....... शुन:शेपाख्यानं काव्यस्य कथारूपेण परिवर्तनस्य अन्यतमम् उदाहरणम् ।
(ऐतरेयब्राह्मणे, ऐतरेय-आरण्यके, ऐतरेयोपनिषदि)

२९. महाव्रतविधौ अश्वमेधे च ....... क्रियन्ते स्म ।
(कृतककलह:, कृतकसंवाद:, कृतकनाट्यम्)

३०. यज्ञसत्रेषु ....... जनानां रञ्जनार्थं गीताभिनयद्वारेण आख्यानानि कथयन्ति स्म ।
(कुशीलवाः, नायकाः, कलाकाराः)

३१. ....... नटनर्तकाः वर्णिताः ।
(रामायणमहाभारतयोः, शिक्षाग्रन्थेषु, भारतविद्यासु)

३२. 'नाटकं नाम कान्तः चाक्षुषः क्रतुः' इति ....... वर्णयति ।
(कालिदासः, भासः, माघः)

३३. दिङ्नागेन....... इति नाटकं रचितम् ।
(कुन्दमाला, सुभाषितमाला, उत्तररामचरितम्)

३४. भरतमुनिना ....... सह देवदानवसङ्गरात्मकं नाटकम् इन्द्रध्वजमहोत्सवे प्रस्तुतम् ।
(स्वपुत्रैः, अप्सरोभिः, गन्धर्वैः)

३५. ....... नाट्यस्य स्वरूपं 'दृश्यं श्रव्यं च क्रीडनीयकम्' इत्येतैः शब्दैः वर्णितम् ।
(भरतमुनिना, विश्वनाथेन, धनञ्जयेन)

३६. अधोनिर्दिष्टेषु दृश्यं काव्यम् ....... ।
(कथा, नाट्यम्, महाकाव्यम्)

३७. अभिनयस्य....... प्रकाराः भरतेन स्पष्टीकृताः ।
(चत्वारः, त्रयः, पञ्च)

३८. नाट्यस्य ....... अङ्गानि सन्ति ।
(सप्त, पञ्च, नव)

३९. भरतमुनिः नाट्यस्य ....... प्रकारान् वर्णयति ।
(दश, अष्ट, सप्त)

४०. आद्यः संस्कृतनाटककारः भासः ख्रिस्तपूर्वे ....... शतके जातः ।
(पञ्चमे, नवमे, सप्तमे)

४१. ....... इति भासेन रचितं नाटकं बहुत्र उद्धृतम् ।
(स्वप्नवासवदत्तम्, अभिज्ञानशाकुन्तलम्, मृच्छकटिकम्)

४२. ....... नाम्ना विदुषा भासस्य त्रयोदशनाटकानि जनानां पुरतः आनीतानि ।
(टी. गणपतिशास्त्री, गणेशशास्त्रिद्रविडः, टी. राजम्माचारी)

४३. 'मृच्छकटिकम्' रूपकस्य ....... इति प्रकारः ।
(व्यायोगः, प्रकरणम्, प्रहसनम्)

४४. प्रथमे शतके ....... सारिपुत्तप्रकरणं रचितम् ।
(अश्वघोषेण, कालिदासेन, भासेन)

४५. नाटिका इति उपरूपकप्रकारस्य उदाहरणम् ....... ।
(मृच्छकटिकम्, दरिद्रचारुदत्तम्, रत्नावली)

४६. काव्येषु नाटकं रम्यं तत्र रम्या ....... ।
(शकुन्तला, रत्नावली, कुन्दमाला)

४७. ....... मुद्राराक्षसनाटकात् राजकीयकूटनीतेः यथार्थदर्शनं भवति ।
(विशाखदत्तस्य, भारवेः, चारुदत्तस्य)

४८. ....... उत्तररामचरिते रामायणस्य कथा एव परिवर्तिता ।
(भवभूतिना, पाणिनिना, कालिदासेन)


४९. ....... नाम भाणः लोके प्रसिद्धः ।
(कर्पूरचरितम्, रामचरितम्, महावीरचरितम्)

५०. वेबर, कीथ इत्यादिभिः संशोधकैः ....... यावत् विरचितस्य अभिजातसंस्कृतनाटकस्य आलोडनं कृतम् ।
(षोडशशतकम्, चतुर्दशशतकम्, पञ्चदशशतकम्)

***

## ज्ञानरञ्जनी

भारतीयदर्शनं द्विविधम् आस्तिकं नास्तिकं चेति । षट् आस्तिक-दर्शनानि प्रसिद्धानि । तानि च न्याय-वैशेषिक-साङ्ख्य-योग-पूर्वमीमांसा-उत्तरमीमांसा । जैन-बौद्ध-चार्वाकाः नास्तिकदर्शनानि । न्यायदर्शनस्य प्रणेता गौतमः, वैशेषिकस्य कणादः । कपिलमुनेः साङ्ख्यदर्शनं तथा पतञ्जलेः योगदर्शनं प्रसिद्धम् । जैमिनेः पूर्वमीमांसादर्शनं तथा बादरायणस्य उत्तरमीमांसादर्शनम् अपि प्रसिद्धम् । जैनदर्शने श्वेताम्बर-दिगम्बरौ भेदौ तथा महायानं, हीनयानं, वज्रयानम् इति बौद्धदर्शने भेदाः । चार्वाकस्य अपरं नामधेयं लोकायतम् ।



## पुत्रसङ्गमः ।

नाटकानि चित्रपटान् दूरदर्शनमालिकाः च अनुलक्ष्य इदं स्पष्टतया लक्ष्यते, यत् किञ्चित् कथाबीजं (theme) कञ्चित् कालं यावत् कविषु तथा वाचक-प्रेक्षकेषु अतीव प्रियं भवति। कविषु तथा नाटकेषु भिन्नेषु सत्सु अपि एकमेव कथाबीजं पुनः पुनः नानाप्रकारैः उपयुज्यमानं दृश्यते । विरोधात् विकसन्ती प्रीतिः, बाल्ये एव वियुक्तौ यमलौ अथवा श्वश्रू-स्नुषयोः सङ्घर्षः एतादृशाः कतिपयाः मध्यवर्तिकल्पनाः पुनः पुनः नाटक-चित्रपटेषु वर्णिताः दृश्यन्ते। प्राचीना संस्कृतनाट्यसृष्टिरपि नैव अपवादभूता। संस्कृतनाट्यसृष्ट्यां पुनः पुनः उपयुज्यमाना केन्द्रीभूता कल्पना अस्ति **'पुत्रसङ्गमः'**। विविधकारणैः पुत्रस्य जन्मनः वा तस्य शैशवाद्वा पितापुत्रयोः वियोगः, कालेन तयोः संयोगवशात् मेलनं, पित्रा क्रमशः पुत्रस्य अभिज्ञानम्, अन्ततो गत्वा उभयोः मनोमेलनम् इत्यनया रीत्या इयं सङ्कल्पना विकसिता भवति । कवयः स्वीयेन प्रतिभाबलेन इमां सङ्कल्पनां विभिन्नतया विकासयन्ति, रसिकान् च नन्दयन्ति। भास-कालिदास-दिङ्नागाः एते भिन्नकालीनाः प्रतिभाशालिनः कवयः इमां सङ्कल्पनां कथम् उन्मीलयन्ति इति एषु नाट्यखण्डेषु स्फुटीभवेत्।

**तेषु प्रथमः नाट्यांशः भासकवेः मध्यमव्यायोगात् गृहीतः ।**

**द्वितीयः नाट्यांशः कालिदासस्य अभिज्ञानशाकुन्तलनाटकात् उद्धृतः ।**

**तृतीयः नाट्यांशः दिङ्नागकवेः कुन्दमालानाटकात् स्वीकृतः ।**

यद्यपि एतेषां नाट्यखण्डानां कथाबीजं रामायणमहाभारताभ्यां गृहीतं, तथापि तस्य विकसने कविप्रतिभायाः नवनवोन्मेषाः लसन्ति । महाभारते हिडिम्बा-भीमयोः विवाहः तथा वियोगः प्रसिद्धः । घटोत्कचः अपि वर्णितः। किन्तु भीम-घटोत्कचयोः मेलनस्य कथांशः नाम भासकवेः हास्यपरिप्लुता अपूर्वा एव निर्मितिः। शाकुन्तलस्य कथाबीजमपि महाभारते वर्तते । किन्तु तत्र राजसभायाम् उपस्थितया शकुन्तलया एव सर्वदमनस्य परिचयः दुष्यन्ताय दीयते । कालिदासः अस्मिन् कथांशे नाट्यमयताम् उन्मीलयति। अत्र पुत्रस्य अभिज्ञानं कथं क्रमशः दृढीभवति तद् आस्वाद्यम्। रामस्य कुशलवाभ्यां सङ्गमः वाल्मीकिरामायणे वर्णितः । किन्तु दिङ्नागकवेः नाट्यरचना प्रेक्षकाणाम् उत्कण्ठां वर्धयति, हास्यकणिकासेचनेन तान् रञ्जयति। कुशलवयोः बालसुलभाः भावाः अपि तेन हृद्यम् आरेखिताः ।

एते त्रयः पुत्रसङ्गमाः संस्कृतनाट्येषु प्रसिद्धाः । पञ्चममण्डलस्य प्रारम्भपाठत्रयस्य मध्यवर्तिकल्पना 'पुत्रसङ्गमः' इत्येव विद्यते । तेषां रसास्वादः छात्रेभ्यः मोदकरः भवेत् ।

## प्रथमः पाठः । भीमघटोत्कचयोः ।

**भूमिका –** विदग्धसंस्कृतकविषु प्राचीनतमः महाकविः भासः। ख्रिस्ताब्दपूर्वं पञ्चमं शतकम् इति तस्य कालः इति केचन विद्वांसः मन्यन्ते । भासनाटकानि १९१२ इति ख्रिस्ताब्दे टी. गणपतिशास्त्रिमहोदयेन संशोधितानि प्रकाशितानि च। भासकविना त्रयोदश नाटकानि रचितानि। तेषु महाभारताश्रितानि षट् नाटकानि । तेषु अन्यतमम् अस्ति 'मध्यमव्यायोगः'।

दशरूपकेषु अन्यतमः व्यायोगः। इतिहासपुराणाधारिता वीररसात्मिका कथा, एक एव अङ्कः, वीरः नायकः, द्वन्द्वयुद्धस्य प्राधान्यम् एते व्यायोगस्य विशेषाः ।

वने हिडिम्बा-भीमयोः विवाहानन्तरं बहुकालं यावत् तौ वियुक्तौ आस्ताम् । तयोः पुत्रः घटोत्कचः अपि युवावस्थां प्राप्तः, किन्तु पितापुत्रयोः मेलनं नैव जातम् । पाण्डवानां द्वादशवार्षिकवनवासकाले भीमः पुनरपि तदेव वनं सम्प्राप्तः इति तया ज्ञातम् । भीमेन सह मेलनार्थं हिडिम्बया एका युक्तिः रचिता। तया पुत्रः आज्ञप्तः यत् 'मम उपवासपारणार्थं कश्चित् मानुषः आनेतव्यः'। अतः घटोत्कचेन एकः ब्राह्मणपुत्रः समासादितः, तस्य रक्षणार्थं प्राप्तः भीमः घटोत्कचेन सह अयुध्यत । तदभ्यन्तरे सः स्वपुत्रम् अभ्यजानात् । एषः कथांशः अस्मिन् नाट्यखण्डे वर्तते।

**घटोत्कचः :** भो मध्यम, मध्यम । शीघ्रमागच्छ ।
(ततः प्रविशति भीमसेनः ।)

**भीमः :** (आत्मगतम्) अयि, कस्यायं स्वरः । बहुसदृशो हि अयं धनञ्जयस्वरेण । (विलोक्य) अहो, दर्शनीयोऽयं पुरुषः । सुव्यक्तं राक्षसीजः कस्यचित् लोकवीरस्य पुत्रः । बन्धुरिव मे प्रतिभाति । अनेन सज्जनानां मार्गविघ्नः कृतः। भवतु, निग्रहीष्यामि तावदेनम्। (प्रकाशम्) भोः पुरुष! किमर्थं सज्जनमपराध्यसि। मुच्यतां मुच्यताम् ।

**घटोत्कचः :** न मुच्यते ।

**भीमः :** (आत्मगतम्) भोः कस्य पुत्रेणानेन भवितव्यम्? भ्रातॄणां मम सर्वेषां कोऽयं गुणतस्करः ? एतद् बालशौण्डीर्यं दृष्ट्वा अहं सौभद्रं स्मरामि । (प्रकाशम्) भोः पुरुष! मुच्यताम् ।

**घटोत्कचः :** न मुच्यते ।

**मुच्यतामिति विस्रब्धं ब्रवीति यदि मे पिता ।**
**न मुच्यते तथाप्येष गृहीतो मातुराज्ञया ।।**

**भीमः :** (आत्मगतम्) कथं मातुराज्ञेति । अहो गुरुशुश्रूषुः खल्वयं तपस्वी ।
माता किल मनुष्याणां देवतानां च दैवतम् ।
(प्रकाशम्) पुरुष! प्रष्टव्यं खलु तावदस्ति ।

**घटोत्कचः :** ब्रूहि ब्रूहि, शीघ्रम् ।

**भीमः :** का नाम भवतो माता ।

**घटोत्कचः :** श्रूयतां, हिडिम्बा नाम राक्षसी ।

**भीमः :** (सहर्षमात्मगतम्) एवं हिडिम्बायाः पुत्रोऽयम् । सदृशः अस्य गर्वः । अस्य रूपं सत्त्वं बलं चैव पाण्डवैः सदृशम्। (प्रकाशम्) भोः पुरुष! मुच्यताम् ।

**घटोत्कचः :** न मुच्यते ।

**भीमः :** (ब्राह्मणमुद्दिश्य) भो ब्राह्मण । गृह्यतां तव पुत्रः । वयमेनमनुगमिष्यामः ।



**घटोत्कचः** : तेन हि भवानेवागच्छतु ।

**भीमः** : यदि ते शक्तिरस्ति, बलात् मां नय।

**घटोत्कचः** : गृह्यतामायुधम्।

**भीमः** : आयुधमिति, गृहीतमेतत् ।

**घटोत्कचः** : कथमिव ।

**भीमः** :

**काञ्चनस्तम्भसदृशो रिपूणां निग्रहे रतः।**
**अयं तु दक्षिणो बाहुरायुधं सहजं मम।।**

**घटोत्कचः** : इदमुपपन्नं पितुर्मे भीमसेनस्य ।

**भीमः** : अथ कोऽयं भीमो नाम!

**विश्वकर्ता शिवः कृष्णः शक्रः शक्तिधरो यमः ।**
**एतेषु कथ्यतां भद्र केन ते सदृशः पिता ।।**

**घटोत्कचः** : सर्वैः ।

**भीमः** : धिगनृतमेतत् ।

**घटोत्कचः** : कथं कथमनृमित्याह । क्षिपसि मे गुरुम्। भवतु । इमं स्थूलं वृक्षमुत्पाट्य प्रहरामि । (उत्पाट्य प्रहरति ।) (आत्मगतम्) कथमनेनापि न शक्यते हन्तुम् । किं नु खलु करिष्ये । भवतु, दृष्टम् । एतद्गिरि-कूटमुत्पाट्य प्रहरामि । (प्रहृत्य) कथमनेनापि न शक्यते हन्तुम्। किं नु खलु करिष्ये । भवतु दृष्टम्। (प्रकाशम्) भोः पुरुष! पूर्वसमयं स्मर ।

**भीमः** : समयमिति । एष स्मरामि । गच्छाग्रतः। (उभौ परिक्रामतः ।)

**घटोत्कचः** : इह तिष्ठ । तवागमनमम्बायै निवेदयामि।

**भीमः** : बाढम् । गच्छ ।

**घटोत्कचः** : (उपसृत्य) अम्ब! अयमहमभिवादये । चिराभिलषितो भवत्या आहारार्थमानीतो मानुषः ।

**हिडिम्बा** : जात! चिरं जीव ।

**घटोत्कचः** : अनुगृहीतोऽस्मि ।
**हिडिम्बा** : किमेष मानुष आनीतः ।
**घटोत्कचः** : अम्ब! कोऽयम् ।
**हिडिम्बा** : दैवतं खल्वस्माकम् ।
**घटोत्कचः** : आः कस्मात् दैवतम् ।
**हिडिम्बा** : उन्मत्तक, पिता तव।
**घटोत्कचः** : भोः तात!

**अज्ञानात्तु मया पूर्वं यद्भवान्नाभिवादितः।**
**अस्य पुत्रापराधस्य प्रसादं कर्तुमर्हसि॥**

अहं धार्तराष्ट्रवनदावाग्निः घटोत्कचः अभिवादये । पुत्रचापलं क्षन्तुमर्हसि ।
**भीमः** : एह्येहि पुत्र । पुत्रापेक्षीणि खलु पितृहृदयानि । पुत्र, अतिबलपराक्रमो भव ।
**घटोत्कचः** : अनुगृहीतोऽस्मि ।

## वाग्विशेषः ।

१. धार्तराष्ट्रवनदावाग्निः- धृतराष्ट्रस्य पुत्राः धार्तराष्ट्राः नाम कौरवाः । ते धार्तराष्ट्राः एव वनानि । तेषां वनानां दहनाय समर्थः दावाग्निः नाम घटोत्कचः । अत्र रूपक-अलङ्कारः दृश्यते ।
२. संस्कृतनाट्यसंहितायाम् 'आत्मगतम्', 'प्रकाशम्', 'अपवार्य', 'परिक्रामतः' इत्यादयः रङ्गसूचनाः वर्तन्ते । नाट्यस्य मञ्चीकरणार्थं दिग्दर्शकस्य नटानां च कृते एताः वर्तन्ते ।

## शब्दार्थः ।

१) राक्षसीजः - राक्षसीपुत्रः ।
२) बन्धुः - भ्राता स्वजनः ।
३) शौण्डीर्यम् - अहम्भावः, अहङ्कारः, गर्वः ।
४) सौभद्रः - सुभद्रायाः पुत्रः ।
५) विस्रब्धम् - निःशङ्कम् ।
६) शुश्रूषुः - यः श्रोतुम् इच्छति सः ।
७) विश्वकर्ता - ब्रह्मा ।
८) शक्तिधरः - कार्तिकेयः ।
९) पूर्वसमयः - पूर्ववचनम्, पूर्वोक्तम् ।
१०) सहजम् - स्वाभाविकम् ।
११) अभिलषितः - वाञ्छितः ।

## सन्धिविग्रहः ।

१) तथाप्येष = तथा + अपि + एषः ।
२) मातुराज्ञया = मातुः + आज्ञया ।
३) भवानेवागच्छतु = भवान् + एव + आगच्छतु ।
४) बाहुरायुधं = बाहुः + आयुधम् ।

५) भवत्विमं = भवतु + इमम् ।
६) तवागमनमम्बायै = तव + आगमनम् + अम्बायै ।
७) अनुगृहीतोऽस्मि = अनुगृहीत: + अस्मि ।
८) यद्भवान्नाभिवादित: = यत् + भवान् + न + अभिवादित: ।

### समासविग्रह: ।

१) राक्षसीज: – राक्षस्या: जायते इति । उपपद-तत्पुरुष: ।
२) लोकवीरस्य – लोकेषु वीर:, तस्य । सप्तमी-तत्पुरुष: ।
३) मार्गविघ्न: – मार्गे विघ्न: । सप्तमी-तत्पुरुष: ।
४) गुणतस्कर: – गुणानां तस्कर: । षष्ठी-तत्पुरुष: ।
५) पुत्रापराधस्य – पुत्रस्य अपराध:, तस्य । षष्ठी-तत्पुरुष: ।
६) धार्तराष्ट्रवनदावाग्नि: – धार्तराष्ट्रा: एव वनम्। कर्मधारय: ।
धार्तराष्ट्रवनानां दावाग्नि: । षष्ठी-तत्पुरुष: ।
७) पितृहृदयानि – पितृणां हृदयानि । षष्ठी-तत्पुरुष: ।

### रूपपरिचय: ।

१) दर्शनीय: – दृश् (१ प.प.), कृत्य-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, प्रथमा, एकवचनम् ।
२) निग्रहीष्यामि – नि + ग्रह् (९ उ.प., अत्र प.प.), लृट्, उत्तमपुरुष:, एकवचनम् ।
३) भ्रातृणाम् – भ्रातृ, ऋकारान्तम्, पुंलिङ्गम्, षष्ठी बहुवचनम् ।
४) मुच्यते – मुच् (६ उ.प.), कर्मणि, लट्, प्रथमपुरुष:, एकवचनम् ।
५) मातु: – मातृ, ऋकारान्तम्, स्त्रीलिङ्गम्, पञ्चमी, षष्ठी, एकवचनम् ।
६) पितृभि: – पितृ, ऋकारान्तम्, पुंलिङ्गम्, तृतीया बहुवचनम् ।
७) हिडिम्बाया: – हिडिम्बा, आकारान्तम्, स्त्रीलिङ्गम्, पञ्चमी-षष्ठी एकवचनम् ।
८) उत्पाट्य – उत् + पट् (१ प.प.), णिजन्तम्, पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययम् ।
९) ब्रूहि – ब्रू (२ उ.प., अत्र प.प.), लोट्, मध्यमपुरुष:, एकवचनम् ।

### भाषाभ्यास: ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) एतद् बालशौण्डीर्यं दृष्ट्वा अहं सौभद्रं स्मरामि ।
२) न मुच्यते तथाप्येष गृहीतो मातुराज्ञया ।
३) अयं तु दक्षिणो बाहुरायुधं सहजं मम ।
४) एतेषु कथ्यतां भद्र केन ते सदृश: पिता ।
५) अस्य पुत्रापराधस्य प्रसादं कर्तुमर्हसि ।

**२. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

**(१) भीमसेन: घटोत्कचं निग्रहीतुम् इच्छति, यत: –**

अ) घटोत्कचेन भीमस्य मार्गविघ्न: कृत: ।
ब) घटोत्कचेन सज्जनस्य मार्गविघ्न: कृत: ।

**(२) भीमः स्वबाहुं सहजम् आयुधम् मन्यते, यतः –**

अ) तस्य बाहुः रिपूणां निग्रहे रतः ।

ब) भीमः आयुधात् बिभेति ।

**(३) घटोत्कचः भीमं प्रसादं याचते, यतः –**

अ) घटोत्कचः सज्जनापराधम् अकरोत् ।

ब) घटोत्कचेन भीमः न पूर्वम् अभिवादितः ।

**(४) घटोत्कचः ब्राह्मणपुत्रं न मुञ्चति, यतः –**

अ) घटोत्कचः क्षुधितः अस्ति ।

ब) घटोत्कचः मातुः आज्ञां पालयितुम् इच्छति ।

## ३. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

**१) घटोत्कचस्य स्वरः – .............. ।**

अ) राक्षसीस्वरेण सदृशः ।

ब) धनञ्जयस्वरेण सदृशः ।

**२) घटोत्कचस्य रूपं सत्त्वं बलं चैव – .............. ।**

अ) हिडिम्बायाः सदृशम् ।

ब) पाण्डवैः सदृशम् ।

## ४. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

१) सज्जनस्य मार्गविघ्नं कृतवान् – ☐

२) बालशौण्डीर्यं दृष्ट्वा भीमेन स्मर्यते – ☐

३) घटोत्कचेन मातुः आहारार्थम् आनीतः मानुषः – ☐

## ५. पूर्णवाक्येन उत्तरं लिखत ।

१) घटोत्कचः कस्याः पुत्रः ?

२) बालशौण्डीर्यं दृष्ट्वा भीमः कं स्मरति ?

३) घटोत्कचः किं किम् उत्पाट्य प्रहरति ?

४) पितृहृदयानि कीदृशानि ?

५) भीमसेनस्य दक्षिणबाहुः कीदृशः ?

## ६. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।

१) घटोत्कचः 'मुच्यतामिति' पितुराज्ञां पालयति ।

२) माता किल मनुष्याणां देवतानां च न दैवतम् ।

## ७. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।

१) <u>गुरुशुश्रूषुः</u> खल्वयं तपस्वी ।

२) <u>हिडिम्बायाः</u> पुत्रोऽयम् ।

३) अस्य रूपं सत्त्वं बलं चैव <u>पाण्डवैः</u> सदृशम् ।

४) भीमस्य दक्षिणबाहुः रिपूणां निग्रहे रतः ।
५) आहारार्थम् आनीतः मानुषः ।

८. **सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) अनेन सज्जनस्य मार्गविघ्नः कृतः । (घटोत्कच)
२) मातुः आज्ञया एषः गृहीतः । (तद्)
३) अयं तु दक्षिणो बाहुरायुधं सहजं मम । (भीम)

९. **विशेषण–विशेष्याणां मेलनं कुरुत ।**

| अ | आ |
|---|---|
| १) दर्शनीयः | बाहुः |
| २) दक्षिणः | तपस्वी |
| ३) स्थूलम् | पुत्रेण |
| ४) पुत्रोपक्षीणि | पुरुषः |
| ५) गुरुशुश्रूषुः | पितृहृदयानि |
| | वृक्षम् |

१०. **सन्धितालिकां पूरयत ।**

१) मातुराज्ञया = ......... + ......... ।
२) यद्भवान्नाभिवादितः = यत् + ......... + न + ......... ।

११. **पृथक्करणं कुरुत ।**

**(अ) क्रमेण योजयित्वा वाक्यानि पुनर्लिखत ।**

अ) १) भीमेन सौभद्रस्य स्मरणम् ।
२) घटोत्कचस्य शौण्डीर्यप्रदर्शनम् ।
३) भीमेन घटोत्कचस्वरस्य श्रवणम् ।
४) भीमेन धनञ्जयस्वरस्य स्मरणम् ।

ब) १) घटोत्कचेन मातृनामकथनम् ।
२) भीमेन स्वपुत्रस्य घटोत्कचस्य अभिज्ञानम् ।
३) घटोत्कचः बन्धुरिव इति भीमस्य चिन्तनम् ।
४) भीमेन घटोत्कचस्य स्वरस्य श्रवणम् ।


क) १) भीमस्य घटोत्कचानुगमनाय सिद्धता ।
२) भीमद्वारा स्वबाहोः आयुधरूपेण वर्णनम् ।
३) भीमद्वारा सज्जनस्य मोचनम् ।
४) घटोत्कचद्वारा वृक्षम् उत्पाट्य प्रहरणम् ।

ड) १) घटोत्कचेन भीमस्य पितृरूपेण अभिज्ञानम् ।
२) हिडिम्बाभीमयोः सम्मुखीभवनम् ।

३) घटोत्कचद्वारा भीमस्य प्रहरणम् ।

४) घटोत्कचेन भीमं प्रति प्रसादयाचनम् ।

**(आ) प्रवाहिजालं पूरयत ।**




***

**रक्षासूत्रं रक्षतु सर्वान्**
**कलयतु भ्रातृभावम्**
**भेदमनैक्यं दूरीकुर्वत्**
**जनयतु जनसौहार्दम् ॥**
**(रक्षाबन्धनम्)**

**शुभाशयाः**

**उद्योगेन बलेनैव**
**बुद्ध्या धैर्येण साहसात् ।**
**पराक्रमेणार्जवेन**
**सिद्धिं विन्दस्व जीवने ॥**
**(उद्यमारम्भसन्दर्भे)**


# द्वितीयः पाठः । दुष्यन्तसर्वदमनयोः ।

**भूमिका –** पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाऽधिष्ठितकालिदासा ।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ।।

इत्यस्ति कविकुलगुरु-कालिदासस्य ख्यातिः । कालिदासस्य कालविषये विद्वत्सु मतभिन्नता वर्तते । मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् इति त्रीणि नाटकानि; मेघदूतम्, ऋतुसंहारम् इति द्वे खण्डकाव्ये; कुमारसंभवम्, रघुवंशम् इति द्वे महाकाव्ये एतावती तस्य साहित्यसंपत् ।

दशरूपकेषु प्रथमः तथा प्रमुखः रूपकप्रकारः नाम नाटकम् । इतिहासपुराणमूला कथा, शृङ्गारः वा वीरः वा मुख्यरसः, श्रेष्ठः नायकः (देवः अथवा राजा), पञ्च वा सप्त अङ्काः एते सन्ति नाटकस्य विशेषाः ।

अभिज्ञानशाकुन्तलस्य सप्तमाङ्कात् अयं नाट्यांशः स्वीकृतः । दुर्वाससः शापेन जातात् विस्मरणवशात् दुष्यन्तेन गर्भवती शकुन्तला परित्यक्ता । सा मारीच-आश्रमे पुत्रं सर्वदमनं जनितवती। कश्चित् कालानन्तरं दुष्यन्तः दैववशात् तत्रागतः । वृक्षान्तरितः दुष्यन्तः कौतुकेन बाललीलाः दृष्टवान् । तापसीभ्यां संवादमाध्यमेन तेन स्वपुत्रः कथम् अभिज्ञातः इत्यस्ति अस्य नाट्यखण्डस्य विषयः ।



**बालः** : जृम्भस्व सिंह, दन्तांस्ते गणयिष्ये ।

**प्रथमा (तापसी)** : अविनीत, हन्त, वर्धते तव संरम्भः । स्थाने खलु ऋषिजनेन 'सर्वदमन' इति कृतनामधेयोऽसि!

**राजा** : (आत्मगतम्) किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः? नूनमनपत्यता मां वत्सलयति!

**प्रथमा** : वत्स, एनं बालमृगेन्द्रं मुञ्च । अपरं ते क्रीडनकं दास्यामि ।

**सर्वदमनः** : कुत्र? देह्येतत् । (इति हस्तं प्रसारयति ।)

राजा : कथं चक्रवर्तिलक्षणमप्यनेन धार्यते!

द्वितीया (तापसी) : सुव्रते, न शक्य एष वाचामात्रेण विरमयितुम्। गच्छ त्वम् । मदीय उटजे मृत्तिकामयूरस्तिष्ठति । तमस्योपहर ।

प्रथमा : तथा । (इति निष्क्रान्ता)

द्वितीया : (राजानमवलोक्य) भद्रमुख, एहि तावत्। मोचयानेन बाध्यमानं बालमृगेन्द्रम् ।

राजा : (उपगम्य, सस्मितम्) अयि भो महर्षिपुत्र।

द्वितीया : भद्रमुख, न खल्वयम् ऋषिकुमारः ।

राजा : (बालकमुपलालयन्) न चेत् मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः?

द्वितीया : पुरुवंशः ।

राजा : (आत्मगतम्) कथमेकान्वयो मम!
(प्रकाशम्) कथमस्य जननी अत्र देवगुरोः तपोवने प्रसूता?

द्वितीया : अप्सरस्सम्बन्धेन ।

राजा : (अपवार्य) हन्त, द्वितीयमिदमाशाजननम् । (प्रकाशम्) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी?

द्वितीया : कस्तस्य धर्मदारपरित्यागिनो नाम सङ्कीर्तयितुं चिन्तयिष्यति?

राजा : (स्वगतम्) इयं खलु कथा मामेव लक्ष्यीकरोति । यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि? अथवा अनार्यः परदारव्यवहारः ।

(प्रविश्य मृण्मयूरहस्ता ।)

प्रथमा : सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व ।

बालः : (सदृष्टिक्षेपम्) कुत्र वा मम माता?

राजा : (आत्मगतम्) किं वा शकुन्तलेत्यस्य मातुराख्या? सन्ति पुनर्नामधेयसादृश्यानि।

सर्वदमनः : रोचते मे एष भद्रमयूरः । (इति क्रीडनकमादत्ते ।)

प्रथमा : (विलोक्य सोद्वेगम्) अहो, रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते।

राजा : अलमलमावेगेन । नन्विदमस्य सिंहशावकविमर्दात् परिभ्रष्टम् । (इत्यादातुमिच्छति ।)

उभे : मा खल्विदमवलम्ब्य । कथं, गृहीतमनेन! (इति विस्मयात् उरोनिहितहस्ते परस्परमवलोकयतः ।)

राजा : किमर्थं प्रतिषिद्धाः स्मः?

प्रथमा : शृणोतु महाराजः । एषाऽपराजिता नामौषधिः भगवता मारीचेन दत्ता । एतां किल मातापितरावात्मानं च वर्जयित्वा अपरो भूमिपतितां न गृह्णाति ।

राजा : अथ गृह्णाति?

प्रथमा : ततस्तं सर्पो भूत्वा दशति ।

राजा : भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया?

उभे : अनेकशः ।
(राजा सहर्षं बालं परिष्वजते ।)

सर्वदमनः : मुञ्च माम् । मम खलु तातो दुष्यन्तः। न त्वम् ।

राजा : (सस्मितम्) एष विवाद एव प्रत्याययति।

## वाग्विशेषः ।

१. चक्रवर्ती – सार्वभौमः सम्राट् 'चक्रवर्ती' इति कथ्यते । चक्रवर्तिसम्राजः लक्षणानि इत्थं वर्णितानि– 'अतिरिक्तकरो यस्य ग्रथिताङ्गुलिको मृदुः । चापाङ्कुशाङ्कितो यश्च चक्रवर्ती भवेद् ध्रुवम् ।।' यदा सर्वदमनः तापस्या उल्लेखितमात्रस्य मृत्तिकामयूरस्य ग्रहणार्थं हस्तं प्रसारयति तदा राजा दुष्यन्तः तस्य हस्ते एतानि चक्रवर्तिलक्षणानि सुस्पष्टतया पश्यति स्मरति च, ''सर्वथा चक्रवर्तिनं पुत्रम् अवाप्नुहि'' इति ऋषिदत्तम् आशीर्वचनम् ।

२. सर्वदमनः – सर्वान् दमयति इति सर्वदमनः । बाल्ये एव सः तपोवनस्थान् पशून् दमयति इति मारीचेन तस्य नाम 'सर्वदमन' इति कृतम् ।

३. अप्सरस्सम्बन्धः – अप्सरसा सम्बन्धः । शकुन्तला मेनका नाम अप्सरसः पुत्री आसीत् । दुष्यन्तेन परित्यक्तां शकुन्तलां सा मारीचाश्रमे आनयति । अन्यथा न कापि मानुषी स्त्री देवगुरोः मारीचस्य आश्रमे प्रसूता भवेत् इति तापस्याः अभिप्रायः ।

४. शकुन्तलावण्यम् – शकुन्तस्य लावण्यम् । 'शकुन्तः' नाम पक्षी । यदा तापसी सर्वदमनं मृत्तिकामयूरं दर्शयति तदा सा 'मयूरलावण्यं' शब्दस्य स्थाने 'शकुन्तलावण्यम्' इति शब्दस्य प्रयोगं करोति । एषा तु चतुरा नाट्यक्लृप्तिः कालिदासेन प्रयुक्ता । सर्वदमनः वर्णसाम्यात् मातरं स्मरति । एतस्मात् प्रसङ्गात् इदं स्पष्टं भवति यत्, 'शकुन्तला' इति सर्वदमनस्य मातुः नाम ।

## शब्दार्थः ।

१) संरम्भः – धार्ष्ट्यम् ।
२) उटजः – पर्णकुटी ।
३) वत्सलयति – वत्सलं करोति ।
४) व्यपदेशः – अन्वयः, वंशः ।
५) शकुन्तः – खगः, पक्षी ।
६) रक्षाकरण्डकम् – रक्षासूत्रम् ।
७) विक्रिया – परिणामः ।
८) स्थाने (अव्ययम्) – योग्यम्
९) विमर्दः – सङ्घर्षः ।

## सन्धिविग्रहः ।

१) दन्तांस्ते = दन्तान् + ते ।
२) बालेऽस्मिन्नौरस इव = बाले + अस्मिन् + औरसे + इव ।
३) देह्येतत् = देहि + एतत् ।
४) चक्रवर्तिलक्षणमप्यनेन = चक्रवर्तिलक्षणम् + अपि + अनेन ।
५) मुनिकुमारोऽयम् = मुनिकुमारः + अयम् ।
६) शकुन्तलेत्यस्य = शकुन्तला + इति + अस्य ।
७) मातुराख्या = मातुः + आख्या ।
८) मातापितरावात्मानं = मातापितरौ + आत्मानम् ।

९) कदाचिदस्या: = कदाचित् + अस्या: ।

## समासविग्रह: ।

१) कृतनामधेय: – कृतं नामधेयं यस्य स: । बहुव्रीहि: ।
२) चक्रवर्तिलक्षणम् – चक्रवर्तिन: लक्षणम् । षष्ठी-तत्पुरुष: ।
३) पुरुवंश: – पुरु: इति वंश: । कर्मधारय: ।
४) एकान्वय: – एक: (समान:) अन्वय: यस्य स: । बहुव्रीहि: ।
५) शकुन्तलावण्यम् – शकुन्तस्य लावण्यम् । षष्ठी-तत्पुरुष: ।
६) भूमिपतिता – भूमिं पतिता । द्वितीया-तत्पुरुष: ।
७) रक्षाकरण्डकम् – रक्षायै करण्डकम् । चतुर्थी-तत्पुरुष: ।

## रूपपरिचय: ।

१) जृम्भस्व – जृम्भ् (१ आ.प.), लोट्, मध्यमपुरुष:, एकवचनम् ।
२) गणयिष्ये – गण् (१० उ.प., अत्र आ.प.), लृट्, उत्तमपुरुष:, एकवचनम् ।
३) सङ्कीर्तयितुम् – सम् + कीर्त् (१० उ.प.), हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययम् ।
४) प्रेक्षस्व – प्र + ईक्ष् (१ आ.प.), लोट्, मध्यमपुरुष: एकवचनम् ।
५) राजर्षे: – राजर्षि, इकारान्तम्, पुंलिङ्गम्, पञ्चमी, षष्ठी एकवचनम् ।
६) दास्यामि – दा (१ प.प., ३ उ.प., अत्र प.प.), लृट्, उत्तमपुरुष:, एकवचनम् ।

## भाषाभ्यास: ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) नूनमनपत्यता मां वत्सलयति ।
२) हन्त, द्वितीयमिदमाशाजननम् ।
३) अथवा अनार्य: परदारव्यवहार: ।
४) किं वा शकुन्तलेत्यस्य मातुराख्या?
५) एष विवाद एव प्रत्याययति ।

**२. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

**(१) बालक: सिंहाय जृम्भितुं कथयति, यत: –**

अ) स: सिंहस्य दन्तान् गणयितुम् इच्छति ।
ब) स: सिंहस्य दन्तान् उत्पाटयितुम् इच्छति ।

**(२) तापसी मृत्तिकामयूरम् आनेतुं कथयति, यत: –**

अ) सर्वदमन: वाचामात्रेण विरमयितुं न शक्य: ।
ब) सर्वदमनाय क्रीडनकं रोचते ।

**(३) तापसीभ्यां राजा रक्षाकरण्डकग्रहणात् प्रतिषिद्ध:, यत: –**

अ) रक्षाकरण्डकं कण्टकितम् ।
ब) अपराजिता ओषधि: सर्प: भूत्वा राजानं दशेत् इति तयो: मनसि भीति: ।

३. **उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।**

**१) सर्वदमनस्य मणिबन्धात् – .............. ।**

अ) रक्षाकरण्डकं परिभ्रष्टम् ।

ब) मृत्तिकामयूरः परिभ्रष्टः ।

**२) द्वितीया तापसी सर्वदमनस्य कृते क्रीडनार्थं – .............. ।**

अ) मृत्तिकामयूरम् आनेतुं कथयति ।

ब) मृत्तिकासिंहम् आनेतुं कथयति ।

**३) सर्वदमनस्य हस्तः – .............. ।**

अ) चक्रवर्तिलक्षणयुतः अस्ति ।

ब) सिंहदन्तयुतः अस्ति ।

४. **उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।**

१) चक्रवर्तिलक्षणं धारयति – [ ]

२) सर्वदमनस्य वंशः – [ ]

३) भगवता मारीचेन दत्ता औषधिः – [ ]

५. **पूर्णवाक्येन उत्तरं लिखत ।**

१) ऋषिजनेन बालस्य नामधेयं किं कृतम्?

२) बालमृगेन्द्रः केन बाध्यमानः आसीत्?

३) तापसी बालकाय क्रीडनकरूपेण किं यच्छति?

४) राजा बालस्य प्रसारितहस्ते किं पश्यति?

५) अपराजिता ओषधिः कस्मिन् परिवर्तते?

६. **वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।**

१) तापस्याः उटजे काष्ठमयूरः तिष्ठति ।

२) बालकः चक्रवर्तिलक्षणं धारयति ।

३) बालकः ऋषिकुमारः ।

४) बालकस्य वंशः कुरुवंशः ।

५) रक्षाकरण्डकं सिंहशावकविमर्दात् परिभ्रष्टम् ।

६) सञ्जीवनी नामौषधिः भगवता मारीचेन दत्ता ।

७. **रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।**

१) <u>रक्षाकरण्डकं</u> मणिबन्धे न दृश्यते ।

२) इदं <u>सिंहशावकविमर्दात्</u> परिभ्रष्टम् ।

३) एषा ओषधिः <u>मारीचेन</u> दत्ता ।

४) <u>अनार्यः</u> परदारव्यवहारः ।

८. **सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) मोचय <u>अनेन</u> बाध्यमानं मृगेन्द्रम् । (सर्वदमन)

२) नूनम् अनपत्यता मां वत्सलयति । (दुष्यन्त)
३) क: अस्य व्यपदेश: । (सर्वदमन)
४) ऋषिजनेन 'सर्वदमन' इति कृतनामधेय: अस्ति । (इदम्)

## ९. विशेषण-विशेष्याणां मेलनं कुरुत ।

| अ | आ |
|---|---|
| १) अनार्य: | ओषधि: |
| २) अपराजिता | मारीचेन |
| ३) भगवता | परदारव्यवहार: |
| | दत्ता |

## १०. सन्धितालिकां पूरयत ।

१) बालेऽस्मिन्नौरस इव = ......... + .........+ .........+ ......... ।
२) मुनिकुमारोऽयम् = मुनिकुमार: + ......... ।
३) ................ = मातापितरौ + आत्मानम् ।

## ११. पृथक्करणं कुरुत ।


**(अ) क्रमेण योजयित्वा वाक्यानि पुनर्लिखत ।**

अ) १) बालकस्य सिंहेन सह संरम्भ: ।
२) राज्ञा बालकस्य हस्ते चक्रवर्तिलक्षणदर्शनम् ।
३) बालकस्य हस्तप्रसारणम् ।
४) तापस्या मृत्तिकामयूरम् आनेतुम् आदेश: ।

ब) १) राज्ञा बालकस्य हस्ते चक्रवर्तिलक्षणदर्शनम् ।
२) राज्ञ: मनसि बालकविषये स्नेहनिर्माणम् ।
३) राज्ञा बालकस्य व्यपदेशज्ञानम् ।
४) सर्वदमन: अप्सरस: पुत्र: इति राज्ञा अवगमनम् ।

क) १) राज्ञा सर्वदमनस्य स्वपुत्ररूपेण अभिज्ञानम् ।
२) बालस्य मणिबन्धात् रक्षाकरण्डकस्य परिभ्रंशनम् ।
३) तापसीभ्यां राज्ञ: प्रतिषेध: ।
४) राज्ञा रक्षाकरण्डकग्रहणम् ।

**(आ) रेखाचित्रं पूरयत ।**




***

# तृतीयः पाठः । रामस्य कुशलवयोः च ।

**भूमिका –** ख्रिस्ताब्दस्य दशमे शतके जातेन दिङ्नागकविना विरचितम् कुन्दमाला नाम नाटकं रामायणस्य उत्तरकाण्डाधारितम्। रामेण त्यक्ता सीता वाल्मीकेः आश्रमे यमलौ कुशलवौ जनितवती । वाल्मीकिः स्वरचितं रामायणं नवयुवकौ कुशलवौ अपाठयत् । तौ अयोध्यां प्राप्य रामस्य पुरतः रामायणगायनं कृतवन्तौ । तदा रामस्य स्वपुत्राभ्यां कथं सङ्गमः अभवत् तदस्मिन् नाट्यभागे आस्वादनीयम् । कुन्दमालानाटकस्य पञ्चमषष्ठाभ्याम् अङ्काभ्याम् अयं भागः स्वीकृतः ।



**विदूषकः** : वयस्य, कलादर्शनायागतौ द्वौ तापसकुमारौ कुशलवौ इति । तौ किल भगवतो वाल्मीकिमहर्षेः शिष्यौ प्रवीणौ वीणाकलाविज्ञाने ।

**रामः** : वर्धते मे कुतूहलम् । तत्प्रवेशयाविलम्बितम् । (ततः प्रविशतः तापसौ कुशलवौ ।)

**कुशः** : (अपवार्य) वत्स लव! इदानीं भगवतो वाल्मीकेरादेशात् अम्बामभिवाद्य प्रस्थिते मयि, त्वं पर्णशालायां किमुपदिष्टः अम्बया?

**लवः** : सा सन्दिष्टवती, ‘‘वत्स! युवाभ्यां स्वाभाविकमवलेपं परित्यज्य, महाराजं प्रणम्य, कुशलं च परिप्रष्टव्यम्’’ इति ।

**कुशः** : युज्यते कुशलप्रश्नः, प्रणामस्तु कथम्?

**लवः** : कथम् न?

**कुशः** : अप्रणन्तारः किल अस्मद्विधाः तापसाः ।

**लवः** : क एवमाह?

**कुशः** : अम्बा ।

लवः : प्रणाममपि सा एव उपदिष्टवती । न च गुरुनियोगा विचारमर्हन्ति ।

कुशः : साधयामस्तावत् । अग्रतस्तत्र यत्कालोचितमनुष्ठास्यावः ।

(परिक्रामतः)

रामः : (विलोक्य) किन्नु खल्वेतत् ।

**न चैतदभिजानामि नाकूतमपि किञ्चन।**
**तथाप्यापातमात्रेण चक्षुरुद्बाष्पतां गतम् ।।**

रामः : (निर्वर्ण्य) सुव्यक्तमनेन युगलेन कुलीनेन भवितव्यम् ।

(उभौ प्रणमतः ।)

रामः : कतमो वर्ण आश्रमो वा भवतः?

लवः : द्वितीयो वर्णः प्रथम आश्रमः ।

रामः : (आत्मगतम्) अनयोः क्षत्रियवर्णः! (प्रकाशम्) अथ को वा भवतोः वंशस्य कर्ता?

लवः : भगवान् सहस्रदीधितिः ।

रामः : कथमस्मत्समानाभिजनौ संवृत्तौ । कच्चिदस्ति युवयोः मिथः सम्बन्धः?

लवः : भ्रातरौ आवां सोदर्यौ ।

रामः : संवादी सन्निवेशः । वयसस्तु न किञ्चिदन्तरम् ।

लवः : आवां यमलौ ।

रामः : किन्नामधेयो भवतोर्गुरुः?

लवः : ननु भगवान् वाल्मीकिः ।

रामः : केन सम्बन्धेन?

लवः : उपनयनोपदेशेन ।

रामः : अहम् अत्रभवतोः शरीरस्य धातारं पितरं वेदितुमिच्छामि ।

लवः : न हि जानाम्यस्य नामधेयम् । न कश्चिदस्मिंस्तपोवने तस्य नाम व्यवहरति।

रामः : अहो! आश्चर्यम् ।

कुशः : जानाम्यस्य नामधेयम् ।

रामः : कथ्यताम् ।

कुशः : निरनुक्रोशो नाम ।

विदूषकः : निरनुक्रोश इति क एवं भणति?

कुशः : अम्बा ।

विदूषकः : किं कुपितैवं भणत्युत प्रकृतिस्था?

कुशः : यद्यावयोः बालभावजनितं कञ्चिदविनयं पश्यति तदैवमधिक्षिपति, ''निरनुक्रोशस्य पुत्रौ, मा चापलम्'' इति ।

रामः : अपि सन्निहितस्तत्रभवान् निरनुक्रोशो युष्मदाश्रमे?

लवः : न सन्निहितः ।

रामः : भोः किन्नामधेया युवयोर्जननी?

लवः : तस्या द्वे नामनी ।

विदूषकः : कथमिव?

लवः : तपोवनवासिनो देवीति नाम्ना आह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

रामः : (जनान्तिकम्) कुमारयोः अनयोः अस्माकं च सर्वसंवादी कुटुम्बवृत्तान्तः!

विदूषकः : कथमिव?

रामः : पश्य, एतावपि क्षत्रियौ सूर्यान्वयौ, पितरि च अनयोर्दारुणत्वसूचनो निरनुक्रोशशब्दः, मातुश्च माहात्म्यविभावनो देवीशब्दः। (ततः प्रविशति तापसः कण्वः।)

कण्वः : शृणोतु महाराजः । सूर्यकुलवधूः देवी सीता वाल्मीकितपोवने इमौ यमौ तनयौ जनयामास। वाल्मीकिमुनिः तयोः नाम कुशलवौ इति चकार ।

रामः : कथमेतावेव सीतातनयौ । हा! पुत्र कुश! हा! पुत्र लव!

कुशलवौ : कथमयं तातः । हा तात । (सर्वे परस्परमालिङ्गन्ति ।)

## वाग्विशेषः ।

१. आश्रमव्यवस्था - आश्रमव्यवस्था नाम प्राचीन-भारतीय-समाज-व्यवस्थायाः विशेषः । भारतीयसंस्कृत्यां मनुष्यजीवनस्य चत्वारः विभागाः कल्पिताः । ते 'आश्रम' इति संज्ञया प्रसिद्धाः । प्रथमे ब्रह्मचर्याश्रमे अध्ययनं कर्तव्यम् । द्वितीये गृहस्थाश्रमे विवाह-अपत्यसंवर्धन-उपजीविकादीनि प्रापञ्चिकानि कर्तव्यानि तथा सामाजिककर्तव्यानि पूरयितव्यानि । तृतीये वानप्रस्थाश्रमे प्रपञ्चात् निवृत्तो भूत्वा, वनं समाश्रित्य, शान्तिपूर्णं जीवनं यापनीयम् । चतुर्थे संन्यासाश्रमे सर्वसङ्गपरित्यागेन मोक्षप्राप्तये यतनीयम् । एतादृशं मनुष्यजीवनस्य व्यवस्थापनम् 'आश्रमव्यवस्था' इति नाम्ना विख्यातम् ।

२. उभौ परिक्रामतः- संस्कृतनाट्ये एषा रङ्गसूचना पुनः पुनः दृश्यते । परिक्रमणं नाम मञ्चे एव मण्डलाकारं भ्रमणम्, पुनः मूलस्थानग्रहणं च । प्राचीनकाले प्रकाशयोजना, रङ्गमञ्चपरिवर्तनं वा शक्यं नासीत् । तदा स्थलपरिवर्तनं सूचयितुं मञ्चे स्थितानि पात्राणि परिक्रमणं कुर्वन्ति स्म ।

## शब्दार्थः ।

१) अवलेपः - गर्वः ।
२) नियोगाः - आज्ञाः ।
३) आकूतम् - प्रयोजनम् ।
४) आपातमात्रेण - सहसा, अकस्मात् ।
५) सहस्रदीधितिः - सूर्यः (सहस्रकिरणयुक्तः) ।
६) अभिजनः - वंशः ।
७) संनिवेशः - आकृतिः, रूपम् ।
८) शरीरस्य धाता - जन्मदाता ।
९) निरनुक्रोशः - कठोरहृदयः ।
१०) विभावनः - सूचकः, दर्शकः ।
११) सर्वसंवादी - सर्वदृष्ट्या समानः ।

## सन्धिविग्रहः ।

१) वाल्मीकेरादेशात् = वाल्मीकेः + आदेशात् ।
२) चैतदभिजानामि = च + एतत् + अभिजानामि ।
३) तथाप्यापातमात्रेण = तथा + अपि + आपातमात्रेण ।

४) चक्षुरुद्बाष्पताम् = चक्षुः + उद्बाष्पताम् ।
५) कश्चिदस्मिंस्तपोवने = कश्चित् + अस्मिन् + तपोवने ।
६) वाल्मीकिर्वधूरिति = वाल्मीकिः + वधूः + इति ।
७) एतावपि = एतौ + अपि ।
८) यद्यावयोः = यदि + आवयोः ।
९) गुरुनियोगा विचारम् = गुरुनियोगाः + विचारम् ।

## समासविग्रहः ।

१) तापसकुमारौ – तापसौ च असौ कुमारौ च । कर्मधारयः ।
२) कुशलवौ – कुशः च लवः च । इतरेतरद्वन्द्वः ।
३) वाल्मीकिमहर्षेः – वाल्मीकिः इति महर्षिः, तस्य । कर्मधारयः ।
४) सहस्रदीधितिः – सहस्रं दीधितयः यस्य सः, बहुव्रीहिः ।
५) प्रकृतिस्था – प्रकृत्यां तिष्ठति इति । उपपद–तत्पुरुषः ।
६) युष्मदाश्रमे – युवयोः आश्रमः, तस्मिन् । षष्ठी–तत्पुरुषः ।

## रूपपरिचयः ।

१) सन्दिष्टवती – सम् + दिश् (६ उ.प.), क्तवत्–प्रत्ययान्त–विशेषणम्, स्त्रीलिङ्गम्, प्रथमा एकवचनम्।
३) परित्यज्य – परि + त्यज् (१ प.प.), पूर्वकालवाचक–धातुसाधित–ल्यबन्त–अव्ययम् ।
४) युज्यते – युज् (७ उ.प.), कर्मणि–लट्, प्रथमपुरुषः, एकवचनम् ।
५) भवितव्यम् – भू (१ प.प.), कृत्य–प्रत्ययान्त–विशेषणम्, नपुंसकलिङ्गम्, प्रथमा एकवचनम् ।
६) अनुष्ठास्याव: – अनु + स्था (१ प.प.), लृट्–लकारः, उत्तमपुरुषः, द्विवचनम् ।
७) धातारम् – धातृ, ऋकारान्तम्, पुंलिङ्गम्, द्वितीया एकवचनम् ।
८) वेदितुम् – विद् (२ प.प.), हेत्वर्थक–धातुसाधित–तुमन्त–अव्ययम् ।
९) नामनी – नामन्, अन्नन्तम्, नपुंसकलिङ्गम्, प्रथमा, द्वितीया, सम्बोधनम्, द्विवचनम् ।
१०) शृणोतु – श्रु (५ प.प.), लोट्, प्रथमपुरुषः, एकवचनम् ।
११) चकार – कृ (८ उ.प., अत्र प.प.), लिट्, प्रथमपुरुषः, एकवचनम् ।

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) न च गुरुनियोगा विचारमर्हन्ति ।
२) न कश्चित् तस्मिंस्तपोवने तस्य नाम व्यवहरति ।
३) तस्या द्वे नामनी ।
४) कुमारयोः अनयोः अस्माकं च सर्वसंवादी कुटुम्बवृत्तान्तः ।

**२. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

**१) कुशः महाराजं प्रणामं कर्तुं न इच्छति, यतः–**

अ) तापसाः अप्रणन्तारः इति तस्य अम्बा आह ।
ब) कुशः गर्वान्वितः आसीत् ।

२) **कुशस्य मतानुसारेण तस्य पितु: नाम निरनुक्रोश: इति अस्ति, यत:–**

अ) भगवान् वाल्मीकि: 'निरनुक्रोशस्य पुत्रौ' इति लवकुशौ अधिक्षिपति ।

ब) तस्य अम्बा 'निरनुक्रोशस्य पुत्रौ' इति लवकुशौ अधिक्षिपति ।

## ३. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

१) **भगवान् वाल्मीकि: कुशलवयो: मातरं – .............. ।**

अ) 'वधू:' इति आह्वयति ।

ब) 'देवी' इति आह्वयति ।

२) **सीता कुशलवौ सन्दिष्टवती – .............. ।**

अ) महाराजं केवलं कुशलं परिप्रष्टव्यम् ।

ब) महाराजं प्रणम्य कुशलं च परिप्रष्टव्यम्

३) **कुशलवौ दृष्ट्वा एव रामस्य – .............. ।**

अ) चक्षु: उद्बाष्पतां गतम् ।

ब) चक्षु: निमीलितम् ।

## ४. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

१) कुशलवयो: वंशस्य कर्ता – [ ]

२) कुशलवयो: गुरो: नामधेयम् – [ ]

## ५. पूर्णवाक्येन उत्तरं लिखत ।

१) कुशलवौ कस्यां कलायां प्रवीणौ ?

२) लवकुशयो: वंशस्य कर्ता क: ?

३) लवकुशयो: जनन्यां वाल्मीकिमुनि: कथम् आह्वयति ?

४) कुशलवयो: नामकरणं केन कृतम् ?

## ६. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।

१) कुशलवौ नाट्यकलायां प्रवीणौ ।

२) सहस्रदीधिति: तयो: नाम कुशलवौ इति चकार ।

३) कुशलवयो: आश्रम: द्वितीय: ।

४) कुशलवयो: सन्निवेश: विसंवादी ।

## ७. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।

१) कुशलवौ <u>वीणाकलाविज्ञाने</u> प्रवीणौ ।

२) <u>कुशलवयो:</u> प्रथम: आश्रम: ।

३) <u>तपोवनवासिनो</u> देवीति नाम्ना आह्वयन्ति ।

४) देवी सीता <u>वाल्मीकितपोवने</u> तनयौ जनयामास ।

## ८. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) <u>लवकुशौ</u> किल भगवतो वाल्मीकिमहर्षे: शिष्यौ । (एतद्)

२) त्वं पर्णशालायां किमुपदिष्ट: <u>अम्बया</u> ? (तद्)

## ९. विशेषण–विशेष्याणां मेलनं कुरुत ।

| अ | आ |
|---|---|
| १) भगवत: | सन्निवेश: |
| २) संवादी | आश्रम: |
| ३) कुलीनेन | युगलेन |
| ४) प्रथम: | क्षत्रियौ |
| ५) सूर्यान्वयौ | वाल्मीकिमहर्षे: |
| | सम्बन्धेन |

## १०. सन्धितालिकां पूरयत ।

१) तथाप्यापातमात्रेण = ......... + .........+ आपातमात्रेण ।

२) कश्चिदस्मिंस्तपोवने = कश्चित् + ......... + तपोवने ।

३) .................. = गुरुनियोगा: + विचारम् ।

## ११. पृथक्करणं कुरुत ।

**(अ) क्रमेण योजयित्वा वाक्यानि पुनर्लिखत ।**


१) भगवत: वाल्मीके: आदेश: ।

२) अम्बाप्रणमनम् ।

३) अम्बया उपदेशनम् ।


४) कुशलवयो: रामसभाम् आगमनम् ।

**(आ) प्रवाहिजालं पूरयत ।**




(गुरुविषये पृच्छा, जन्मदातृविषये पृच्छा, वर्णाश्रमविषये पृच्छा, वंशकर्तृविषये पृच्छा ।)

**(इ) वृक्षरेखाचित्रं पूरयत ।**




***

# चतुर्थः पाठः । भगवदज्जुकीयम्–प्रहसनम् ।

**भूमिका** – बोधायनकवेः इयं नाट्यकृतिः । दशरूपकेषु अन्यतमं प्रहसनम्। हास्यरसप्रधानम् एतदिति तस्य नाम्ना एव स्पष्टम् । एकाङ्केऽस्मिन् कविकल्पितं कथानकम् । अस्मिन् तपस्विजनाः, ब्राह्मणाः, गणिकाः, धूर्ताः एतादृशानि पात्राणि सन्ति । तेषां स्वभावविशेषाः, संवादाः, अभिनयः सर्वमेव हास्यकरं भवति।

भगवान् इति एकः परिव्राजकः । अज्जुका नाम गणिका । प्रमादात् यमदूतः एकस्य प्राणान् अन्यस्य शरीरे स्थापयति । तेन आचार्यः गणिकासदृशं व्यवहरति, गणिका च आचार्यसदृशम् । अतः सञ्जायते 'भगवदज्जुकीयम्'।

(परिव्राजकः प्रविशति ।)

**परिव्राजकः** : शाण्डिल्य, शाण्डिल्य, (पृष्ठतः विलोक्य) न तावद् दृश्यते । न जाने निद्रावशं गतः अथवा मृतः। भवतु, एकमात्रः शिष्यः, दृढं परिपालयितव्यः ।

(ततः प्रविशति शाण्डिल्यः ।)

**शाण्डिल्यः** : भोः, क्षुधा मां बाधते । अस्माकं गेहे अशननाशेन अतीव बुभुक्षितः अहं भिक्षालोभेन अस्य दुष्टाचार्यस्य भाण्डभारगर्दभः संवृत्तः । का गतिः । भगवन्तम् एव अनुसरामि। एष खलु भगवान्। (उपगम्य) क्षम्यतां, क्षम्यतां भगवन् ।

**परिव्राजकः** : न भेतव्यम् । आगच्छ, अध्ययनकालः इदानीम् ।

**शाण्डिल्यः** : अपसार्य अध्ययनं, भिक्षार्थमेव गच्छावः।

**परिव्राजकः** : मूर्ख, प्रातःकालः अयम्, न भिक्षावेला। तस्माद् अध्ययनार्थम् इदमुद्यानं प्रविशावः ।

**शाण्डिल्यः** : प्रथमः कल्पः । (उद्यानं प्रविश्य) अहो रमणीयं खलु इदमुद्यानम् ।

**परिव्राजकः** : इह एव आसिष्यावहे । आगच्छ वत्स, अधीष्व तावत् ।

**शाण्डिल्यः** : न तावद् अधीष्ये । अध्ययनेन किं भवति ?

**परिव्राजकः** : अध्ययनेन अष्टसिद्धयः लभ्यन्ते ।

**शाण्डिल्यः** : अष्टसिद्धयः इति? भगवन्, तेन त्वं परदेहं परगेहं च प्रवेष्टुं समर्थः भवसि?

**परिव्राजकः** : अथ किम् । छिद्यताम् एषा कथा । तूष्णीं स्थित्वा योगं चिन्तयावः ।

**शाण्डिल्यः** : (आत्मगतम्) भगवान् तूष्णीं स्थित्वा योगं चिन्तयतु। अहं तु सुसमाहितः ओदनं चिन्तयामि । लड्डुकाः, मोदकाः....

(ततः प्रविशतः गणिका सखी च ।)

**गणिका** : हञ्जे मधुकरिके, कुत्र खलु सः मम चित्तचौरः रामिलकः ?

**शाण्डिल्यः** : (दृष्ट्वा) अविधा, का नु खलु एषा? तरुणी, दर्शनीया, अस्य उद्यानस्य अलङ्कारः इव ।

**सखी** : अज्जुके, वसन्तसेने..

**शाण्डिल्यः** : अयि, गणिका खलु इयं वसन्तसेना इति मन्ये । स्वरः अपि अस्याः अतिमधुरः। अहो रूपम्। अहो आनन्दः । अधुना यमः आगच्छतु यमदूतः वा आगच्छतु, अहं तु इत्थमेव नेत्राभ्याम् अस्याः सौन्दर्यरसपानं करिष्ये ।

(ततः प्रविशति यमदूतः ।)

**यमदूतः** : (आत्मगतम्) यमदूतोऽहम् । क्षीणायुषां प्राणिनां प्राणान् हर्तुं यमेन प्रेषितः। उक्तः च 'गणिकायाः

वसन्तसेनायाः प्राणान् अपहर' इति । इयं सा वसन्तसेना ।

**गणिका** : मधुकरिके, पश्य, दर्शनीयः अशोककिसलयः । एनं गृह्णामि । (तथा करोति ।)

**यमदूतः** : अयं स कालः । यावत् सर्पो भूत्वा, अशोककोटरे स्थित्वा, दष्ट्वा विषवेगेन प्राणान् हरामि । (तथा करोति ।)

**गणिका** : हम्, केनापि दष्टाऽस्मि ।(भूमौ पतति ।)

**सखी** : अज्जुके, अयं सः अशोककोटरात् निर्गतः कालसर्पः । परित्रायतां परित्रायताम् ।

**शाण्डिल्यः** : अविधा, भगवन्, परित्रायताम् । परित्यजति खलु प्राणान् एषा अज्जुका ।

**परिव्राजकः** : वासांसि जीर्णानि यथा विहाय..

**शाण्डिल्यः** : अलं तत्त्वज्ञानप्रवचनेन । शीघ्रं कोऽपि उपायः चिन्त्यताम् । हा हन्त, मृता खलु एषा । (रोदिति ।)

**परिव्राजकः** : (विचिन्त्य) शाण्डिल्य, अलं रोदनेन । अस्माभिः संन्यासिभिः न शोकः करणीयः ।

**शाण्डिल्यः** : आः अपेहि निःस्नेह! मन्ये, निष्फलं ते योगसामर्थ्यं यदि अस्याः शरीरे पुनः प्राणसञ्चारं कारयितुं न शक्नोषि ।



**परिव्राजकः** : किम् आह । मम योगसामर्थ्यं निष्फलमिति । पश्य इदानीम्। (आत्मगतम्) अस्याः गणिकायाः शरीरे मम प्राणान् स्थापयामि ।
(मन्त्रं पठित्वा तथा करोति ।)

**गणिका** : (उत्थाय) शाण्डिल्य, शाण्डिल्य..

**शाण्डिल्यः** : (सहर्षम्) अहो, पुनर्जीविता खलु एषा । माम् एव आह्वयति । (उपगम्य) भवति, अयमस्मि ।

**गणिका** : आगच्छ शाण्डिल्य, अधीष्व तावत् । (भगवान् इव पद्मासने उपविशति ।)

**शाण्डिल्यः** : हा हन्त । इहापि अध्ययनम् । भवतु, भगवन्तमेव उपसर्पामि । (उपसृत्य) अयि, मृतः भगवान् । हा आचार्य..

(ततः प्रविशति यमदूतः ।)

**यमदूतः** : अहो प्रमादः । न सा इयं वसन्तसेना । सा तु अन्या । तस्याः प्राणान् हर्तुम् अहं प्रेषितः, न अस्याः। यावद् अस्याः शरीरम् अग्निसंयोगं न उपनीयते तावद् अस्याः प्राणान् अस्याः शरीरे स्थापयामि । (विलोक्य) अयि, उत्थिता खलु इयम् ।

अहो किं नु खलु इदम्? अस्याः प्राणाः मम करे । तथापि कथं सा उत्थिता । अधुना एतान् प्राणान् कुत्र स्थापयामि? (सर्वतः विलोक्य) अत्र कोऽपि परिव्राजकः मृतः दृश्यते। भवतु, दृष्टम्। अस्याः गणिकायाः प्राणान् परिव्राजकशरीरे स्थापयामि । (तथा करोति ।)

**परिव्राजकः** : (उत्थाय) कुत्र मे प्राणवल्लभः हृदयेश्वरः रामिलकः । एहि रे, त्वां द्रष्टुम् उत्सुका अहम् ।

**शाण्डिल्यः** : भगवन् किमेतद्? भवतः आश्रमस्य विरुद्धः अयमाचारः ।

**परिव्राजकः** : न किमपि आश्रमविरुद्धम् । एष खलु यौवनाश्रमः। एहि, उद्याने रामिलकम् अन्विष्यावः । (इतस्ततः परिभ्रमति ।)

**शाण्डिल्यः** : (गणिकाम् उपसृत्य) भवति ....

**गणिका** : (क्रोधेन) मूर्ख, मा स्पृश । तूष्णीं स्थित्वा योगं चिन्तय ।

**शाण्डिल्यः** : भगवन्, किमेतद् ? भवति, किमिदम्? (प्रेक्षकान् उद्दिश्य) भोः, एषः आचार्यः न आचार्यवद् आचरति । एषा अज्जुका न अज्जुकावद् आचरति । (विहस्य) भगवदज्जुकीयं नाम संवृत्तम् ।

## वाग्विशेषः ।

१. अष्टसिद्धयः - सिद्धिः नाम आध्यात्मिकी शक्तिः । सा योगमार्गेण अथवा तपश्चर्यया प्राप्यते इति मतम् । नैकाः सिद्धयः सन्ति । तासु एताः अष्ट प्रसिद्धाः-

अणिमा महिमा चैव लघिमा गरिमा तथा ।
प्राप्तिः प्राकाम्यम् ईशित्वं वशित्वं चाष्टसिद्धयः ।।

२. परिव्राजकः - संन्यासाश्रमे मनुष्येण एकस्मिन् एव स्थाने वास्तव्यं नैव करणीयं, बहुषु स्थानेषु अटनं कर्तव्यम् इति अस्ति निर्बन्धः । अतः संन्यासी 'परिव्राजकः' (परितः व्रजति इति) इति नाम्ना ज्ञायते ।

३. यौवनाश्रमः - वस्तुतः ब्रह्मचर्यं, गार्हस्थ्यं, वानप्रस्थं, संन्यासः इति चत्वारः आश्रमाः भारतीयसंस्कृत्यां कल्पिताः । वस्तुतः यौवनाश्रमः न आश्रमः । स्वस्य आचरणस्य समर्थनार्थं परिव्राजकशरीरे स्थिता गणिका वदति, "एषः यौवनाश्रमः" इति ।

४. प्रथमः कल्पः - संस्कृतनाट्येषु रूढः वाक्प्रयोगः । उत्तमा कल्पना इति आशयः ।

## शब्दार्थः ।

१) अशननाशः - अन्नस्य अभावः ।
२) भाण्डभारगर्दभः - भारवाहकः गर्दभः ।
३) किसलयः - नूतनपल्लवः ।

## सन्धिविग्रहः ।

१) यमदूतोऽहम् = यमदूतः + अहम् ।
२) दष्टाऽस्मि = दष्टा + अस्मि ।

## समासविग्रहः ।

१) अशननाशेन - अशनस्य नाशः, तेन । षष्ठी-तत्पुरुषः ।

२) भिक्षालोभेन - भिक्षाया: लोभ:, तेन । षष्ठी-तत्पुरुष: ।
३) दुष्टाचार्यस्य - दुष्ट: आचार्य:, तस्य । कर्मधारय: ।
४) चित्तचौर: - चित्तस्य चौर: । षष्ठी-तत्पुरुष: ।
५) परगेहम् - परस्य गेहम् । षष्ठी-तत्पुरुष: ।
६) क्षीणायुषाम् - क्षीणम् आयु: येषां ते, तेषाम् । बहुव्रीहि: ।
७) अशोककिसलय: - अशोकस्य किसलय: । षष्ठी-तत्पुरुष: ।
८) निष्फलम् - निर्गतं फलं यस्मात् तत् । बहुव्रीहि: ।

### रूपपरिचय: ।

१) दृश्यते - दृश् (१ प.प.), कर्मणि लट्, प्रथमपुरुष:, एकवचनम् ।
२) बाधते - बाध् (१ आ.प.), लट्, प्रथमपुरुष:, एकवचनम् ।
३) उपगम्य - उप + गम् (१ प.प.), पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययम् ।
४) आसिष्यावहे - आस् (२ आ.प.), लृट्, उत्तमपुरुष:, द्विवचनम् ।
५) लभ्यन्ते - लभ् (१ आ.प.), कर्मणि, लट्, प्रथमपुरुष:, बहुवचनम् ।
६) प्राणिनाम् - प्राणिन् इन्नन्तम्, पुंलिङ्गम्, षष्ठी बहुवचनम् ।
७) स्थित्वा - स्था (१ प.प.) पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्ययम् ।
८) कारयितुम् - कृ (८ उ.प.), णिजन्तम्, हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययम् ।
९) वासांसि - वासस्, सकारान्तम्, नपुंसकलिङ्गम्, प्रथमा-द्वितीया बहुवचनम् ।
१०) अधीष्व - अधि + इ (२ आ.प.), लोट्, मध्यमपुरुष:, एकवचनम् ।

### भाषाभ्यास: ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) हा हन्त इहापि अध्ययनम् ।
२) एष: खलु यौवनाश्रम: ।
३) अयं स: अशोककोटरात् निर्गत: ।
४) भगवदज्जुकीयं नाम संवृत्तम् ।

**२. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

**(१) शाण्डिल्य: परिव्राजकस्य भाण्डभारगर्दभ: संवृत्त:, यत:-**

अ) स: ज्ञानलुब्ध: । आ) स: भिक्षालुब्ध: ।

**(२) यमदूत: उद्यानं प्रविशति, यत:-**

अ) स: यमेन उद्यानस्य शोभां द्रष्टुं प्रेषित: ।
ब) स: यमेन वसन्तसेनाया: प्राणान् हर्तुं प्रेषित: ।

**(३) परिव्राजक: गणिकाया: शरीरे स्वप्राणान् स्थापयति, यत:-**

अ) स: स्वयोगसामर्थ्यं दर्शयितुम् इच्छति ।
ब) यमदूतस्य तथैव आदेश: ।

**(४) यमदूत: गणिकाया: प्राणान् परिव्राजकशरीरे स्थापयति, यत:-**

अ) रामिलक: गणिकाया: प्राणवल्लभ: ।
ब) गणिका तु उत्थिता किन्तु परिव्राजक: मृत: ।

### ३. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

**१) यमदूत: गणिकाया: प्राणहरणार्थम् – .............. ।**

अ) अशोककोटरे सर्प: भूत्वा तिष्ठति ।

ब) अशोककोटरे मधुमक्षिका भूत्वा तिष्ठति ।

**२) योगसामर्थ्यात् परिव्राजक: – .............. ।**

अ) शाण्डिल्यस्य प्राणान् अज्जुकायां शरीरे स्थापयति ।

ब) स्वप्राणान् अज्जुकाया: शरीरे स्थापयति ।

**३) यमदूत: गणिकाया: प्राणन् – .............. ।**

अ) परिव्राजकस्य शरीरे स्थापयति ।

ब) गणिकाया: शरीरे स्थापयति ।

### ४. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

१) शाण्डिल्यस्य बुभुक्षाया: कारणम् – [ ]

२) अज्जुकाया: चित्तचौर: – [ ]

३) कालसर्पस्य निर्गमनस्थानम् – [ ]

### ५. पूर्णवाक्येन उत्तरं लिखत ।

१) अध्ययनेन किं भवति ?

२) गणिकाया: चित्तचौर: क: ?

३) यमदूत: यमेन किमर्थं प्रेषित: ?

४) कै: शोक: न करणीय: ?

५) यमदूत: गणिकाया: प्राणान् कुत्र स्थापयति ?

### ६. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।

१) अहो रमणीयं खलु इदमुद्यानम् ।

२) अध्ययनेन अष्टादशसिद्धय: लभ्यन्ते ।

३) अस्माभि: संन्यासिभि: शोक: करणीय: ।

४) अज्जुका न अज्जुका इव आचरति ।

### ७. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।

१) तस्माद् <u>अध्ययनार्थम्</u> इदमुद्यानं प्रविशाव: ।

२) <u>अध्ययनेन</u> अष्टसिद्धय: लभ्यन्ते ।

३) स्वर: अस्या: <u>अतिमधुर:</u> ।

४) अज्जुका <u>प्राणान्</u> परित्यजति ।

### ८. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) क्षुधा <u>मां</u> बाधते । (शाण्डिल्य)

२) <u>अध्ययनेन</u> अष्टसिद्धय: लभ्यन्ते (इदम्)

३) <u>केन</u> दष्टा अस्मि । (सर्प)

४) संन्यासिभि: न शोक: करणीय: । (तद्)
५) मम योगसामर्थ्यं निष्फलम् । (परिव्राजक)
६) गणिका माम् एव आह्वयति । (शाण्डिल्य)
७) गणिकाया: प्राणान् परिव्राजकशरीरे स्थापयामि । (किम्)
८) त्वां द्रष्टुम् उत्सुका अहम् । (रामिलक)
९) उद्याने रामिलकम् अन्विष्याव: । (एतद्)
१०) आचार्य: न आचार्यवद् आचरति । (तद्)

## ९. विशेषण-विशेष्याणां मेलनं कुरुत ।

| अ | आ |
|---|---|
| १) एकमात्र: | वासांसि |
| २) अतिमधुर: | स्वर: |
| ३) क्षीणायुषाम् | रामिलक: |
| ४) जीर्णानि | परिव्राजक: |
| ५) प्राणवल्लभ: | प्राणिनाम् |
| | शिष्य: |

## १०. सन्धितालिकां पूरयत ।

१) इत्थमेव = ......... + ......... ।
२) ............ = निष्फलम् + इति ।

## ११. पृथक्करणं कुरुत ।

**क्रमेण योजयित्वा वाक्यानि पुनर्लिखत ।**

अ) १) वसन्तसेनाया: उद्यानागमनम् ।
२) परिव्राजकस्य शाण्डिल्यस्य च उद्यानप्रवेश: ।
३) गणिकादर्शनेन शाण्डिल्यस्य आनन्द: ।
४) परिव्राजकस्य योगचिन्तनविषये आदेश: ।

ब) १) सर्पदंशेन गणिकाया: मृत्यु: ।
२) यमादेशेन यमदूतस्य उद्यानप्रवेश: ।
३) गणिकामृत्युकारणात् शाण्डिल्यस्य शोक : ।
४) यमदूतस्य सर्परूपधारणम् ।

क) १) गणिकाया: पुनरुज्जीवनम् ।
२) परिव्राजकस्य गणिकादेहप्रवेश: ।
३) गणिकाया: मृत्यु: ।
४) गणिकाया: आचार्यवद् भाषणम् ।

***

## पञ्चमः पाठः । लोकरञ्जकं लोकनाट्यम् ।

**भूमिका** – लोकनाट्यं बहुजनप्रियम् । तत् शृङ्गारहास्यरसयुक्तं, सङ्गीतनृत्यसमन्वितम्, सामाजिकव्यङ्गबोधकं भवति । रोचकाः संवादाः तस्य विशेषः । गणेशवन्दनया लोकनाट्यस्य प्रारम्भः तथा भरतवाक्य-प्रार्थनया समाप्तिः भवति । गोपिकाः तथा कृष्णसखा 'पेन्द्या' इति एतेषां प्रवेशकः नाम 'गणगवळण' इति लोकनाट्यस्य प्रास्ताविकम् अङ्गम् ।

प्रभाकर-महादेव-भातखण्डेमहोदयः (जन्म-१९४०) आधुनिक-संस्कृत-कविषु अग्रगण्यः । तेन विंशत्यधिकानि संस्कृत-नाटकानि लिखितानि, दिग्दर्शितानि, प्रस्तुतानि, अभिनीतानि च । संस्कृतनाटकेषु विषयवैविध्यं तथा स्वरूपवैविध्यं साधयितुं सः नित्यं प्रयत्नशीलः । तेन लिखितं 'मुक्ता' नाम संस्कृत-लोकनाट्यं रसिकैः प्रभूतं गौरवितम् । तस्मात् स्वीकृतः अयं नाट्यांशः लोकनाट्यस्य बहून् विशेषान् दर्शयति ।

**सूत्रधारः** : (पटाभिमुखम् अवलोक्य) आर्ये, इतस्तावद् । सुविहितानि रङ्गमङ्गलानि । तत्कथय कं विषयमधिकृत्य अद्य नाटकं प्रयोक्तव्यम् इति ।

**सखी** : (प्रविश्य) तत्रभवती भट्टिनी भवत्सार्धम् अद्य नाटकं न नाटयिष्यति । सा भणति, ''भवतः नाटकेषु न नावीन्यं न वा वैविध्यम् । ताः एव पर्युषिताः पुराणकथाः। ते एव राजानः । एते विद्वांसः अपि वारं वारं तादृशमेव नाटकं द्रष्टुं न इच्छन्ति ।'' तत्कथं तत्रभवती भूमिकां नाटयेत्?

**नटः** : (सहसा प्रविश्य) स्वामिन् ।

**सूत्रधारः** : किं रे शैलूष?

**नटः** : दुष्पचैः विद्वज्जडैश्च नाटकैः अग्निमान्द्यपीडा-सन्तप्तानां रसिकवराणां स्वास्थ्यार्थं, परितोषार्थं, भट्टिन्याश्च प्रकोपशमनार्थं प्रयोक्तव्यम् अस्माभिः .......

**सूत्रधारः** : किम्?

**नटः** : लोकनाट्यम् ।

**सूत्रधारः** : अब्रह्मण्यम् ! अब्रह्मण्यम् ! लोकनाट्यं नाम तमाशा । किम्, गीर्वाणभाषायां लोकनाट्यं प्रयोक्तव्यम्?

**नटः** : कस्तत्र दोषः? सुरवाणी न केवलं विद्वद्धनम् । सा अपि लोकभाषा एव। अतः लोकानां साहित्य-नाटक-काव्यादीनां संस्कृते लेखनम् आवश्यकम् एव ।

**सखी** : आम् । सत्यं वदति एष नटः ।
(प्रेक्षकाः-(उच्चैः) 'लोकनाट्यं, लोकनाट्यमेव प्रयोक्तव्यम्')

**सूत्रधारः** : भवतु । त्वमेव सूत्रधारो भूत्वा लोकनाट्यं प्रदर्शय ।

**नटः** : स्वागतम् । स्वागतं सुहृद्भ्यः रसिकवरेभ्यः । यथाऽदिष्टं भवद्भिः, लोकनाट्यमेव प्रयुज्यते । (पटाभिमुखं वीक्ष्य) अयि भट्टिनि, नटाः, चेटाः, गायकाः, वादकाः, नर्तकाः, आगच्छत। (सर्वे प्रविशन्ति)

गणराज सकलनन्दन । गणराज सकलनन्दन ।।
हे देव सुरवर सिद्धिबुद्धिरमण । गणराज सकलनन्दन ।।१।।



प्रार्थये नाट्यप्रयोगार्थम् ।
जनानां मनोरञ्जनार्थम् ।
वदद्भ्यः संस्कृतमाख्यानम् ।
नटेभ्यो देहि कलाज्ञानम् ।।२।।

**नटः** : अये कथम् । पेन्द्या आगतः । अरे पेन्द्या, कथं त्वं विमनस्कः दृश्यसे ।

**पेन्द्या** : अरे... मुक्ता! हे बन्धो, वञ्चितोऽस्मि मुक्तया । कथम् एषा प्राप्तव्या? वशीकर्तव्या?

**नटः** : पेन्द्या, नाहमत्र समर्थः । परम् एकं मार्गं प्रदर्शयामि । सः मुक्ताप्राप्तये भविष्यति ।

**पेन्द्या** : कथय । कथय । किमर्थं विलम्बसे ।

**नटः** : अस्ति हट्टविभागे एकः वशीकरणाचार्यः । तमेव पृच्छावः । एहि । (निर्गतौ)
(पुनः प्रविशतः पेन्द्या नटश्च ।)
(भृङ्गाचार्यः प्रविशति ।)

**भृङ्गाचार्यः** : ॐ भृं भृं भृं भृम् ।

**नटः** : पेन्द्या, एष भृङ्गाचार्यः । पादवन्दनं क्रियताम् ।

**पेन्द्या** : महाराज, एका सुन्दरी वशीकर्तव्या ।

**भृङ्गाचार्यः** : कृता ।

**पेन्द्या** : किं कृता ।

**भृङ्गाचार्यः** : वशीकृता । अतीव सुकरमेतद् । परं तदर्थं पञ्च सुवर्णमुद्राः दातव्याः ।

**पेन्द्या** : युज्यते । युज्यते । गृह्णातु भवान् (पञ्च सुवर्णमुद्राः ददाति) अधुना कथय । कदा सा वशमेष्यति ।

भृङ्गाचार्यः : एतन्मलिनं वस्त्रं परित्यज्य आकर्षकाणि वस्त्राणि परिधेयानि । ततश्च सौन्दर्यप्रसाधनैः मुखमण्डनं कार्यम् । सदैव तां परितः भृङ्गेण इव गुञ्जनं कार्यम् । मुक्ता एव त्वया ध्यातव्या। मुक्ता, मुक्ता, मुक्ता, मुक्ता...

नटः : आचार्य, मुक्तिमिच्छामि ।

भृङ्गाचार्यः : प्रथमं तावद् आचारः । त्वया काषायवस्त्रं स्वीकरणीयम् । अन्यच्च सततं भगवतः नामजपः उच्चैः कार्यः, येन परमेश्वरः ते मुक्तिं प्रदास्यति ।

नटः : अनुगृहीतोऽस्मि । अनेनैव मार्गेण मुक्तिं गमिष्यामि । अरे पेन्द्या एहि । गच्छावः । (नटः पेन्द्या च गन्तुम् आरभेते)

भृङ्गाचार्यः : अरे, अरे न त्वया मह्यं दक्षिणा प्रदत्ता ।

नटः : आचार्य, मुक्तोऽहम् । अधुना कथं मया क्षुद्रः अर्थव्यवहारः कार्यः । एष गच्छामि । पेन्द्या, एहि। (निर्गतौ)

भृङ्गाचार्यः : अरे मम दक्षिणा । मम दक्षिणा । (तावनुधावति) (प्रविशन्ति पेन्द्या, नटः तथा वृद्धगोपः विरागः)

विरागः : श्रुतं मया सर्वम् । अनेन मार्गेण न मुक्तेः न वा मुक्तायाः प्राप्तिर्भविष्यति । शृणु । अरे प्रीतिविषये तथा मोक्षविषये बाह्योपचाराः न गण्यन्ते । प्रीतिविषये मनोमेलनं, हृदयसमर्पणं च आवश्यकम्। यदि युवां परस्परानुरक्तौ तर्हि एव मनोमेलनं भवति ।

नटः : कथं मुक्तिं लप्स्ये । मार्गदर्शनं प्रार्थये ।

विरागः : अरे, अस्मादृशैः सामान्यैः जनैः फलेच्छां परित्यज्य नियतानि कर्माणि कर्तव्यानि । कर्मणा पूजितः ईश्वरः अस्मभ्यं मुक्तिं दास्यति इति मे विश्वासः ।

पेन्द्या + नटः : भोः आवामपि एवं श्रद्दध्वहे ।

भोः पेन्द्या, नटाः, चेटाः, गायकाः, वादकाः, नर्तकाः, आगच्छत । श्रीकृष्णं प्रार्थयामहे।

(सूत्रधारसहिताः सर्वे प्रविशन्ति गायन्ति च)

सर्वान्गोपानवतु भगवान् सौख्यदाता भवेन्नः ।<br>
प्रीत्या बद्धो हृदयकमले मित्रकृष्णः सदाऽस्तु ।

सूत्रधारः : तथास्तु । तथास्तु । तथास्तु । तथास्तु।

## वाग्विशेषः ।

१. लोकनाट्यस्य प्रारम्भे या प्रार्थना वर्तते, सा 'गण' इति नाम्ना प्रसिद्धा । तत्र गणेशादिदेवतानां नमनं क्रियते। अस्य लोकनाट्यस्य सविस्तरः गणः इत्थमस्ति-

नटराज शम्भुशङ्कर। हे दाशरथे रघुवीर ।<br>
हे कृष्ण दुग्धदधिचौर। विठुराय रुक्मिणीवर ।<br>
करवीरनिवासिनि मातः। साईनाथ जगत्त्रयत्रातः।<br>
खण्डेराय जेजुरीनाथ। दत्त नो लोककलाज्ञानम्।।३।।

तं विशालबुद्धिं व्यासम् । मुनिवरं दाशरथिदासम् ।<br>
भरतं च भारतश्रेष्ठम् । कुलगुरुं कालिकादासम् ।<br>
स्थलकालकक्षदैवतम् । सारस्वतसेवकगणम् ।<br>
रसिकं तु नाटके रतम् । सादरं नमनम् अस्माकम्।।४।।

२. लोकनाट्यम् – लोकनाट्यं लोकजीवनेन सह दृढबद्धम् अस्ति । बहुजनानां मनोरञ्जनार्थं प्रस्तुतीकृतं बहुजनसुलभं नाट्यं नाम लोकनाट्यम्। लोकनाट्यम् इति शब्दः यद्यपि आधुनिकं नाट्यप्रकारं वर्णयति, तथापि लोकनाट्यसङ्कल्पनायाः मूलं तु भरतनाट्यशास्त्रे दशरूपकेषु दृश्यते (यथा वीथी) । लोकनाट्यस्य भाषा सर्वलोकावगम्या सरला सौष्ठवपूर्णा च । संवादाः लघवः आकर्षकाः च ।

३. सूत्रधारः – नाट्यप्रयोगस्य समन्वयकः । नाट्यप्रयोगस्य सर्वाणि सूत्राणि यः धारयति सः सूत्रधारः । सः गुरूपदेशात् नाट्यविषये तज्ज्ञः भवति । नाट्यस्य प्रारम्भः तेनैव क्रियते ।

४. रङ्गमङ्गलानि – नाट्यप्रयोगस्य प्रारम्भे क्रियमाणानि पूजादिकानि कर्माणि ।

५. पेन्द्या – इति व्यक्ति-नाम मराठीभाषायां वर्तते । बाललीलासु कृष्णस्य सहायकः अयं कश्चन गोपबालकः। एषः लोहलः (तोतरा/Lispy), पादेन ईषत् पङ्गुः, दरिद्रः सन् अपि कृष्णस्य अतिप्रियः । नामदेवमहाराजः स्वप्रतिभया एतं पात्रविशेषं कल्पयित्वा 'अभङ्ग' इति काव्यप्रकारे योजितवान्। कालान्तरे लोकप्रियतां प्राप्य एषः पेन्द्या लोकनाट्यादिषु प्रसिद्धः जातः ।

## शब्दार्थः ।

१) भट्टिनी – राज्ञी ।
२) शैलूषः – नटः ।
३) चेटः – दासः, परिचारकः ।
४) विमनस्कः – दुःखितमनाः ।
५) हट्टविभागः – वस्तूनां क्रय-विक्रय-स्थानम्, विपणिः पण्यवीथिका ।

## सन्धिविग्रहः ।

१) भट्टिन्याश्च = भट्टिन्याः + च ।
२) इतस्तावद् = इतः + तावद् ।
३) उभावपि = उभौ + अपि ।

## समासविग्रहः ।

१) भवत्सार्धम् – भवता सार्धम् । तृतीया-तत्पुरुषः ।
२) विद्वद्धनम् – विदुषां धनम् । षष्ठी-तत्पुरुषः ।
३) सकलनन्दनः – सकलान् नन्दयति इति । उपपद-तत्पुरुषः ।
४) सुविहितानि – सुष्ठु विहितानि । प्रादि-तत्पुरुषः ।
५) रसिकवराः – रसिकेषु वराः । सप्तमी-तत्पुरुषः ।
६) सुरवाणी – सुराणां वाणी । षष्ठी-तत्पुरुषः ।
७) सूत्रधारः – सूत्रं धारयति इति । उपपद-तत्पुरुषः ।
८) पादवन्दनम् – पादयोः वन्दनम् । षष्ठी-तत्पुरुषः ।
९) गोकुलस्थाः – गोकुले तिष्ठन्ति इति । उपपद-तत्पुरुषः ।
१०) मनोमेलनम् – मनसोः मेलनम् । षष्ठी-तत्पुरुषः ।

## रूपपरिचयः ।

१) प्रयोक्तव्यम् – प्र + युज् (७ उ.प.) तव्यत्-प्रत्ययान्त-विशेषणम्, नपुंसकलिङ्गम्, प्रथमा-द्वितीया एकवचनम् ।
२) नाटयिष्यति – नट् (१० उ.प.), लृट्, प्रथमपुरुषः, एकवचनम् ।
३) स्वामिन् – स्वामिन्, इन्नन्तं विशेषणम्, पुंलिङ्गम्, सम्बोधन-एकवचनम् ।
४) प्रयुज्यते – प्र + युज् (७ उ.प.) कर्मणि लट्, प्रथमपुरुषः, एकवचनम्।

५) वदद्भ्यः - वद् (१ प.प.) शतृ-प्रत्ययान्त-विशेषणम्, पुंलिङ्गम्, चतुर्थी-पञ्चमी-बहुवचनम् ।
६) देहि - दा (३ उ.प., अत्र प.प.) लोट्, मध्यमपुरुषः, एकवचनम् ।
७) लप्स्ये - लभ् (१ आ.प.), लृट्, उत्तमपुरुषः, एकवचनम् ।
८) एष्यति - इ (२ प.प.) लृट्, प्रथमपुरुषः, एकवचनम्।
९) सुहृद्भ्यः - सुहृद्, दकारान्तम्, पुंलिङ्गम्, चतुर्थी-पञ्चमी-बहुवचनम् ।
१०) विलम्बसे - वि + लम्ब् (१ आ.प.) लट्, मध्यमपुरुषः, एकवचनम् ।
११) एहि - आ + इ (२ प.प.) लोट्, मध्यमपुरुषः, एकवचनम् ।

## भाषाभ्यासः ।

### १. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।

१) सुरवाणी न केवलं विद्वद्धनम् ।
२) त्वमेव सूत्रधारो भूत्वा लोकनाट्यं प्रदर्शय ।
३) प्रीतीविषये तथा मोक्षविषये बाह्योपचाराः न गण्यन्ते ।
४) अधुना कथं मया क्षुद्रः अर्थव्यवहारः करणीयः?

### २. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।

**१) संस्कृते लोकनाट्यस्य प्रयोजनम्, यतः –**
अ) लोकनाट्यम् एव आधुनिकः नाट्यप्रकारः ।
ब) संस्कृतं न केवलं विद्वद्धनं, सा लोकभाषा अपि ।

**२) पेन्द्या भृङ्गाचार्यं प्रति गच्छति, यतः –**
अ) सः गुरोः उपदेशं ग्रहीतुम् इच्छति ।
ब) पेन्द्या मुक्तां वशीकर्तुम् इच्छति ।

**३) सामान्यजनैः नियतकर्माणि कर्तव्यानि, यतः –**
अ) नियतकर्मणा अर्थलाभः भविष्यति ।
ब) कर्मणा पूजितः ईश्वरः मुक्तिं दास्यति ।

### ३. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।

**१) नटः वदति – भट्टिन्याः प्रकोपशमनार्थम् – .............. ।**
अ) लोकनाट्यं प्रयोक्तव्यम् ।
ब) पुराणनाट्यं प्रयोक्तव्यम् ।

**२) भृङ्गाचार्यः कथयति, मुक्तिप्राप्तये – .............. ।**
अ) सौन्दर्यप्रसाधनैः मुखमण्डनं, 'मुक्ताया' नामजपः च करणीयः ।
ब) काषायवस्त्रपरिधानं भगवतः नामजपः च करणीयः ।

### ४. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

१) लोकनाट्यस्य अपरं नामधेयम् – [ ]
२) नटेभ्यः कलाज्ञानदाता – [ ]

**५. पूर्णवाक्येन उत्तरं लिखत ।**

१) भट्टिनी केन सार्धं नाटकं नाटयितुं न इच्छति ?

२) प्रीतीविषये किम् आवश्यकम् ।

३) नटः केषां कृते गणराजं कलाज्ञानं प्रार्थयते ?

**६. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यं लिखत ।**

१) सूत्रधारस्य नाटकेषु वैविध्यं वर्तते ।

२) सुरवाणी अपि लोकभाषा एव ।

३) नटः नाट्यप्रयोगार्थं गणराजं प्रार्थयते ।

४) मोक्षविषये बाह्योपचाराः आवश्यकाः ।

५) पेन्द्या दशसुवर्णमुद्राः ददाति ।

**७. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।**

१) ताः एव पर्युषिताः पुराणकथाः ।

२) भट्टिन्याः प्रकोपशमनार्थं लोकनाट्यं प्रयोक्तव्यम् ।

३) तदर्थं पञ्च सुवर्णमुद्राः दातव्याः ।

४) मुक्ताप्राप्तये मार्गः भविष्यति ।

**८. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) भवतः नाटकेषु न नावीन्यम् । (सूत्रधार)

२) नटेभ्यः देहि कलाज्ञानम् । (तद्)

३) हे बन्धो, वञ्चितोऽस्मि मुक्तया । (इदम्)

**९. विशेषण-विशेष्याणां मेलनं कुरुत ।**

| अ | आ |
|---|---|
| १) पर्युषिताः | नाटकैः |
| २) सुविहितानि | पुराणकथाः |
| ३) रसिकवरेभ्यः | रङ्गमङ्गलानि |
| ४) क्षुद्रः | जनैः |
| ५) दुष्पचैः | सुहृद्भ्यः |
| | अर्थव्यवहारः |

**१०. सन्धितालिकां पूरयत ।**

१) भट्टिन्याश्च = ......... + ......... ।

२) इतस्तावद् = ......... + ......... ।

**११. पृथक्करणं कुरुत ।**

**(अ) क्रमेण योजयित्वा वाक्यानि पुनर्लिखत ।**


अ) १) सूत्रधारो भूत्वा नटद्वारा लोकनाट्यप्रदर्शनस्य प्रारम्भः ।

२) नटस्य सहसा प्रवेशः ।

३) रङ्गमङ्गलानां सुविधानम् ।
४) नटद्वारा गणराजप्रार्थनम् ।

ब) १) पेन्द्याद्वारा भृङ्गाचार्याय सुवर्णमुद्राप्रदानम् ।
२) पेन्द्यानटयो: भृङ्गाचार्यं प्रति गमनम् ।
३) भृङ्गाचार्यद्वारा नटाय मुक्तिमार्गस्य उपदेशनम् ।
४) पेन्द्यानटद्वारा भृङ्गाचार्यस्य पादवन्दनम् ।

**(आ) जालरेखाचित्रं पूरयत ।**




***

## शुभाशयाः

**कार्यक्रमो यशस्वी स्यात्**
**सज्जनैर्बहुभि: स्तुत: ।**
**श्रमोत्साहौ नवौ स्यातां**
**वर्धतां कार्यकृद्बलम् ।।**
**(समारम्भम् अभिलक्ष्य)**

**सन्तुष्टो भार्यया भर्ता भर्त्रा**
**भार्या तथैव च ।**
**यस्मिन्नेव कुले नित्यं**
**कल्याणं तत्र वै ध्रुवम् ।।**
**(मनुस्मृति: ३-६०)**
**(विवाह:)**



# षष्ठमण्डलम् । लेखनकौशलम् ।

## १. चित्रपटवर्णनम्

### थ्री इडियटस्

**प्रकार:** – हास्यपट: ।

**भाषा** – हिन्दीभाषा ।

**लेखनम्** – विधु–विनोद–चोपडा, राजकुमारः हिरानी, अभिजितः जोशी च ।

**दिग्दर्शनम्** – राजकुमारः हिरानी ।

**मुख्यनटाः** – अमिरखानः, आर्. माधवन्, शर्मन् जोशी करिना कपूरः च ।

'थ्री इडियट्स्' इत्यस्य **आङ्ग्लशब्दसमूहस्य** **अर्थः** 'त्रयः मूर्खाः' इति । वस्तुतः एषा कथा आभियान्त्रिक–महाविद्यालये **एकत्र** पठतां **त्रयाणां** मित्राणाम् । महाविद्यालयस्य प्राचार्येण सह **अध्यापकवर्गः** कठोरः नियमानुरागी शुष्कशास्त्ररटने अनुरक्तः च । छात्रावासजीवनम् अपि **पीडाकरम्** एव ।

स्वेच्छाजीवनं, **मौलिकज्ञानप्राप्तिः** मानवतापालनं च इच्छन्ति त्रयः **सुहृदः** । ते कथम् एतां **प्रतिकूलां** परिस्थितिं जित्वा **छात्रजीवनसागरं** तरन्ति इत्यस्य रम्या कथा एषा ।

तेषां **छात्रजीवने** **व्यक्तिगतजीवने** च उद्भूताः प्रसङ्गाः कदाचित् **हास्यम्**, कदाचित् **करुणां** जनयन्ति । कदाचित् च गभीरान् **विचारानपि** **प्रेरयन्ति** । एषः **हास्यपटः** न केवलं रञ्जयति किन्तु बोधयति अपि। **रञ्जनात् प्रबोधनम्** इत्येव अस्य चित्रपटस्य **सूत्रम्** । भारतीय–शिक्षणव्यवस्थायाः विषये **मौलिकभाष्यं** कृतमनेन चित्रपटेन। मानवता, स्नेहः, दया, इत्येव **जीवनस्य** सर्वथा आधाराः भवितुमर्हन्ति इति अस्य चित्रपटस्य मुख्यः **सन्देशः** ।

### जाने भी दो यारो

**प्रकार:** – हास्यपट: ।

**भाषा** – हिन्दीभाषा ।

**लेखनम्** – कुन्दन–शाहः तथा सुधीर–मिश्रः ।

**दिग्दर्शनम्** – कुन्दन–शाहः ।

**मुख्यनटाः** – नसीरुद्दीन–शाहः, भक्ती–बर्वे, सतीश–शाहः, ओम–पुरी, नीना–गुप्ता पङ्कज–कपूरः च।

चित्रपटे विनोद–सुधीरौ इति द्वौ **सुहृदौ** छायाचित्रकारौ । तौ मुम्बईनगरे **छायाचित्रव्यवसायम्** आरब्धवन्तौ। तयोः व्यवसायः **सफलतां** न भजते । अतः ते एकस्याः **वृत्तपत्रसंस्थायाः** कार्यं स्वीकुरुतः । भ्रष्टजनानां **कृष्णकृत्यानि** **प्रकाशं** नेतुं प्रयतमानौ एतौ युवकौ किं किं कुरुतः? परिस्थितिवशात् स्वयमेव च कथम् **अभियुक्तौ** भवतः? एषा कथा प्रहासं **जनयति** । एवं च **समाजव्यवस्थानां** विषये **विचारान्** अपि प्रेरयति ।

अस्मिन् चित्रपटे नियमभ्रष्टाः **अधिकारिणः**, स्वार्थान्धाः वणिजः, **प्रसिद्धिलोलुपाः** धनलुब्धाः वृत्तपत्रसंस्थाः एते सर्वे मिलित्वा **लोकतन्त्रं** केवलं **स्वार्थसिद्ध्ये** प्रयोजयन्ति । तस्य **यथार्थदर्शनं** क्रियते अनेन चित्रपटेन ।

## अॅवेञ्जर्स एन्फिनिटी वॉर

**प्रकारः** – अद्भुतपटः ।

**भाषा** – आङ्ग्लभाषा ।

**लेखनम्** – जिम्-स्टार्लिन्, जोनथन्-हिकमन् च ।

**दिग्दर्शनम्** – एन्थनी-रूसः च जो-रूसः च द्वौ भ्रातरौ ।

**मुख्यनटाः** – रॉबर्ट डॉवनी, शार्लेट जॉन्सन एलिजाबेथ-ओल्सेन् च ।

अस्मिन् चित्रपटे केचन **दिव्यपुरुषाः** च बहवः **खलपुरुषाः** च । खलेषु प्रधानः थेनोस् नाम पुरुषः **मायारत्नं** प्राप्य **विश्वं** जेतुम् इच्छति । तेन **वसुधा** **सङ्कटग्रस्ता** जायते । आयर्नमॅन्, थॉर्, स्पायडरमॅन, हल्क-आदयः नैके दिव्यपुरुषाः **वसुधारक्षणाय** सिद्धाः । अत्र **अन्तरिक्षे** प्रवर्तमानः **साधुखलानां** सङ्घर्षः । तेषां व्यक्तिगतजीवने उद्भूताः नैके **विस्मयजनकाः** प्रसङ्गाः । तैः धैर्येण कृतः **विपदां** प्रतीकारः । इत्येतेषाम् एतद् अतीव रञ्जकं **चित्रणम्** अस्ति । चित्रपटः एषः रोमहर्षकः **मनोहारी** च अस्ति ।

दिव्यपुरुषाणां बाहुल्येन **प्रेक्षकाः** सम्भ्रमिताः न भवन्ति इति तु **पटकथालेखकस्य** कौशलम् एव । **कथायां** प्रत्येकं दिव्यपुरुषस्य कापि विशिष्टा **भूमिका** प्रतीयते । चित्रीकरणे **तन्त्रज्ञानस्य** कुशलः प्रयोगः, आकर्षकाः संवादाः, चित्रपटस्य विषयोचिता शीघ्रा गतिः इत्यादिभिः गुणैः **कथायाः** अन्तं यावत् औत्सुक्यं तिष्ठत्येव ।

## बाहुबली

**प्रकारः** – अद्भुतपटः ।

**भाषा** – तेलुगुभाषा ।

**लेखनम्** – विजयेन्द्रप्रसादः ।

**दिग्दर्शनम्** – राजमौलिः ।

**मुख्यनटाः** – प्रभासः, राना-दग्गुबाटी, अनुष्का-शेट्टी, रम्या-कृष्णा च ।

एतस्य चित्रपटस्य **द्वौ** भागौ वर्तेते । प्रथमभागे माहिष्मती इति **राज्यस्य** प्रजाप्रियः **राजा** अस्ति अमरेन्द्रबाहुबली । सः कटप्पाख्येन **सेनापतिना** **कपटेन** हन्यते । वने जातः **अमरेन्द्रपुत्रः** महेन्द्रबाहुबली **ग्रामवासिदम्पतिभ्यां** स्वपुत्रः इव परिपाल्यते । युवावस्थां प्राप्तः **गुणवान्** अयं राजपुत्रः **दैववशात्** एव स्वस्य **जन्मनः** रहस्यं जानाति । **स्वपितुः** राज्यं क्रूरेभ्यः **शत्रुभ्यः** रक्षितुम् इच्छति । तस्य सफलतायाः **कथांशः** अस्य चित्रपटस्य द्वितीयः भागः ।

संस्कृतनामानि, संस्कृतगीतं, **संस्कृतवाक्यानि** च एतस्य **चित्रपटस्य** वैशिष्ट्यम् । **सङ्गीतमपि** सुयोग्यं वर्तते । **युद्धचित्रणे** विविधशास्त्राणां **तन्त्राणां** च परिचयः भवति । चित्रपटस्य **नेपथ्यं** नेत्रदीपकं वर्तते । महती चतुरङ्गसेना गजाश्वपदातीनां सर्वमिदं **प्राचीनभारतस्य** ऐश्वर्यसमृद्धिं दर्शयति ।

## दिलवाले दुल्हनिया ले जाएंगे

**प्रकारः** – शृङ्गारपटः ।

**भाषा** – हिन्दीभाषा ।

**लेखनम्** – जावेदसिद्दिकी आदित्यचोप्रा च ।

**दिग्दर्शनम्** – आदित्यचोप्रा ।

**मुख्यनटाः** – शाहरुखखानः, काजोल, अमरीशपुरी ।

सिम्रन्-नाम्नी एका युवती विदेशे राजः नाम **युवकं यात्रायां** मिलति । तौ **आनन्देन** कञ्चित् **कालं** तत्र यापयतः। कालान्तरेण तयोः परस्परम् **अनुरागः** जायते । किन्तु नायिकायाः **बाल्ये** एव तस्याः **विवाहः** पित्रा निश्चितः । **स्वदेशे** प्रत्यागत्य सिम्रन् **यथानिश्चयं** विवाहं कर्तुं सिद्धा जायते । तदैव **नायकः** राजः तत्र प्रविशति। **प्रसन्नस्वभावेन** सः **सर्वेषां** प्रियः जायते। सिम्रन् तेन सह **गृहात्** पलाय्य **विवाहं** कर्तुम् इच्छति । किन्तु पित्रोः **अनुमत्या** विना राजः **विवाहार्थम्** न सिद्धः । राजस्य **प्रतिज्ञापूर्तिः** एव चित्रपटस्य **चरमबिन्दुः** ।

## सैराट

**प्रकारः** – शृङ्गारपटः ।

**भाषा** – मराठीभाषा ।

**लेखनम्** – नागराज-मञ्जुळे ।

**दिग्दर्शनम्** – नागराज-मञ्जुळे ।

**मुख्यनटाः** – पिङ्कीराजगुरुः, आकाशठोसरः तानाजीगालगुण्डे, अरबाजशेखः च ।

आधुनिककाले **भारतीययुवकानां** मनांसि आकृष्टवान् **मराठीचित्रपटः** नाम सैराट इत्येव । सैराट इति **मराठीशब्दस्य** अर्थः 'स्वैरम्', **'अनिर्बन्धम्'** इति ।

महाविद्यालये पठन्तौ **युवतीयुवकौ परस्परम्** अनुरक्तौ । किन्तु तयोः **विवाहः** जातिभेदकारणात् **गृहजनैः** न अनुमतः। तयोः परिवारयोः **वित्तीयस्तरौ** अपि भिन्नौ । अतः उभौ **गृहाभ्यां** पलायनं कृत्वा **दूरवर्तिनं** प्रान्तं व्रजतः। **उपजीविकार्थं** सङ्घर्षं कृत्वा सुखेन जीवनं **यापयतोः** तयोः अपत्यलाभः भवति । किन्तु **मिथ्याप्रतिष्ठया** कन्यायाः **परिवारजनाः** तत्रागत्य उभयोः हत्यां कुर्वन्ति ।

**शोकान्तः** अपि अयं चित्रपटः **भारते** सर्वत्र लोकप्रियः जातः । आधुनिककाले अपि **भारतदेशे** जातिभेदः कियान् **गहनः** विनाशकः च इत्यस्य **यथार्थं** चित्रणं कृतं । अद्यावधि **षट्सु** भारतीयभाषासु अस्य चित्रान्तरणं सञ्जातम् । जातिभेदः **शोककारकः** इति अस्य चित्रपटस्य **सन्देशः**। अस्य **गीतानि** अपि अतीव **श्रवणीयानि**।

## द लायन किङ्ग

**प्रकारः** – अनुप्राणितचित्रपटः ।

**भाषा** – आङ्ग्लभाषा ।

**लेखनम्** – इरेन्, जोनाथन् लिण्डा ।

**दिग्दर्शनम्** – जॉन् फैवरो ।

'वाल्ट्-डिस्ने' नाम्न्या **निर्मितिसंस्थया** निर्मितस्य चित्रपटस्य पुनः **प्रस्तुतिः** इयम्।

मुफासा, सिम्बा, स्कार्, टैमन्, पुम्बा, इत्यादयः पशवः **आफ्रिकाखण्डे** **वनप्रदेशे** निवसन्ति । **राज्यस्य** कृते तेषां **सङ्घर्षः** अत्र वर्णितः ।

अनुप्राणितपटेषु **तन्त्रज्ञानां** कौशलं तु मौलिकमेव । किन्तु, पार्श्वनिवेदकानाम् अपि **कौशलम्** अतीव महत्त्वपूर्णं भवति। यतः तेषां **स्वराणां** माध्यमेन **रसिकाः** कथां आस्वादयन्ति । **आङ्ग्लभाषापटे** मॅथ्यू-ब्रोडरिक् तथा जेम्स्-अर्ल्-जोन्स इति द्वौ **पार्श्वनिवेदकौ** । अस्य चित्रपटस्य **हिन्दीसंस्करणे** तु **विख्यातः** अभिनेता शाहरुखखानः च तस्य पुत्रः आर्यनखानः च **पार्श्वनिवेदनं** कृतवन्तौ । एतदपि अस्य चित्रपटस्य **भारते** **लोकप्रियतायाः** कारणम् ।

## अवतार्

**प्रकारः** – अनुप्राणितचित्रपटः ।

**भाषा** – आङ्ग्लभाषा ।

**लेखनम्** – जेम्स कॅमरन् ।

**दिग्दर्शनम्** – जेम्स कॅमरन् । ('टैटानिक्'-दिग्दर्शकः)

**मानवाः** च **परग्रहवासिनः** च, एतयो उभयोः सङ्गमेन जाताः **अवताराः** तथा तेषां परस्परं मैत्रवैरयोः **रमणीया** कथा नाम 'अवतार्' चित्रपटः । चित्रपटस्य कथा **भविष्यद्दर्शिनी** अस्ति । कथानुसारं, **मानवानां** च परग्रहवासिनां च सङ्गमेन जाताः । केचन **मिश्रजीवाः** नाम 'अवताराः' । २१५४ तमे अब्दे पृथिव्यां प्राकृतिकसंसाधनानां सम्पूर्णः **अभावः** जायते। तेन **पार्थिवाः** मानवाः पाण्डोरा-नाम चन्द्रसदृशे उपग्रहे **ऊर्जान्वेषणाय** सिद्धाः भवन्ति। किन्तु पाण्डोरावासिनः मानवानां विरोधं कुर्वन्ति। तेषां विरोधं **शमयितुं** पार्थिवाः **मिश्रजीवान्** अवतारान् तत्र प्रेषयन्ति । अनन्तरं च **अवतारैः** सह कांश्चन **पार्थिवान्** अपि पाण्डोरा-उपग्रहं प्रति प्रेषयन्ति ।

एतेषां सर्वेषां परस्परं **सङ्घर्षः** उत्पद्यते । **युद्धं** च आरभ्यते । **अवतारेषु** जेक-नाम प्रधानः उपग्रहवासिनां **साहाय्यं** करोति। कथायाः अन्ते सर्वे **उपग्रहवासिनः** जीवाः **पार्थिवान्** निष्कास्य **पृथिवीं** प्रति प्रेषयन्ति ।

अस्याः **कथायाः** कृते जेम्स्-महोदयः **विविधविषयाणां** गहनम् अध्ययनम् **अन्वेषणं** च कृतवान् । कथायामागतानि कानिचन **पात्राणि** भारतीय-पौराणिक-देवताः आधृत्य **कल्पितानि** । अयं चित्रपटः **पर्यावरणविषये** जागरणं निर्मातुकामः।

## २. वृत्तान्तलेखनम्

**विषयाः**

कार्यक्रमाः:
- ग्राहकजागरणदिनम्
- विज्ञानदिनम्
- संस्कृतदिनम्
- स्नेहसम्मेलनम्

गतवर्षे योगदिनादिषु विषयेषु वृत्तान्तस्य लेखनाभ्यासः अस्माभिः कृतः । अधुना अस्मिन् वर्षे कांश्चन अन्यान् विषयान् अधिकृत्य अस्माभिः निमन्त्रणपत्रिकायाः प्रश्नानां साहाय्येन वृत्तान्तलेखरूपान्तरणं कर्तव्यम् । अधोदत्ताः निमन्त्रणपत्रिकाः पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

**प्रश्नाः ।**

१) कः कार्यक्रमः ?
२) किं निमित्तम् ?
३) कदा/कस्मिन् दिनाङ्के ?
४) कुत्र सम्पन्नः ?
५) प्रमुखातिथिः कः ?
६) कः आयोजकः ?
७) कार्यक्रमस्य समयः कः ?
८) संयोजकाः के ?
९) ध्येयवाक्यं किम् ?
१०) कार्यक्रमः केषां कृते ?

**निमन्त्रणपत्रिका**

**ग्राहकजागरणदिनम् – १**

निमन्त्रणम् ।

।। भवतु ग्राहकः स्वनिर्भरः ।।

ग्राहकमञ्चः, लातूरनगरम्

आयोजयति

ग्राहकदिननिमित्तेन

**ग्राहकाधिकारविषयकं व्याख्यानम्**

व्याख्यात्री – श्रीमती समीना राशिद् (न्यायाधीशा, लातूरजनपदन्यायालयः)

व्याख्यानानन्तरं लोकनाट्यप्रस्तुतिः

"जागृहि ग्राहक, जागृहि रे!"

स्थलम्– मणिलाल जैन सभागृहम्, लातूरनगरम् ।

समयः– सायम् ६.०० तः ८.०० । दि. २६ डिसेम्बरः २०--

सर्वेषां हार्दं स्वागतम् ।

✻ संयोजकाः ✻

| सुगन्धा मेश्रामः | शेखरः सुळे | दीपकः सवकः |
|---|---|---|
| अध्यक्षा | कार्यक्रमप्रमुखः | जनसम्पर्कप्रमुखः |
| smeshram@gmail.com | ९८×××××××१५ | deepak19@gmail.com |

ग्राहकजागरणदिनम्–२

निमन्त्रणम्

॥ ग्राहकदेवो भव ॥

**ग्राहकदिननिमित्तेन**

**आपणसङ्कुलम्, मुम्बई नगरम् आयोजयति**

**'ग्राहकजागरणम् ।'**

मुख्यातिथिः – श्री. प्रकाश भेण्डे । (अधिकारी–अन्नौषधप्रशासनम्)

अध्यक्ष : – सौ. सगुणा चौगुले (अध्यक्षः– आपणसङ्कुलम्),

स्थलम् – उपासनासभागृहम्, विलेपारले । समयः – सायं. ५.०० तः ७.०० वादने । दि. २४ डिसेम्बरः२०––

विशेषः– दुर्मिश्रणसंज्ञानप्रात्यक्षिकम् ।

**सर्वेषां सहर्षं स्वागतम् ।**

**संयोजकाः**

| | | |
|---|---|---|
| **श्री. संदीपः गोळे** | **सौ. रूपा स्वामी** | **श्री. रूपेशः जडे** |
| विभागप्रमुखः | कार्यक्रम–अधिकारी | प्रमुखसंयोजकः |
| ९५××××××७५ | ९४××××××१० | ८८××××××१५ |

विज्ञानदिनम् –१

निमन्त्रणम्

॥ विकासार्थं विज्ञानम् ॥

**विज्ञानदिननिमित्तेन**

**बालवैज्ञानिक–शोधसंस्था, पण्ढरपुरम्**

आयोजयति

# *विज्ञानप्रदर्शिनी*

प्रमुखातिथिः – डॉ. श्रीकान्तः परळीकरः । (वैज्ञानिकः)

अध्यक्ष : – डॉ. रमेशः हलगीकरः । (निदेशकः–बालवैज्ञानिक–शोधसंस्था)

स्थलम्– कणादसभागृहम्, पण्ढरपुरम्

समयः– सायम् ५.३० तः ८.३० । दि. २८ फेब्रुवारी २०––

**सर्वेषां सहर्षं स्वागतम् ।**

**✻ संयोजकाः ✻**

| | | |
|---|---|---|
| **अनिलः जैनः** | **निर्मला सातपुते** | **रत्नाकरः सिंहः** |
| सञ्चालकः | प्रमुखान्वेषिका | सचिवः |
| ak1970@yahoo.co.in | ८५××××××४९ | gamesgkv@gmail.com |

विज्ञानदिनम् -२

निमन्त्रणम्

।। आविष्कारेणैव प्रगतजीवनम् ।।

**विज्ञानदिननिमित्तेन**

**डॉ. ए. पी.जे. अब्दुल कलाम विद्यापीठम्, रामटेकम्**

आयोजयति

**विज्ञानाविष्काराणां पारितोषिकवितरणम्**

**प्रमुखातिथिः –** डॉ. राधा बालकृष्णन् । (विख्याता वैज्ञानिका)

**अध्यक्ष : –** श्री. गजाननः भोतमाङ्गे । (सञ्चालकः – डॉ. ए. पी. जे. अब्दुल कलाम विद्यापीठम्)

**स्थलम्–** रमणक्रीडाङ्गणम्, नगरधनम् ।

**समयः–** सायम् ४.०० तः ५.३० । दि. ५ मार्चः २०--

**सर्वेषां सहर्षं स्वागतम् ।**

✲ संयोजकाः ✲

| | | |
|---|---|---|
| **सुशीला गणफुले** | **सङ्गीता सुतारः** | **सुशान्तः दण्डके** |
| व्यवस्थापिका | निमन्त्रिका | निबन्धकः |
| ९८××××××५२ | sangeeta@yahoo.com | suda24@yahoo.com |

संस्कृतदिनम् -१

निमन्त्रणम्

।। संस्कृतेन हि संस्कृतिः ।।

**सरोजिनी–विद्यालयः, मुरबाडग्रामः**

आयोजयति

संस्कृतदिननिमित्तेन

**संस्कृतवृन्दसङ्गीतम्**

(छात्राणां संस्कृत–गीत–नृत्य–प्रस्तुतीकरणम्)

**प्रमुखातिथिः –** कु. विनी डिमेलो । (लोकप्रिया बालगायिका)

**अध्यक्ष : –** प्रा. सिसिलिया लोबो (प्राचार्या),

**स्थलम्–** त्रिवेणी सभागृहम्, मुरबाडग्रामः

**समयः–** सायम् ५.०० तः ८.०० । दि. १८ ऑगस्टः २०--

रसिकवराणाम् उपस्थितिः प्रार्थनीया ।

✲ संयोजकाः ✲

| | | |
|---|---|---|
| **नदीमः इब्राहिमः** | **नीला गुर्जर** | **सलोनी खारकरः** |
| संस्कृतशिक्षकः | सङ्गीतशिक्षिका | छात्रप्रमुखा |
| nadim784@gmail.com | ९६××××××८५ | ८४××××××७५ |

संस्कृतदिनम् –२

निमन्त्रणम्

॥ विद्या विनयेन शोभते ॥

**आम्बेडकर–महाविद्यालयः, परभणी**

आयोजयति

संस्कृतदिननिमित्तेन व्याख्यानम्

**प्राचीननीतिशास्त्रेषु लोकतन्त्रस्य तत्त्वानि**

**व्याख्यात्री –** श्रीमती सुनीता पटेल (संस्कृतज्ञा, विधान–सभा–सदस्या)

**प्रमुखातिथिः –** डॉ. गोरखनाथः धडफळे । (निवृत्तः न्यायाधीशः, औरङ्गाबाद–न्यायालयः)

**स्थलम्–** रमाई–सभागृहम्, आम्बेडकर–महाविद्यालयः, परभणी ।

**समयः–** प्रातः १०.०० तः १२.०० । दि. १६ ऑगस्टः २०––

छात्राणाम् उपस्थितिः अनिवार्या

*** संयोजकाः ***

| मधुरा काम्बळे | प्रीतेशः कुम्भारः | सुजयः महालमाने |
|---|---|---|
| संस्कृतविभागप्रमुखा | छात्रप्रमुखः | कार्यप्रमुखः |
| sanskritlove4@yahoo.com | ९४××××××२३ | juli26@gmail.com |

स्नेहसम्मेलनम् – १

निमन्त्रणम् ।

॥ सम्मिलामहे सम्मोदामहे ॥

**स्नेहसम्मेलनम्**

**गुरुकुल–विद्यामन्दिरम्, सङ्गमनेरम्**

आयोजयति

**भारतस्य ऐतिहासिकयात्रा**

**(ऐतिहासिक–लघुनाटिकानां प्रस्तुतीकरणम्)**

**प्रमुखातिथिः –** डॉ. रघुनाथः । (विख्यातः अभिनेता)

**अध्यक्ष : –** श्री. नयनीशः कवठाळे । (प्राचार्यः)

**स्थलम्–** सावित्रीबाई–फुले रङ्गमन्दिरम्, सङ्गमनेरम् ।

**समयः–** रात्रौ ८.०० तः १०.०० । दि. १४ डिसेम्बरः २०––

छात्राणां पालकानां च हार्दं स्वागतम् ।

*** संयोजकाः ***

| नीलिमा लगडे | सुहासः वैती | विजयः लामकाने |
|---|---|---|
| सम्मेलनप्रमुखः | छात्रप्रमुखः | छात्रप्रमुखः |
| ९८××××××३७ | s1k2v1@rediffmail.com | skk@hotmail.com |

निमन्त्रणम् ।

।। सा विद्या या विमुक्तये ।।

## स्नेहसम्मेलनम्

विद्यानिकेतनम्, दापोली

सहर्षम् आयोजयति

**पूर्वच्छात्राणां पुनर्मेलनम् ।**

**प्रमुखातिथि: –** श्री. शिवांश: गारगोटे । (भूतपूर्व: प्राचार्य:)

**अध्यक्ष : –** श्रीमती पङ्कजा पौळ । (वर्तमाना प्राचार्या)

**स्थलम्–** पु. ल. देशपाण्डेसभागृहम्, दापोली ।

**समय:–** सायम् ४.०० त: ८.०० । दि. २३ नोव्हेम्बर:, २०--

सर्वेषां हार्दं स्वागतम् ।

✻ संयोजका: ✻

| | | |
|---|---|---|
| **पूजा देखणे** | **गीता लङ्के** | **श्री. सुभाष: रणदिवे** |
| pnd@gmail.com | gita123@yahoo.com | sk@hotmail.com |

## शुभाशया:

नववर्षं नवं हर्षं
समृद्धिं सुखसम्पदम् ।
कार्यसिद्धिं परां वृद्धिं
वितनोतु शुभं चिरम् ।।
(नववर्षम्)

दीपावली दीपितसर्वलोका,
देदीप्यमाना हृदये जनानाम् ।
स्नेहं परेषां हितसाधनं च,
संवर्धयन्ती शुभमातनोतु ।।
(दीपावली)

✻ शुभास्ते सन्तु पन्थान: ।

✻ भवतां विदेशगमनं विज्ञाय प्रसन्नता जाता ।

✻ यात्रेयं निर्विघ्ना शुभदा च भूयात् ।

(विदेशगमनार्थम्)

उत्तरा यास्यतो वृद्धिं
मकरस्थरवेर्यथा ।
तथा स्यात्तव तेजोऽपि
वर्धतामुत्तरोत्तम् ।।
(मकरसङ्क्रमणम्)

# नाम ।

✻ नामतालिकां पूरयत ।

| नाम | प्रातिपदिकम् | अन्तम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| विद्वत्सु | विद्वस् | वस्–प्रत्ययान्तम् | पुंलिङ्गम् | सप्तमी | बहुवचनम् |
| व्याधिभिः | व्याधि | इकारान्तम् | पुंलिङ्गम् | तृतीया | बहुवचनम् |
| मात्रे | मातृ | ऋकारान्तम् | स्त्रीलिङ्गम् | चतुर्थी | एकवचनम् |
| तपस्वी | तपस्विन् | इन्नन्तम् | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| प्राणिनाम् | प्राणिन् | इन्नन्तम् | पुंलिङ्गम् | षष्ठी | बहुवचनम् |
| अनेन प्रकारेण अधोलिखितशब्दानां रूपपरिचयं लिखत । | | | | | |
| सद्भ्यः | | | | | |
| सखि | | | | | |
| भर्ता | | | | | |
| लक्ष्मीः | | | | | |
| सूनोः | | | | | |
| द्विषताम् | | | | | |
| सीमानम् | | | | | |
| सद्मनि | | | | | |
| चैत्रगौर्याः | | | | | |
| तिथौ | | | | | |
| अम्ब | | | | | |
| माता | | | | | |
| शूली | | | | | |

| नाम | प्रातिपदिकम् | अन्तम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| अम्भः | | | | | |
| पद्मे | | | | | |
| मूर्ध्नि | | | | | |
| शशी | | | | | |
| सहस्रांशौ | | | | | |
| चन्द्रमाः | | | | | |
| तनयौ | | | | | |
| भास्वान् | | | | | |
| राष्ट्रवादिनाम् | | | | | |
| हनुमान् | | | | | |
| शुचा | | | | | |
| सरस्वत्याः | | | | | |
| जगति | | | | | |
| स्त्रियः | | | | | |
| भरतमुनिना | | | | | |
| प्रत्युषसि | | | | | |
| भ्रातॄणाम् | | | | | |
| कर्तृभ्यः | | | | | |
| पितृभिः | | | | | |
| गुरुम् | | | | | |
| शिशोः | | | | | |
| पर्णशालायाम् | | | | | |
| धातारम् | | | | | |

| | | | | | |
|---|---|---|---|---|---|
| भ्रातरौ | | | | | |
| नामनी | | | | | |
| वधूः | | | | | |
| अष्टसिद्धयः | | | | | |
| भगवन् | | | | | |
| प्राणान् | | | | | |
| भूमौ | | | | | |
| वासांसि | | | | | |
| भगिन्याः | | | | | |

## समासः ।

**✻ समासतालिकां पूरयत ।**

| समस्तपदम् | समासविग्रहः | समासनाम |
|---|---|---|
| आसेतुहिमाचलम् | **सेतोः आरभ्य हिमाचलपर्यन्तम् ।** | अव्ययीभावः । |
| **तापसकुमारौ** | तापसौ च इमौ कुमारौ च । | कर्मधारयः । |
| तीर्णजलधिः | **तीर्णः जलधिः येन सः ।** | बहुव्रीहिः । |
| **गोकुलस्थाः** | गोकुले तिष्ठन्ति इति । | उपपद-तत्पुरुषः । |
| स्त्रीपुरुषाः | **स्त्रियः च पुरुषाः च ।** | इतरेतर-द्वन्द्वः । |

**अनेन प्रकारेण अधोलिखितानां समस्तपदानां समासविग्रहं समासनाम च लिखत ।**

| समस्तपदम् | समासविग्रहः | समासनाम |
|---|---|---|
| मनोविनोदनम् | | |
| स्तुतिकन्या | | |
| असन्तः | | |

| समस्तपदम् | समासविग्रहः | समासनाम |
| --- | --- | --- |
| गुणोत्तरः | | |
| सह्याश्रितः | | |
| सर्वर्तवः | | |
| गोदावरीरोधः | | |
| पञ्चवटी | | |
| सदारः | | |
| विन्यस्तहस्तः | | |
| पवित्राम्भः | | |
| महालसाख्या | | |
| तुलजापुरस्था | | |
| वाजिविभूषणम् | | |
| हतवचाः | | |
| चन्द्रचूडः | | |
| वारान्निधिः | | |
| खद्योतः | | |
| सहस्रांशुः | | |
| पुस्तकस्था | | |
| गदार्तः | | |
| फलदा | | |

| | | |
|---|---|---|
| पुरुषसिंहः | | |
| सानिलः | | |
| वितथवृत्तिः | | |
| मज्जनोत्थितः | | |
| बुद्धिविभवः | | |
| साहसयुज् | | |
| अर्थहीनाः | | |
| चिन्तनमग्नाः | | |
| कोषगताः | | |
| वर्णविपर्ययः | | |
| प्रतिदिनम् | | |
| स्नानार्थम् | | |
| शिरोमर्दनम् | | |

| | | | | |
|---|---|---|---|---|
| शुक्लशिरोरुहः | कोषदण्डौ | अकृष्या | ग्रामान्तरम् | अनुदकम् |
| राक्षसीजः | पितृहृदयानि | कृतनामधेयः | सर्वदमनः | पुरुवंशः |
| एकान्वयः | भूमिपतिता | रक्षाकरण्डकम् | कुशलवौ | सहस्रदीधितिः |
| प्रकृतिस्था | युष्मदाश्रमे | अशननाशः | दुष्टाचार्यः | क्षीणायुः |
| निष्फलम् | भवत्सार्धम् | गोकुलस्थाः | विद्वद्धनम् | सकलनन्दनः |
| रसिकवराः | सूत्रधारः | पादवन्दनम् | सुरवाणी | मनोमेलनम् |

# कृदन्ताः ।

गतवर्षे वयं 'क्त–क्तवतु–शतृ–शानच्–कृत्याः' इत्यादीनां कृत्–प्रत्ययानाम् (कृदन्तानाम्) अध्ययनं कृतवन्तः । इदानीं, वयम् अन्येषां केषाञ्चन कृत्–प्रत्ययानाम् अध्ययनं करवाम ।

धातोः 'ल्युट्' प्रत्ययेन नामशब्दः उद्भवति । एषः शब्दः क्रियां दर्शयति ।

धातोः 'क्तिन्' प्रत्ययेन स्त्रीलिङ्गः नामशब्दः उद्भवति । एषः शब्दः क्रियायाः नाम दर्शयति ।

धातोः 'घञ्' प्रत्ययेन पुंलिङ्गः नामशब्दः उद्भवति । एषः शब्दः क्रियायाः भावं दर्शयति ।

धातोः 'तृच्' प्रत्ययेन विशेषणशब्दः उद्भवति । एषः शब्दः क्रियायाः कर्तारं दर्शयति ।

| १. ल्युट् | | | | | |
|---|---|---|---|---|---|
| प्रसाधनम् | उत्खननम् | उपयोजनम् | धावनम् | सम्मार्जनम् | स्नानम् |
| विलेपनम् | नाशनम् | परिधानम् | धारणम् | मर्दनम् | धूपनम् |
| रेखणम् | वन्दनम् | निर्माणम् | अलङ्करणम् | भूषणम् | स्थानम् |
| विज्ञानम् | उपनयनम् | पालनम् | अतिपातनम् | प्रदानम् | सन्दर्शनम् |
| वदनम् | ज्ञानम् | निष्कासनम् | निर्धारणम् | दर्शनम् | चिन्तनम् |
| निर्वचनम् | वचनम् | शमनम् | लेखनम् | नन्दनम् | संवर्धनम् |
| आकर्षणम् | गुञ्जनम् | मण्डनम् | खननम् | ग्रहणम् | घर्षणम् |
| फलनम् | रोपणम् | मेलनम् | अध्ययनम् | पानम् | करणम् |
| **२. क्तिन्** | | | | | |
| रतिः | गतिः | भक्तिः | विरक्तिः | मुक्तिः | निर्मितिः |
| वृत्तिः | प्राप्तिः | प्रीतिः | अनुरक्तिः | भीतिः | बुद्धिः |
| आवृत्तिः | शक्तिः | आसक्तिः | युक्तिः | अनुभूतिः | उक्तिः |
| **३. घञ्** | | | | | |
| नाशः | लेपः | वासः | प्रणामः | क्रोधः | संविभागः |
| रामः | योगः | रागः | लाभः | आचारः | निरनुक्रोशः |
| **४. तृच्** | | | | | |
| प्रणन्ता | धाता | कर्ता | श्रोता | भ्राता | भर्ता |

# तद्धितान्ताः ।

**कांश्चन विशिष्टान् प्रत्ययान् योजयित्वा नाम–सर्वनाम–विशेषणेभ्यः तद्धितान्तशब्दाः निर्मीयन्ते । अत्र केचन तद्धितान्तशब्दाः तेषां सामान्यैः अर्थैः सह दत्ताः वर्तन्ते । तेषां सम्यग् अध्ययनम् अस्माभिः कर्तव्यम् ।**

१) **शुक्लत्वम्** = शुक्लस्य भावः ।
२) **कण्टकितम्** = कण्टकाः अस्य सन्ति ।
३) **क्षुद्रता** = क्षुद्रस्य भावः ।
४) **श्यामत्वम्** = श्यामस्य भावः ।
५) **मात्सर्यम्** = मत्सरस्य भावः ।
६) **योग्यता** = योग्यस्य भावः ।
७) **दारिद्र्यम्** = दरिद्रस्य भावः ।
८) **मत्सरिणी** = मत्सरः अस्याः अस्ति ।
९) **शूली** = शूलम् अस्य अस्ति ।
१०) **महत्त्वम्** = महतः भावः ।
११) **अद्यतनीयः** = अद्य भवम् ।
१२) **भारतीयः** = भारते भवः ।
१३) **साहित्यम्** = सहितस्य भावः ।
१४) **निरामयत्वम्** = निरामयस्य भावः ।
१५) **बाह्यम्** = बहिः भवम् ।
१६) **नैसर्गिकता** = नैसर्गिकस्य भावः ।
१७) **प्राचुर्यम्** = प्रचुरस्य भावः ।
१८) **प्राकृतिकम्** = प्रकृत्याः उत्पन्नम् ।
१९) **दैवम्** = देवस्य इदम् ।
२०) **उद्योगी** = उद्योगः अस्य अस्ति ।
२१) **पौरुषम्** = पुरुषस्य इदम् ।
२२) **सौकर्यम्** = सुकरस्य भावः ।
२३) **वैविध्यम्** = विविधस्य भावः ।
२४) **नावीन्यम्** = नवीनस्य भावः ।
२५) **स्वास्थ्यम्** = स्वस्थस्य भावः ।
२६) **सौन्दर्यम्** = सुन्दरस्य भावः ।
२७) **शौचम्** = शुचेः इदम् ।
२८) **धैर्यम्** = धीरस्य भावः ।
२९) **चर्मवान्** = चर्म अस्य अस्ति ।
३०) **औपकारिकी** = उपकारेण निर्वृत्ता ।
३१) **स्वाम्यम्** = स्वामिनः भावः ।
३२) **पौण्डरीकम्** = पुण्डरीकाणां समाहारः ।
३३) **शारदम्** = शरदि भवम् । शारदायाः इदम् ।
३४) **देशीयाः** = देशे भवाः ।
३५) **श्रेष्ठत्वम्** = श्रेष्ठस्य भावः ।
३६) **मौलिकम्** = मूले भवम् ।
३७) **सामर्थ्यम्** = समर्थस्य भावः ।
३८) **साधर्म्यम्** = सधर्माणां भावः ।
३९) **मातृत्वम्** = मातुः भावः ।
४०) **सौभद्रः** = सुभद्रायाः अपत्यं पुमान् ।
४१) **पौत्रः** = पुत्रस्य अपत्यं पुमान् ।
४२) **धार्तराष्ट्रम्** = धृतराष्ट्रस्य इदम् ।
४३) **शौण्डीर्यम्** = शौण्डीरस्य भावः ।
४४) **दैवतम्** = देवतानाम् इदम् ।
४५) **मानुषः** = मनोः अपत्यं पुमान् ।
४६) **चापलम्** = चपलस्य भावः इदं वा ।
४७) **स्वाभाविकम्** = स्वभावात् उत्पन्नम् ।
४८) **कुलीनम्** =कुले भवम् ।
४९) **प्राणी** = प्राणाः सन्ति अस्य ।
५०) **यौवनम्** = यूनः भावः ।

# अमरकोषः ।

| | |
|---|---|
| **जगत्** – त्रिष्वथो जगती लोको विष्टपं भुवनं जगत् । | त्रिष्वथः, जगती, लोकः, विष्टपम्, भुवनम्, जगत्, । |
| **शरीरम्** – गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः । | गात्रम्, वपुः, संहननम्, शरीरम्, वर्ष्म, विग्रहः । |
| **कुन्तलः** – चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः । | चिकुरः, कुन्तलः, वालः, कचः, केशः, शिरोरुहः । |
| **वस्त्रम्** – वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम् । | वस्त्रम्,आच्छादनम्, वासः, चैलम्,वसनम्,अंशुकम् । |
| **द्विषत्** – रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः । | रिपुः, वैरी, सपत्नः, अरिः, द्विषद्, द्वेषणः, दुर्हृदः । |
| **सितः** – अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः । | अवदातः, सितः, गौरः, वलक्षः, धवलः, अर्जुनः । |
| **आयुधम्** – आयुधं तु प्रहरणं शस्त्रमस्त्रमथास्त्रियौ । | आयुधम्, प्रहरणम्, शस्त्रम्, अस्त्रम् । |
| **मृद्** – मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका । | मृद्, मृत्तिका, प्रशस्ता, मृत्सा, मृत्स्ना । |
| **अटवी**– अटव्यरण्यं विपिनं गहनं काननं वनम् । | अटवी, अरण्यम्, विपिनम्, गहनम्, काननम्, वनम् । |
| **षण्मुखः**– कार्तिकेयो महासेनः शरजन्मा षडाननः । | कार्तिकेयः, महासेनः, शरजन्मा, षडाननः । |
| **सहस्रांशुः**– भानुर्हंसः सहस्रांशुस्तपनः सविता रविः । | भानुः, हंसः, सहस्रांशुः, तपनः, सविता, रविः । |
| **द्विरेफः**– द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः । | द्विरेफः, पुष्पलिड्, भृङ्गः, षट्पदः, भ्रमरः, अलिः । |
| **वह्निः**– अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः । | अग्निः, वैश्वानरः, वह्निः, वीतिहोत्रः, धनञ्जयः । |
| **कलहः**– अस्त्रियां समरानीकरणाः कलहविग्रहौ । | समरः, अनीकरणः, कलहः, विग्रहः । |
| **मार्जारः**– ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् । | ओतुः, बिडालः, मार्जारः, वृषदंशकः, आखुभुक् । |
| **गङ्गा**– गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा । | गङ्गा, विष्णुपदी, जह्नुतनया, सुरनिम्नगा । |
| **वीचिः**– भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु । | भङ्गः, तरङ्गः, ऊर्मिः, वीचिः । |
| **दर्पणः**– दर्पणे मुकुरादर्शौ । | दर्पणः, मुकुरः, आदर्शः । |
| **विघ्नः**– विघ्नोऽन्तरायः प्रत्यूहः स्यादुपघ्नोऽन्तिकाश्रये । | विघ्नः, अन्तरायः, प्रत्यूहः, उपघ्नः, अन्तिकाश्रयः । |
| **शक्तिः**– शक्तिः पराक्रमः प्राणो विक्रमस्त्वतिशक्तिता । | शक्तिः, पराक्रमः, प्राणः, विक्रमः, अतिशक्तिता । |
| **पत्नी**– पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी । | पत्नी, पाणिगृहीती, द्वितीया, सहधर्मिणी । |
| **शकुन्तः**– शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः । | शकुन्तिः, पक्षी, शकुनिः, शकुन्तः, शकुनः, द्विजः । |
| **अन्वयः**– सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ । | सन्ततिः, गोत्रम्, जननम्, कुलम्, अभिजनः, अन्वयः । |
| **परिव्राजकः**– भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी । | भिक्षुः, परिव्राट्, कर्मन्दी, पाराशरी, मस्करी । |
| **पद्मा** – लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया । | लक्ष्मीः, पद्मालया, पद्मा, कमला, श्रीः, हरिप्रिया । |

- **विरुद्धार्थकशब्दान् लिखत ।**

१) लघुः ×
२) सुगन्धः ×
३) शुक्लः ×
४) मिथ्या ×
५) मूढः ×
६) सुलभा ×
७) श्रेष्ठाः ×
८) द्रुतम् ×
९) पुरा ×
१०) सज्जनः ×
११) सुकरम् ×
१२) क्षीणायुः ×
१३) निष्फलम् ×
१४) जीवितः ×
१५) वृद्धिः ×
१६) स्वपक्षम् ×
१७) पृष्ठतः ×

# सूचनानुसारं परिवर्तनम् ।

**१. अधोलिखितानि वाक्यानि लट्/लङ्/लोट्/विधिलिङ् इत्येतेषु लकारेषु परिवर्तयत ।**

* यथा– राजा बालं परिष्वजते ।

| लट् | लङ् | लोट् | विधिलिङ् |
|---|---|---|---|
| राजा बालं परिष्वजते । | राजा बालं पर्यष्वजत । | राजा बालं परिष्वजताम् । | राजा बालं परिष्वजेत । |

१) गर्दभा: गीतं गायन्ति ।
२) स्तुतिकन्या कौमारं वहति ।
३) रामचन्द्र: गोदावरीरोधसि अवसत् ।
४) यात्रिवर्ग: नृसिंहवाटीम् आगच्छति ।
५) चन्द्रचूड: व: पातु ।
६) अम्बा कुप्यति ।
७) वीर-सावरकर: तम् अब्रवीत् ।
८) रक्षक: द्वारताडनम् अकरोत् ।
९) वीर-सावरकर: गोलिकाध्वनिम् अशृणोत् ।
१०) सरस्वती पुन: वदति ।
११) भाषा: चिन्तयन्तु ।
१२) प्रसाधनकलाया: षोडश अङ्गानि सन्ति ।
१३) अल्पकोषो हि राजा पौरजानपदान् ग्रसते ।
१४) सीताध्यक्ष: कार्पासबीजानि गृह्णीयात् ।
१५) राजा बीजभक्तोपग्रहं कुर्यात् ।
१६) राजा स्तेन-व्याल-व्याधिभि: उपहतान् पशुव्रजान् रक्षेत् ।
१७) अयं स्वर: कस्यचित् लोकवीरस्य भवेत् ।
१८) घटोत्कच: वृक्षम् उत्पाट्य प्रहरति ।
१९) तव संरम्भ: वर्धते ।
२०) महाराज: शृणोतु ।
२१) वर्धते मे कुतूहलम् ।
२२) तापस: कण्व: प्रविशति ।
२३) क्षुधा मां बाधते ।
२४) अज्जुका प्राणान् परित्यजति ।
२५) एते विद्वांस: तादृशमेव नाटकं द्रष्टुं न इच्छन्ति ।

**२. अधोलिखितानि वाक्यानि एक/द्वि/बहुवचने परिवर्तयत ।**

१) गर्दभा: गीतं गायन्ति ।
२) जना: दोलोत्सवं वितन्वते ।

३) तरु: न वदति ।

४) रक्षक: द्वारभङ्गम् अकरोत् ।

५) भारतीयभाषा: देवीं सरस्वतीम् अगच्छन् ।

६) शब्दकोषा: शब्दानाम् अर्थान् प्रकाशयन्ति ।

७) विविधप्रसाधनसाहित्यस्य प्रभूतम् उपयोजनं भारतीया: अकुर्वन् ।

८) राजा बीजभक्तोपग्रहं कुर्यात् ।

९) अहं सौभद्रं स्मरामि ।

१०) अहं गिरिम् उत्पाट्य प्रहरामि ।

११) उटजे मृत्तिकामयूर: तिष्ठति ।

१२) बालक: हस्तं प्रसारयति ।

१३) अहं पितरं वेदितुमिच्छामि ।

१४) विद्वांस: नाटकं द्रष्टुं न इच्छन्ति ।

१५) वयं श्रीकृष्णं प्रार्थयामहे ।

### ३. पूर्वकालवाचकं निष्कासयत ।

१) समुद्र: पीताम्बरं दृष्ट्वा स्वकन्याम् अयच्छत् ।

२) भारतीया: विविधप्रसाधनसाहित्यस्य प्रभूतम् उपयोजनं कृत्वा स्वसौन्दर्यं वर्धितवन्त: ।

३) रामचन्द्र: वन्यां वृत्तिम् अवलम्ब्य पञ्चवट्याम् अवसत् ।

४) माता वदने जगत् दृष्ट्वा विस्मयवशम् अगच्छत् ।

५) भगवान् तूष्णीं स्थित्वा योगं चिन्तयतु ।

६) सरस्वती स्मितं कृत्वा उक्तवती ।

७) अहम् एतद् बालशौण्डीर्यं दृष्ट्वा सौभद्रं स्मरामि ।

८) अहम् इमं स्थूलं वृक्षमुत्पाट्य प्रहरामि ।

९) प्रथमा तापसी विलोक्य वदति ।

### ४. पूर्वकालवाचकं योजयत ।

१) भक्तव्रज: क्षेत्रं समागच्छति विठ्ठलं भजति च ।

२) पाण्डुरङ्ग: इष्टकायां तिष्ठति भक्तमनोरथान् पूरयति च ।

३) जना: ऋतुम् अनुसरन्ति प्रसाधनं कुर्वन्ति च ।

४) सरस्वती विहसति वदति च ।

५) विनायक: विवरं सम्प्रविशति बहि: निर्गमे यतते च ।

६) रक्षक: शून्यकक्षम् अवलोकयति भीतिभग्नहृदयो भवति च ।

७) एतद् गिरिकूटम् उत्पाटयामि प्रहरामि च ।

८) रक्षाकरण्डक: सर्प: भवति, तं दशति च ।

९) राम: विदूषकम् आह्वयति वदति च ।

१०) भीम: सौभद्रं स्मरति घटोत्कचं वदति च ।

## ५. सति-सप्तमी-रचनां निष्कासयत ।


१) यत्ने कृते न सिध्यति चेत् कोऽत्र दोषः?
२) न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ।
३) कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ।
४) उदिते तु सहस्रांशौ न खद्योतो न चन्द्रमाः ।
५) पथ्ये सति गदार्तस्य भेषजग्रहणेन किम्?
६) चित्ते विषण्णे भुवनं विषण्णम् ।
७) केशधूपे कृते केशाः सुगन्धेन विराजन्ते ।
८) सति कुसुमालङ्कारे सुवर्णादिभिः किं प्रयोजनम्?
९) चिन्तनमग्नासु सर्वासु भाषासु सरस्वती वदति ।
१०) अभिवाद्य प्रस्थिते मयि त्वं किम् उपदिष्टः अम्बया ।

## ६. वाच्यपरिवर्तनं कुरुत ।

१) वायुना न नीतः याचकः ।
२) गीतं गायन्ति गर्दभाः ।
३) स्तुतिकन्या वहति कौमारम् ।
४) शुष्ककेशानां कृष्णीकरणं तेन उपदिष्टम् ।
५) बाणकविना पटभेदाः निरूपिताः ।
६) कृष्णेन मृद् भक्षिता ।
७) भाषाभिः सरस्वती पृष्टा ।
८) निरुक्तकारेण यास्कमुनिना निर्वचनं निरूपितम् ।
९) चक्रवर्तिलक्षणम् अपि अनेन धार्यते ।
१०) त्वया मह्यं दक्षिणा प्रदत्ता ।
११) अहं भगवन्तम् एव अनुसरामि ।
१२) अहं सर्पेण दष्टा ।
१३) यमेन अहं प्रेषितः ।
१४) नटः सत्यं वदति ।
१५) किं त्वया एषः मानुषः आनीतः?


***















































- पाठ्यपुस्तक मंडळाची वैशिष्ट्यपूर्ण पाठ्येत्तर प्रकाशने.
- नामवंत लेखक, कवी, विचारवंत यांच्या साहित्याचा समावेश.
- शालेय स्तरावर पूरक वाचनासाठी उपयुक्त.

पुस्तक मागणीसाठी www.ebalbharati.in, www.balbharati.in संकेत स्थळावर भेट द्या.

**साहित्य पाठ्यपुस्तक मंडळाच्या विभागीय भांडारांमध्ये विक्रीसाठी उपलब्ध आहे.**

ebalbharati

विभागीय भांडारे संपर्क क्रमांक : पुणे - ☎ २५६५९४६५, कोल्हापूर- ☎ २४६८५७६, मुंबई (गोरेगाव) - ☎ २८७७१८४२, पनवेल - ☎ २७४६२६४६५, नाशिक - ☎ २३९१५११, औरंगाबाद - ☎ २३३२१७१, नागपूर - ☎ २५४७७१६/२५२३०७८, लातूर - ☎ २२०९३०, अमरावती - ☎ २५३०९६५

(प्रतिदर्श-वार्तापत्रम्)

# आह्लादपत्रिका ।

(संस्कृतवार्षिकम्)

सम्पादकमण्डलम्- संस्कृत-अभ्यासमण्डलम् प्रकाशनवर्षम् - २०१९-२०

## सम्पादकीयम्

अस्य वर्षस्य महाराष्ट्रराज्यस्य संस्कृत-नाट्य-स्पर्धा अधुनैव सम्पन्ना । अस्यां स्पर्धायां विंशत्यधिकै: सङ्घै: विविधानि नाटकानि प्रस्तुतानि । यै: स्पर्धायां पारितोषिकाणि प्राप्तानि यैश्च न प्राप्तानि तेषां सर्वेषां हार्दम् अभिनन्दनम् । नाटकस्य प्रयोगे नटानां, नायकानां, वादकानां, रङ्गभूषाकाराणां, प्रकाशयोजनाकाराणां, लेखकानां, दिग्दर्शकानां, संस्थाचालकादीनां बहूनां जनानाम् अंशदानं भवति । ते सर्वे प्रयत्नपूर्वकं सोत्साहं रसिकरञ्जनार्थं यतन्ते । अत: तेषां सर्वेषां पुनरेकवारम् अभिनन्दनम् ।

यस्मै नाट्यं न रोचते, तादृश: जन: विरल: एव । नाट्ये रसिका: लोकजीवनस्य प्रतिबिम्बं पश्यन्ति ।

**योऽयं स्वभावो लोकस्य सुखदु:खसमन्वित: ।**
**सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते ॥**

नाट्ये कथा:, संवादा:, नृत्यं, गायनं, कलहा:, प्रेमालापा:, लेखकै: प्रयुज्यन्ते । तै: विविधा: रसिका: आकृष्टा: भवन्ति । मालविकाग्निमित्रे नाटके, गणदासमुखेन कालिदासेन उक्तम्, नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्' इति, तद् युक्तमेव ।

यद्यपि नाट्यशास्त्रे नाट्यस्य दशविधा: प्रकारा: वर्णिता: तथाऽपि अधुना संस्कृतनाट्ये नवनूतना: प्रकारा: दृश्यन्ते । क्वचित् लोकनाट्यानुसारिण्य: (तमाशा) रचना: अपि भवन्ति। यद्यपि कालिदासादिभि: पूर्वसूरिभि: उत्तमोत्तमानि नाटकानि विरचितानि तथापि तेषां नाटकानां कथा: प्राय: राजानम् अधिकृत्यैव लिखिता: । आधुनिककाले गता: ते राजान: तेषां कामसचिवा:, विदूषका:, प्रणयिन्य: ललना:, युद्धवार्ता: च । नवरसरुचिराणि तानि नाटकानि रसिकवरै: नैकवारं दृष्टपूर्वाणि । परं मिष्टान्नै: पूरितोदरस्यापि तिन्तिडिकायाम् अभिलाष: सम्भवति । अन्य: खलु मिष्टान्नेषु रस: अन्यश्च चिञ्चास्वाद: । उभावपि विभिन्नौ परम् आवश्यकौ एव । अत: कालानुसारं ये नूतना: विषया: समुपस्थिता: तान् अधिकृत्य केचन सिद्धहस्ता: लेखका: नूतनविषयान् अधिकृत्य नूतनम् आकृतिबन्धं च स्वीकृत्य नूतनानि नाटकानि लिखन्ति । तेषामपि प्रयोगा: अस्यां नाट्यस्पर्धायां भवन्ति । स्वागतार्हम् एतत् सर्वम् ।

कैश्चित् सङ्घै: अन्यभाषाभि: अनूदितानि नाटकानि अपि प्रयुज्यन्ते । तदपि स्वागतार्हम् । तेन संस्कृत-नाट्यविश्वम् अधिकं समृद्धं भविष्यति । ये केचन संस्कृतभाषापारङ्गता: सन्ति तै: अभ्यासेन प्रयत्नैश्च नूतनानि संस्कृतनाटकानि रचितव्यानि । नाट्यप्रयोगेन अस्या: पुरातन्या: संस्कृतभाषाया: प्रसार: प्रचार: च आधिक्येन भविष्यति । मानवजाते: आद्यं हृत्स्पन्दनम् अस्यां भाषायां ग्रथितं वर्तते । अमृतमधुरा एषा भाषा नाट्यप्रयोगै: जनहृदयस्था भविष्यति । धन्यवादार्ह: एष संस्कृत-राज्य-नाट्य-स्पर्धा-उपक्रम: य: एतावन्ति वर्षाणि प्रचलति । भविष्यति काले च नितरां प्रचलिष्यति ।

अन्यासु लोकभाषासु ये नाट्यप्रयोगा: भवन्ति तेभ्य: धनप्राप्ति: भवति । परं संस्कृते तादृशी अवस्था नास्ति । एकहोरात्मकस्य संस्कृत-नाट्य-प्रयोगस्य कृते अपि बहुलं धनम् आवश्यकं भवति । राज्यशासनं, दानशूरा: रसिका: वा तत्र साहाय्यं कुर्वन्तु इति अस्मदीयम् आवाहनम् ।

जयतु जयतु संस्कृतम्

## संस्कृत-विश्वसम्मेलनं सम्पन्नम् ।




संस्कृतप्रसारान्दोलनस्य इतिहासे मानदण्ड: इव संस्कृत-विश्वसम्मेलनं ९ त: ११ नोव्हेम्बर २०१९ इति दिनाङ्केषु आयोजितम्। सम्मेलनस्य उद्घाटनं राजधान्यां दिल्लीनगरे कात्यायनीमन्दिरतपोभूमौ जातम् । विश्वस्य २१ देशेभ्य:, भारतस्य पञ्चशताधिकजनपदेभ्य: च आगता: ४२५६ प्रतिनिधय: न केवलं संस्कृतानुरागिण:, अपि तु सम्भाषणशीला: संस्कृतसंवर्धनाय कृतसंकल्पा: कार्यकर्तार: च आसन् । १२०० स्वयंसेवका: प्रबन्धनकार्यं कृतवन्त: ।

भारतस्य प्रधानमन्त्री मा. श्री. नरेन्द्र: मोदीमहाशय: सम्मेलनाय शुभाशयान् प्रेषितवान् । स: लिखति, 'अस्माकं संस्कृति:, ज्ञानं, संस्कारा: चेति एतेषाम् अधिष्ठानं संस्कृत विद्यते ।

केन्द्रसर्वकारस्य स्वास्थ्य-विज्ञान-तन्त्रज्ञान-मन्त्री सम्मेलनस्य स्वागताध्यक्ष: डॉ. हर्षवर्धन: उद्घाटने 'संस्कृतं भारतस्य आत्मा' इति उद्घोषितवान् ।

केन्द्रराज्यमन्त्री प्रतापचन्द्रषडंगी पूर्णत: संस्कृतेन व्याख्यानं कृतवान् । उपराष्ट्रपति: श्री. वैंकय्य: नायडु सर्वेषां कृते मुक्तसत्रे अन्तर्मनसा कृतेन भावपूर्णभाषणेन श्रोतृणां मनांसि जितवान् । 'संस्कृतसम्पद्' इति प्रदर्शिन्यां संस्कृते विज्ञानम्, अर्थशास्त्रं, नाट्यशास्त्रं चेति समृद्धज्ञाननिधे: दर्शनम् आसीत् ।

सम्मेलनस्य परिसरे सर्वे परस्परं संस्कृतेन भाषमाणा: आसन् । विविधेभ्य: देशेभ्य: आगतानां वैदेशिकानाम् अनुभवान् शृण्वन्त: युवका: तै: सह स्वच्छायाचित्रं स्वीकर्तुम् उद्यता: आसन् । (वार्ताङ्कनम्- डॉ. प्रज्ञा कोनार्डे श्रिया च।)

## संस्कृतनाट्यमहोत्सवस्य शुभारम्भोऽभूत् ।



**वार्ताहर:**- एन. ईश्वरी-औरङ्गाबादे लिटिल-फ्लावरविद्यालये महाराष्ट्रसंस्कृतसंस्थानस्य विद्यालयसंस्कृतसमितेश्च संयुक्ततत्त्वावधाने संस्कृतनाट्यमहोत्सवस्य शुभारम्भोऽभूत्। अस्मिन् प्रसङ्गे मुख्यातिथि-रूपेण डॉ. बेन्नी कालिकतमहोदय: उपस्थित: आसीत् । विद्यालयस्य प्रधानाध्यापिका डॉ. अश्विनी उमेशकुमारमहाभागा अध्यक्षस्थानं भूषितवती ।

उत्तमाभिनयसामर्थ्येन उत्तमनाटकानां प्रस्तुति: अत्र कृता। प्रमुखातिथि:, अध्यक्ष:, विशेषातिथि: डॉ. मङ्गलमहोदय: एते सर्वे छात्रान् प्रेरितवन्त: । कार्यक्रमस्य यशस्वितायै सीमामहोदया, वैशाली-पुराणिक महोदया, तथैव के. बी. खेडकरवर्य: प्रयत्नं कृतवन्त:। अवसरेऽस्मिन् बहव: संस्कृतप्रेमिण: छात्रा:, शिक्षका:, नागरिकाश्च उपस्थिता: आसन् ।

## ४७ सांसदा: संस्कृतेन शपथम् अगृह्णन् ।

सप्तदश्यां लोकसभायां प्रथमवारं प्रशंसनीया घटना सञ्जाता । निर्वाचनानन्तरं लोकसभायां य: शपथग्रहण-कार्यक्रम: अभवत् तस्मिन् सप्तचत्वारिंशत् (४७) सांसदा: संस्कृतभाषया शपथग्रहणम् अकुर्वन् । संस्कृतप्रचारिणी एका संस्था तेषां सम्मानं करिष्यति । संस्थाया: प्रान्तमन्त्री के. के. तिवारी-महोदयेन प्रतिपादितं यत् गतसमयेऽपि सुषमास्वराज:, डॉ. हर्षवर्धन-सदृशा: नैके सांसदा: संस्कृतेन शपथग्रहणम् अकुर्वन् ।

## सुभाषितम् ।



राष्ट्रध्वजो राष्ट्रभाषा राष्ट्रगीतं तथैव च ।
एतानि मानचिह्नानि सदैव हृदि धार्यताम् ॥

## 'ययाति' संस्कृतभाषायाम् ।




पुणेमराठीग्रन्थालये आयोजिते कार्यक्रमे वि.स.खाण्डेकरलिखिताया: 'ययाति' इति कादम्बर्या: संस्कृतानुवाद: प्रकाशित:। प्रकाशनसमारम्भे अनुवादक: श्री. रामकृष्णसुरिमहाभाग: उपस्थित:। अखिलभारतीयमराठीसाहित्यसम्मेलनाध्यक्षाणां डॉ. अरुणा ढेरेमहोदयानां करकमलाभ्यां ग्रन्थ: प्रकाशित:। आध्यक्ष्यं डॉ. श्री विश्वासवर्यै: ऊढम् ।

## अन्तर्जाल-रेडिओ

किं भवन्त: आदिनं संस्कृतं श्रोतुम् इच्छन्ति ? तर्हि भवतां कृते एका आनन्दवार्ता। विश्वस्य प्रथमअन्तर्जालरेडिओ नाम इन्टरनेट रेडिओ इदानीं संस्कृतप्रेमिणां कृते सिद्धोऽस्ति । संस्कृतदिवसावसरे अस्य निर्मिति: सुनील खाण्डबहालेमहोदयेन कृता । Khandbhale.com अस्मिन् सङ्केतस्थले विना शुल्कं सर्वे आकाशवाणी श्रोतुं शक्नुवन्ति ।

## व्यङ्ग्यचित्रम्



यदि सम्भाषणार्थं मुखमेव न उद्घाटयाम: तर्हि संस्कृतभाषा जीवति इति कथं वक्तुं शक्नुम: ?

## विज्ञापनम् ।

**संस्कृत-साहित्य-भाण्डागारम् ।**

(संस्कृतग्रन्थानां तथैव आयुर्वेदिकपुस्तकानां महासागर:)

**सम्पर्क: -** श्री. शरद राव ९४××××××२१

श्रीमातामन्दिरस्य पुरत:, 'शरयूभवनम्'

चित्रानगरम्, जयपुरम् ।

**समय:** प्रात: १०.०० वादनत: रात्रौ ८.०० वादनपर्यन्तम्

विरलानां पुस्तकानां प्राप्त्यर्थं दूरवाण्या अपि सम्पर्क: कर्तुं शक्यते ।

**इ-सम्पर्क:-**

sanskritsahitya@gmail.com

## डॉ. बापटवर्यायै साहित्य-अकादमी पुरस्कारः



अभिजात-वाङ्मय-लेखनार्थं तथैव संशोधनपरलेखनार्थं दीयमानः 'भाषा-सम्मान-पुरस्कारः' संस्कृतभाषायाः तथा बौद्धवाङ्मयस्य विदुष्यै डॉ. शैलजाबापट्-महोदयायै समर्पितः । 'साहित्य-अकादमी' नवदेहलीद्वारा एषः पुरस्कारः प्रदीयते । एकलक्षरूप्यकाणि मानपत्रं च इति एतस्य पुरस्कारस्य स्वरूपं विद्यते । 'A critical Study on Brahmasutras' एतस्मै संशोधनपरग्रन्थाय एषः पुरस्कारः उद्घोषितः प्रदत्तः च । अकादम्याः सचिवः डॉ. के. श्रीनिवासरावः एताम् उद्घोषणां कृतवान् ।

डॉ. बापट-महोदयया नैकेषां हस्तलिखितानाम् अध्ययनं कृत्वा 'ब्रह्मसूत्र' ग्रन्थस्य त्रिषु खण्डेषु निर्माणं कृतम् । डॉ. बापटमहोदया सावित्रिबाई-फुले-पुणे विश्वविद्यालये संस्कृतविभागे अध्यक्षरूपेण कार्यं कृतवती । नैके संशोधनपराः ग्रन्थाः तया लिखिताः । महोदयायाः नैके छात्राः पीएच्.डी. उपाधिं प्राप्य उच्चस्थानानि विभूषितवन्तः । केवलाद्वैतवेदान्त तत्त्वज्ञानस्य विशिष्टम् अध्ययनं कृतमस्ति बापटवर्यया।

## विशेषसंस्कृतसेविका



### महामहोपाध्याया डॉ.पुष्पा दीक्षितमहोदया

डॉ.पुष्पा दीक्षितमहोदया १ जुलाई १९४२ इत्यस्मिन् दिनाङ्के मध्यप्रदेशस्थे जबलपुरनगरे सञ्जाता । तस्याः पिता न्यायवेदान्तायुर्वेदशास्त्रज्ञः प्राणाचार्यः पण्डितः सुन्दरलालशुक्लः माता जानकीदेवी च । बाल्यादेव पितुः सकाशात् संस्कृताध्ययनं सा कृतवती । 'वैयाकरणशिरोमणीनां विदुषां मार्गदर्शनं सा प्राप्तवती ।

सा न केवलं व्याकरणशास्त्रस्य अपि तु विविधानां शास्त्राणाम् अधिकारिणी अस्ति । अष्टाध्यायीसहजबोधः, नव्यसिद्धान्तकौमुदी इत्येतादृशाः तस्याः उपत्रिंशः मौलिक्यः कृतयः सन्ति । तत्र अग्निशिखा, शाम्भवी इत्येतादृशानि गीतिकाव्यानि किञ्च सन्नन्तकोषः, णिजन्तकोषः इत्येतादृशाः कोषग्रन्थाः विराजन्ते ।

सुरभारत्याः उपासनां विधातुं बिलासपुरे महोदयया पाणिनीयशोधसंस्थानं संस्थापितम् । तत्र न केवलं भारतात् अपि तु विदेशेभ्यः नैके जनाः संस्कृतपठनस्य इच्छया आगच्छन्ति । सर्वे छात्राः भक्त्या 'माताजी' इति उपाधिना तां सम्बोधयन्ति । स्वोपाधिं सार्थकं कुर्वती एषा वात्सल्यमूर्तिः छात्रेभ्यः **निःशुल्करूपेण** अध्ययनव्यवस्थाम् आवासव्यवस्थां भोजनव्यवस्थाञ्च कल्पयति । 'वेद-वेदाङ्ग-सम्मानः, CERTIFICATE OF HONOUR, राजकुमारी-पटनायक-सम्मानः, छत्तीसगढ़-राज्य-अलङ्करण-सम्मानः, वाचस्पति-उपाधिः, महामहोपाध्याय-उपाधिः, संस्कृतात्मा-सम्मानः' इत्येतैः सम्मानैः मान्या पुरस्कृता ।

## संस्कृतमेव सभ्यतायाः प्राणकेन्द्रम्-मन्त्रिवर्यः ।

(मुम्बई) भारतीयप्रौद्योगिकसंस्थानस्य (IIT) ५७ तमे दीक्षान्ते समारोहे मानवसंसाधनविकासमन्त्री संस्कृतभाषायाः महत्त्वं प्रतिपादितवान् । पूर्व-विदेश मन्त्रिण्याः वक्तव्यस्य पुनरुच्चारं कुर्वन् सः अवदत् यत् आयुर्वेदस्य चरकसंहितायाः बीजारोपणं जातमस्ति ।

भविष्यत्काले भाषमाणानि सङ्गणकयन्त्राणि निर्मितानि भविष्यन्ति चेत् तदर्थं निर्णायकं योगदानं संस्कृतभाषायाः भवेत् इति सर्वैः अङ्गीकृतम् इत्यपि तेन प्रतिपादितम् । यथा उच्चार्यते तथैव लिख्यते इति संस्कृतभाषायः वैशिष्ट्यं तेन सुस्मारितम् ।

## प्रियव्रतः महापरीक्षाम् (तेनाली) उत्तीर्णः ।



देवदत्तः तथा अपर्णा एतयोः सुपुत्रेण प्रियव्रतेन इतिहासः रचितः । षोडशवर्षीयः बालकः प्रियव्रतः चतुर्दशचरणात्मिकां महापरीक्षाम् उत्तीर्णः । अस्माकं प्रधानमन्त्रिणा प्रियव्रतः विशेषेण अभिनन्दितः ।

प्रियव्रतः स्वपितुः सकाशात् वेदान् न्यायशास्त्रं च अधीतवान् । चेन्नैनगरे काञ्चीमठद्वारा व्याकरणशास्त्रम् अनुसृत्य एषा महापरीक्षा आयोजिता आसीत् । अल्पीयसि काले परीक्षाम् उत्तरन् सः प्रथमः छात्रः । महावस्त्रम्, एकलक्षरूप्यकाणि, प्रशस्तिपत्रकम् इति पारितोषिकस्य स्वरूपम् अस्ति ।

प्रियव्रतस्य पिता देवदत्तपाटीलमहोदयः गोवायां गुरुकुलं चालयति यत्र जातिलिङ्गादीन् अविगणय्य शास्त्राणां पठनं पाठनं भवति इति विशेषता ।

## संस्कृतप्रतिज्ञाः

- ❊ संस्कृतं मम व्यवहारवाणी अस्ति ।
- ❊ तस्याः समृद्धा-नानाविधा-पौर्विकसम्पत्तिविषये मम अभिमानः अस्ति ।
- ❊ संस्कृतपठनेन मम विनय-आत्मगौरव-सदाचार-सामूहबोध-इत्यादीनां सद्गुणानां विकासः भवति ।
- ❊ 'सत्यमेव जयते'-'सर्वेऽपि सुखिनः सन्तु'-'वसुधैव कुटुम्बकम्', इत्यादिभिः आप्तवचनैः राष्ट्रस्य अखण्डता ऐक्यं च संस्कृतभाषायां सुरक्षितमिति प्रतिभाति ।
- ❊ अहं जाति-वर्ग-स्त्री-पुरुषभेदबुद्धिं विना संस्कृतभाषायाः पठने पाठने तथा प्रचारणे च सदा सर्वथा यत्नं करोमि ।
- ❊ अहं सर्वदा अन्यभाषाणाम् अपि सम्मानं करिष्ये ।
- ❊ जयतु जयतु संस्कृतम् । जयतु जयतु भारतम् ।

❊ **कोष्ठके दत्तेभ्यः अक्षरेभ्यः दश संस्कृतनाटकानां नामानि अन्विष्य लिखत ।**

| | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| बा | टि | प | व | श्र | ल | क्ष | द | अ | ग | म | श | क | ट |
| क्ष | ल | र | सं | म | घ | य | त्त | च | श्व | भ | णि | र्ण | इ |
| स | ख | च | वं | क्ष | वे | णी | सं | हा | र | म् | ई | भा | आ |
| ध | त | सं | रि | अ | षु | मे | ध्य | षां | तृ | पि | य | र | न |
| घ | य | सं | पु | त | रि | वि | क्र | मो | र्व | शी | य | म् | ई |
| प्र | त्त | ङ्गी | श | ञ | म् | रि | कं | स | टो | म्र | त्ति | मा | णा |
| ह्न | सं | त | ह्न | द्य | अ | भि | ज्ञा | न | शा | कु | न्त | ल | म् |
| ष्ट | ख | सौ | टि | प | व | श्र | द | अ | ग | ङ्घ | ङ् | वि | नि |
| ऊ | रु | भ | ङ्ग | म् | ल | क्ष | द | अ | ग | म | श | का | ङ्ग |
| त्र | रू | द्र | श | जे | फ | त्त | रा | क्ष | म् | रि | पु | ग्नि | ञ्ज |
| क्षि | द्र | म् | ले | मु | द्रा | रा | क्ष | स | म् | म | श | मि | श्च |
| त्त | ष्ट्र | ज | भ | ए | ते | षां | ऐ | म् | स्वे | गृ | ह्ल | त्र | श्वे |
| क्ष | द | अ | ग | म | श | व | मृ | च्छ | क | टि | क | म् | किं |

१) बा ..................
६) मा ..................
२) वे ..................
७) मृ ..................
३) सं ..................
८) क ..................
४) ऊ ..................
९) वि ..................
५) अ ..................
१०) मु ..................

## ध्रुवासंस्कृतमहोत्सवः ।

मुम्बापुरीस्थितन वझे-केळकरमहाविद्यालयेन ऑगस्टमासे त्रयोविंशति-दिनाङ्के नावीन्यपूर्णः आन्तरमहाविद्यालयीन - ध्रुवासंस्कृतमहोत्सवः आयोजितः । महोत्सवस्य एतत् चतुर्थं वर्षम्। महोत्सवे नैकासु स्पर्धासु छात्राणां सहर्षः सहभागः आसीत्। अस्मिन् वर्षे 'क्रीडा' इति वस्तु (Theme) आसीत् ।



## संस्कृतशब्दकोषप्रकाशनम् ।

एप्रिलमासस्य एकादशदिने डेक्कन-कॉलेजस्थितेन संस्कृत-कोषशास्त्रविभागेन संस्कृतशब्दकोषस्य चतुस्त्रिंशत्तमखण्डस्य प्रकाशनं राष्ट्रिय-संस्कृत-संस्थानस्य कुलगुरु-परमेश्वरनारायणशास्त्रिमहोदयानां करकमलाभ्यां कृतम् । संस्कृतशब्दकोषप्रकल्पस्य जनकानां सु.म.कत्रेमहाभागानां जन्मदिनं निमित्तीकृत्य अस्य खण्डस्य प्रकाशनम् अभवत् । कार्यक्रमेऽस्मिन् विश्वविद्यालयस्य कुलगुरवः तथा च संस्कृतशब्दकोषप्रकल्पस्य प्रमुखसम्पादकः च उपस्थिताः आसन् । कोषेऽस्मिन् सार्धैकसहस्राधिकशब्दानां सम्पादनं विद्यते ।


॥ विज्ञापनम् ॥

जयतु संस्कृतम्

विविधसंस्थानां सहयोगेन नागपुर-महानगरस्य

**संस्कृतसम्मेलनम्**

१२ डिसेम्बर २०१९

संस्कृतम्
• चिकित्सा •
गणितम् • यन्त्रशास्त्रम्
• भूगोलम् • नृत्यम्
• नाट्यम् • सङ्गीतम्
• रसायनम् • दर्शनानि
• कृषिः

संस्कृतिककार्यक्रमः
विज्ञानप्रदर्शिनी
वस्तुप्रदर्शिनी
शास्त्रप्रदर्शिनी
वेदप्रदर्शिनी
संस्कृत-आपणः
संस्कृतक्रीडाः
पुस्तक-आपणः
संस्कृतविकिपीडिया

स्थानम्- शिवहरी विद्यालयः, अमरावतीमार्गः, नागपुरम् ।

सर्वेषां हार्दं स्वागतम्
सम्पर्कः श्री. के. गुरुबसप्पाहेमन्तः ।
संस्कृत-प्रतिष्ठानम् नागपूरम्
सम्पर्क : ९४××××××××२


## नूतनचित्रपटम् ।

### अहं ब्रह्मास्मि ।




**'बॉम्बे टॉकीज' द्वारा प्रस्तुतम् 'अहं ब्रह्मास्मि' इति संस्कृतचलचित्रपटं २०१९ तमे वर्षे प्रदर्शितम् । कामिनीदुबे द्वारा निर्मितस्य एतस्य चित्रपटस्य दिग्दर्शकः अस्ति श्रीमान् आजाद महोदयः ।**

**संस्कृतभाषायां निर्मितं मुख्यधाराप्रवाहेषु प्रदर्शितम् एतद् विशेषचित्रपटम् । भारतमातुः कृते यैः जीवनं समर्पितं तेषां देशभक्तानां कथा, भारतीयसंस्कृतेः प्रवासः देशप्रेम, संस्कृतभाषामहत्त्वं च अस्मान् बोधयति ।**




महाराष्ट्रराज्य-पाठ्यपुस्तक-निर्मितिः तथा अभ्यासक्रम-संशोधन-मण्डलम्, पुणे.

संस्कृत आल्हाद, इयत्ता बारावी

मूल्यम्- ₹ 102.00